य॰ पूर्णभागः कर्त्तव्य इत्यर्थः इति मि[illegible]श्रा आहुः ॥ रत्नाकरकारस्तु कुटुम्बा
र्थेषु चोद्युक्तः इत्यादिगुणवद्भ्रातृविषयमाह यथा भ्रातॄणां स्वस्य च कुटु
म्बभरणार्थं उद्युक्तः सन् तत्कार्य्यं कुरुते कृष्यादिकं द्रव्यक्रयविक्रयादिकं कु
रुते सोऽन्यैतादृशकर्म्मीकुर्वद्भिः भ्रातृभिर्वृहत्तीयः संवर्द्धनीयः तथा कुटुम्बभ
रणोद्योगरूपगुणवत्तया उत्कृष्टान्नवस्त्रवाहनादिदानमिति भावः ॥ जीमूतवा
हनादयोप्येवं ॥ अत्र पर्यासाधारणकुटुम्बभरणार्थीय उद्युक्तेन तस्य उत्कृष्टान्नवस्त्रा
दिकं देयं ॥ तथा यो भ्राता शक्तोपि साधारणकुटुम्बस्य भरणार्थे नोद्युक्तः तस्य निकृष्टा
न्नादिकं दद्यात् विभागकाले च यदुद्योगेन कुटुम्बाजीवन्ति तस्मै अधिकं उत्कृ
ष्टं वा देयं शक्तस्य तु कोटि इत्यादिना तथा तथात्वाभावे उपजीव्यं द्रव्यावहिष्करणं
भ्रातॄणां यस्तु नेहेत्यादिमनुवचनात् पितृकृतविभागस्यप्येवरीतिवरा
सपाद इति ॥ रत्नाकराशयः ॥ उद्योगिनः प्रशंसामाह ॥ व्यासः ॥ जीवितेयत्र जी
वन्ति विप्राभिज्ञाः वान्धवाः ॥ सफलं जीवितं तस्य आत्मार्थे को न जीवतीति इति
युक्तमुपन्यस्यामः ॥ क्षेत्रजादीनां विभागः प्रमीतपितृकभ्रातृभागप्रकरणे व
दितव्यः सर्वेषां पितृसहभावेनार्जने तु भक्तत्ववृत्त्योध्यत्वादिना वा न विभागवैलक्ष
ण्यमित्युक्तं प्राक् ॥ अत्रेदमवधेयं ॥ यत्र चत्वारो भ्रातरः कर्म्मकुशला जीवत्
पितृका जीवन्ति तत्र एकस्तु एकां भूमिमर्ज्जयति पित्राज्ञया तत्र कीदृशी रीतिः
अर्ज्जनकर्तृकत्वात् तस्यैव सा भूमिः स्यात् उत पित्राज्ञयार्जितत्वात् पितृकृत
मेव तदर्ज्जनमतः सर्वेषां भ्रातॄणां तत्रांशित्वं ॥ अत्रोच्यते किंचिमिदं क्रीतं प्रति
ग्रहीतेवा अन्यथार्ज्जितं वा भूम्यादिकं तत्र क्रये उपस्थिते मयि द्रव्यं विक्रतुमय
मुपस्थितः उत किं कर्त्तव्यमिति पुत्रपृष्टस्य पितुः क्रयं कुर्वित्यनुज्ञामादाय क्र
यः कृतः अथवा क्रयं संपादयेति पितृप्रेषणमादाय क्रयादिकं कृतं आद्ये स्वकी
यासाधारणमूल्येन क्रये प्रतिग्रहे पितवपित्रे देहीति वाक्याभावे पितृप्रति
ग्रहस्यवभिन्नेवात्त भूम्यादिकं पुत्रस्यैव भवति द्वितीये च तद्धनं पितुर्भवति
किंतु स्वकीयासाधारणधनेन मूल्यप्रदाने तु पुत्रस्य स्वच्छन्दत्वे न पितृक्रियामात्रसं
पादनाभिसंध्याने पुत्रस्य तत्रांशित्वं भवति अंशश्च धनस्य उपष्टम्भानुसारेण पु
त्रस्य शरीरापासश्च पितुरेव तस्य तत्प्रतिनिधित्वात् शुक्रशोणितसंभवः पु
त्रो मातापितृनिमित्तकः इति स्मृतेः पुत्रशरीरस्य पित्रधीनत्वात् न च ॥ भार्या
पुत्रश्च भृत्यश्च एय त्रत्ते ऽधनाः स्मृताः यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनं ॥

इतिवचनात्पुत्रोपार्जितवित्ते पितुः स्वामित्वात्पुत्रस्यासाधारणं धनं एव
नास्ति अतः कथं तत्र पुत्रस्यांशित्वं इति चाच्यं जीमूतवाहनादिभिस्तद्वचनस्य
जीवत्पितृकस्य स्वोपार्जितेपि अस्वातंत्र्यमात्राभिप्रायकत्वेनैवोपपादनात्
तथाहि यदि पुत्रादीनां स्वोपार्जितधने स्वत्वं नास्ति तदा तेषामर्जनमेव न संभ
वति स्वत्वहेतुव्यापारस्यैवार्जनपदार्थत्वात् अन्यथा जीवत्यपि पितरि अनुप
लम्भेनापि पुत्रार्जिते पितुः स्वत्वात् तन्मरणोत्तरं सर्वेषां भ्रातृणां समांशित्व
मापद्येत आपद्येत च पुत्रादिभ्यः पुत्रादिदत्तेपि धने पितुरेव पुनः स्वत्वजनना
त् पुत्रादीनां धनसाध्यवैदिकक्रियालोपः तथा च महाभारतादिभ्यो ज्ञात
वाह्लीकौरसि जीवत्येव तत्पुत्रस्य भूरिश्रवसः प्रभूतः सोमयागादि नुपपद्येत॥ पि
तामहचरणा अप्येवं॥ एवं च॥ न स्त्रीभ्यो दासबालेभ्यः प्रदद्यात्किंचि
दुद्धृतं॥ दानानलभते तत्तेभ्योऽर्जन्तु यदस्तु॥ इति ऋणादानप्रकरणे कात्यायनव
चने स्त्रीप्रभृतिभ्यः ऋणादाननिषेधे जीनाक्षमत्वमेव बीजं अत एवालेभ्यस्तुक्तं नत
पुत्रेभ्य इति अपरे तु भार्यापुत्रश्चेत्यादिवचने नस्पष्टमेव पित्रादीनां पुत्रार्जितधने स्वामि
त्वाबोधनात् स्पष्टस्य विधेर्नान्यैरूपसंहार इष्यते॥ इति न्यायात् पित्रादीनां तत्र स्वा
मित्वं भवति पुत्रादेरर्जनजन्यं स्वामित्वं भवति पुत्रादेरर्जनजन्यस्वामित्वं भवतीति त
दनंतरं पितुः स्वत्वं भवति स्वत्वेन हि तत्तथा पितुरपि स्वत्वं भवति पुत्रस्य स्वत्वं तु नश्यतीदम्प
सोम्भ्यंगधनमिति वचनात्तथा सति सत्यपि पत्नीस्वत्वे स्यवपितापुत्रस्वत्वयोर
निरोधात् एवं पत्नीपित्रादिनावदत्ते पत्नीः पुत्रैरेभ्य स्वत्वं स्वातंत्र्यमपि कुम्भीयं स्त्रीध
नेवचनी तत्र अन्यत्र तत्तुल्ययुक्तेः पुत्रादिवैदिककर्मानिष्पत्तिः पितृमरणोत्तरं च तद्
नेन पुत्रांतरस्यांशित्वं साधारणं समाश्रित्य यत्तु किंचिद्दाहनायुधांशोऽर्थ्यादिनाप्नोति
धनं भ्रातरस्तत्र भागिनः। तस्य भागहरा येस्ते यं शेषास्तुस्समभागिनः॥ इति व्यासवचने सा
धारणं समाश्रित्येति स्वरसात् एतद्वचनस्य पितृमरणोत्तरार्जीनइति जीवत्पितृका
लीनार्जनेप्यवलम्बन संभवात्॥ पित्रार्जिते पुत्रस्येव पुत्रार्जितपितरि स्वत्वे भवत्येव अ
दृष्टहरिस्यादिकात्यायनोक्तं विभक्ते सर्वधने स्वातंत्र्यमेव पुत्रस्य भवतापि स्वीकर्तव्य
मनुभवात्तद्वने च पुत्रपरमविभक्तपुत्रपरं वाच्यं अथवा पितृस्वत्वं जनयित्वा पुत्रस्व
त्वं नश्यति पित्रादत्तधने पुनः स्वत्वं जायते अनंतरं त्वादृशं न विमतिरेतस्य ते तथाहि
रत्नाकरे दासस्यमोक्षातेरंगेभः सादेन स्वामिनादासस्य प्रदत्तेनतं स धनेन स्वामीप्र
भुरित्युक्तं॥ एवं॥ विश्रब्धं ब्राह्मणः शूद्रात् द्रव्योपादानमाचरेत्॥ नहि तस्यास्ति यत्त

किंचित् भर्तृहार्य्यधनो हि सः॥ इति वचनं अस्वाम्यं हि भवेदेषामिति वचनं च नोपन्यस्तं मिश्रा
ऽप्येवं॥ भार्य्यायाः स्त्रीधने स्वामित्वस्य विशेषः शास्त्रेणाबोधितत्वात् इतरत्र भर्तुरेव स्वा
म्यमेवं च न स्त्री भर्तृकृतमित्यादि ऋणादानप्रकरणोक्तकात्यायनवचनस्य स्त्रीप्रभृतिभ्य ऋ
णादाननिषेधे निरूढत्वमेव बीजं परं आलस्यस्य न पितृकृतश्वरे सार्थः वचनं
चनतम्प्रदर्शनमात्रेनेन पुत्रस्यापि जीवत्पितृकस्य परिग्रहः इत्युक्तं प्राक् इत्याहुः
॥पुत्रे उत्पादनानन्[illegible]भान्यादिवत् पितुः स्वत्वं भार्य्यायां उत्पादकदानानंतरधान्या
दिवत् गवादिवच्च प्रतिगृहीतः पशुः स्वत्वं शमेऽक्रयाद्यधीनं स्वत्वं यतोऽयत् सेनार्जितं भ
वति तत्तदस्य भवतीति नियमात् पुत्राद्यर्जिते पित्रादेः स्वत्वं स्त्रीधनप्रसादलब्धादे
र्ग स्वामिन इच्छया उदासीनस्य स्वत्वानंगं पितृदत्त स्त्रीधनादिशास्त्रानिरिक्तधनेन
लक्षासामाह इति तेषामाशयः॥ अत्रेदं चिन्त्यं जीवत्पितृकविभागे ऋणस्य शोध
नेकर्यं स्यादिति चेत्॥ भागभाज एव ऋणं शोधयेयुरिति पर्य्यवसितं॥ तत्रायं विचारः
पितामहधनस्य द्व्यंशभाक् पिता पुत्रास्त्वेकैकांशभाजः एतच्च पितृकर्तृके चनि
र्विवादं पैतामहऋणे तु विवादो भवति पैतामहऋणस्य निष्कृतस्यैव पुत्रेण शोधनी
यत्वात् सकलस्य च पित्रोपातिन चायतु शिष्ठ पितृदायेभ्योऽरत्वर्णं पितृकृतं ततः॥ भ्रा
तृभिस्तु विभक्तव्यमृणी न स्यात् यथा पिता॥ इति नारदवचनेन पितृमरणोत्तरं
भ्रातृभिर्विभागे क्रियमाणे पितृऋणशोधनस्यावश्यकत्वात् जीवति पितरि तत्कृ
ते विभागे तद्ऋणशोधनस्यकृत्वा मावश्यकत्वं आयातं एवं च पितृकृतर्णस्येव पिता
महर्णस्यापि क्रमादव्याहतं प्राप्तं पुत्रैर्यौ चर्णमुद्धृतं इति ऋणादानप्रकरणोक्तना
रदवचने क्रमादिति दर्शनेन पितामहऋणमादौ पितरं भजते ततः पुत्रमिति प्रा
प्तेः फलतः पितृणत्वेन पौत्रस्यापि शोधनावश्यकत्वे पैतामहं समं देयमिति वृहस्प
तिवाक्यात् पौत्रैरेकैः कांशो निष्फलो देयः॥ अपि तु पुत्रेणांशद्वये सकलमेव
निवोढव्यं इत्यर्णमित्यत्र को वा प्रत्ययदर्शनात् विभागात् पूर्वमेव ऋणशोधना
धिकारात् तदानी च पौत्रस्य निरूढत्वे शोधनासंभवात् विभागकर्तृत्वाभावाच्च पुत्रे
णेव सकलमृणांसं शोध्य विभागकरणस्य युक्तत्वात् एवं च पित्रा विभागे क्रियमाणे
ऽतत् पितृकपौत्रांशभागदाने प्रसक्ते पितामहपितृणां मासनत्र प्रसक्तोऽशस्त्वाभा
वेनाशोधनमिति निरस्तं एवं पितुः पैतामहऋणमपि शोधनीयं नेदृशस्यादौ पिता
महेन शोधनीयत्वात्॥ यदि च तदानीं शोधनासमर्थत्वं भवति अवधिकालो वा न वृत्तं
स्तदा तु तदानीमेव पुत्रान् पौत्रान्वा स्वीकारयेत् तत्तत् स्वीकारवलेन च प्रपितामही राम:

दित्क्रमणस्यापि [illegible] शोधनमिति एवं पितामहऋणस्य कल्पास्वीकारपितृव्या
पत्रत्तुपैमहाधनं नास्ति किं तु पित्र्यमेव तदा विभागकाले भपि द्विपिता [illegible] गृही
यात् पुत्राश्चस्वल्पमेव एवं च पैतामहस्यापि ऋस्यवा ऋणस्य केन प्रकारेणांशं
कुर्य्यात् यदि च पितुरिच्छैव तदा पिता भपि द्विपधनं गृह्णीयात् ऋणं चाप्यमेवद
ति पुत्राणां पीडैव एवं पैतामहधनवत् अंशकल्पनेपि पुत्राणां पीडैव तस्मा
दिदमत्र समाधेयं पिता स्वेच्छया सकलं ऋणं संशोध्य अवशिष्टधनानुसारे
णास्वेच्छया पुत्रेभ्यो भागं दद्यात् धनोपस्यापात् ऋणस्य भपस्त्वेतु किंचिद्दनं दद्या
त्तदनुसारि ऋणं च दद्यात् परं तु विनाशार्थात् वस्तुतो चारम्भि [illegible] धना
दधिकं ऋणं अतः पुत्रेभ्यः कथं भागो देयः इति पुत्राश्च वदन्ति ऋणांशं ध
नांशं धनांशं च देहीति तदा तु तत्र पुत्राणां स्वातंत्र्यं शास्त्रे नास्ति किं तु मध्य
स्थवचस्यैव शास्त्रं विना व्यवहार आदरणीयः इत्यत्र युक्तिरेव मूलं यदि च पि
त्र्यं पैतामहं च उभयविधं सैन ऋणं च वर्त्तते तदा पित्र्यं पैतामहे वा ऋणे प
नानुसारेण भागं कुर्य्यात् तत्तत्स्थ याचद्धनं पित्र्यं तदनुसारी भंदद्यात् तत्र पैता
महधनवद्य्यवस्थाद्रस्पलं पल्लवितेन ननु जीवत् पितृक विभागस्य कथं दा
यभागत्वमिति चेन्न भज्यमानो दायभागइति पक्षे तु जीवत् पितृद्रव्यस्य भा
गस्य संबन्धादेव लत्वात् पूर्वस्वामिस्वत्वोपरमे तत्संबन्धाधीनस्वत्व
द्रव्यस्य एव दायपदार्थत्वात् विभागविषयत्वेन च तत्यात्वरूपमपि रूढं दायस्य
विभागो दायभागइति मतेतु विभागात् प्रिये चदायत्वस्यनिष्पादितत्वात्
दायोऽत्र निर्वस्यं कर्म्म घटं करोतीतिवत् दायस्य भजनं स्वामित्वं ग्दायभागत्वं
इति मतेतु विभागोत्तरं पुत्रादेः स्वामित्वसिद्धेः तद्धनस्य स्वामित्वं तन्निरूपि
तं स्वामित्वरूपे दायभाग स्यार्थतो निरूपि इति कृतं पल्लवितेन इति जीव
त्पितृकभागः परिच्छेदातीताखिलविधारंगपरिशीलनविमलीकृतपा
लधिकुलप्रसूतजाह्नवीसमलंकृतत्रिवेणीनिलयश्रीरुद्रतर्कवागीश
भट्टाचार्य्यात्मजश्रीजगन्नाथतर्कपंचाननभट्टाचार्य्यविरचितविवादभंगा
र्णवे दायभागद्वीपे द्वितीपं अस्यवदातं मौक्तिकरत्नः उपरते प्रत्न [illegible] ज्यां
गतेवापितरि पुत्राः सहवसेयुः अथवापि त्र्यधनं विभजेयुः एतत्कल्पद्वयंमन
क्तं तथा एवं सहवसेयुर्वा पृथग्वा धर्मकाम्यया पृथग्विवर्द्धते धर्म्मस्तस्माद्धु
र्म्या पृथक्क्रिया इति पूर्वोक्तप्रकारेण ज्येष्ठपुत्र एव पितृवदन्यान् सर्वा
न पालयेत् इति सर्वे सहवसेयु अथवा पृथग्वसेयुः सच पृथग्वासो धर्म्मार्थ

एवंयत्नोऽसाधारणधनेनैवनित्यनैमित्तिकादिक्रियाकलापानांकृतत्वात्तत
श्चान्योधर्म्मोऽसाधारणएवनतत्रान्योंऽशीअतःपृथग्वासेधर्म्मोनतुकौटि
ल्यमात्रप्रयुक्तःनतुसहवासिनोऽपिकिंनपृथक्पृथक्धर्म्माचरंतीतिइतिचे
न्नएकस्यैवधर्म्मस्यासाधारणधनसाध्येनसाधितत्वेनसकृत्कृतेकृतःशास्त्रार्थ
इतिन्यायेनसिद्धत्वात्पुनःपुनरप्रवृत्तेःसकृदेवाचरणव्यवहारात्ज ग
पुत्राणांविभागंविनापृथक्राज्याभिषेकाभावेनराज्यकर्तृराजसूयादा
दावधिकाराभावाच्चकाम्यस्थानानिधर्म्मेतुपुनःपुनःकरणेदैवाद्विभागे
पिधर्मवृद्धिःस्यादेवनित्यनैमित्तिकेतुसकृत्कृतेकृतःशा।प्रागुक्तत्वात्तु
त्रापिपुत्रजन्मनिमित्तकैःपुत्रेष्ट्यादेःपृथक्करणात्आनुसंगिकधर्म
वृद्धिरविभागेऽपिद्विवर्द्धतेइतिध्येयंसोऽपिविभागःपरस्परप्रीत्यैवकर्त्तव्यो
हिविशेषोऽप्रीतिनिराकरणात्यथाअन्योन्यभेदाभ्रातृणांसुहृदांवाच
लांतकभवत्यानन्तरत्वेद्विषतांनात्रसंशयःइतिवचनात्केचित्तुसम्बो
धनंइतिध्येयंअत्रापितुरूर्द्ध्वगमनोत्तरंभ्रातृभिर्विभागेकर्त्तव्येसातुरूपरमो
ऽपिअपेक्षणीयःयथाव्यासःभ्रातृणांजीवतोःपित्रोःसहैववासोविधीय
तेतदभावेविभक्तानांधर्म्मस्तेषांविवर्द्धतेनचमातृपितृभयजीवनेस
हवासनियमेनएकतरस्यपितुर्मरणेविभागप्राप्तिरितिचेन्नद्वन्द्वात्प
रःसंवीवायश्रुयतेसरूपतेप्रत्येकमभिसम्बंधमितिन्यायात्द्वन्द्वस्था
नीयेकशेषसिद्धपित्रोरितिपदेनउपस्थितयोर्मातापित्रोःप्रत्येकंजीव
नसम्बंधेनमातृजीवनेपितृजीवनेवेत्यर्थकरणात्अन्यथामातुरेव
मरणेऽपिविभागोऽनेनवचनेनबोधितःस्यात्विभजेरन्सुताःपित्रोरू
र्द्ध्वमृक्थमृणंसमंइतियाज्ञवल्क्यवचनेउभयोरूर्द्ध्वगमनेविभागइत्ये
वार्थःकर्त्तव्यःव्यासवचनैकवाक्यत्वान्नचैवंपरीक्षंउभयजीवनेसहवास
नियमःएकतरमरणेविभागइतिवाच्यंशंखेनएकतरजीवनएवविभागस्य
स्पष्टमभिधानात्यथाक्रमस्यमलंहिकुटुम्बमस्वतंत्राःपितृमंतोमातृरप्ये
वमवस्थिताप्याइतिबृहस्पतिःपित्रोरभावेभ्रातृणांविभागःप्रदर्शितःपि
त्रभावेमात्रभावेचइत्यर्थःतदभावेइतिव्यासवचनेऽप्ययमेवार्थःननुजीव
त्पितरिवहनेऽस्वामित्वात्तद्धनेविभागोमास्तुमातृजीवनेपित्र्यधनविभागोभा
वःकथमितिचेत्तत्रकेचित्जीमूतवाहनमतमवलम्ब्यमातृजीवनेऽपिपित्र्यधन ४१
विभागोनधर्म्यइतिप्राहुस्तथाचअष्टम्यादौमांसभक्षणनिषेधवत्मातृजीवने

श्लोकः २४

पित्र्यधनविभागनिमित्तस्तथा च निषेधातिक्रमजन्यो ऽधर्म्मो भवतीति भाव
अथवा न धर्म्यः न पृथक्धर्म्यः न पृथक्धर्म्मवृद्धिः मातृजीवने ऽपि धर्म्मवृद्धि प
र्न भवतीति पर्य्युदासाऽस्मादेव वचनादवगम्यते तथा च वचनार्थः अस्वतंत्राः
विभागाद्यनधिकारिणः सा तु पि अवस्थिता याऽस्मन्न्येअस्वतंत्रा इति पूर्वो
क्तेऽन्तःसंबध्यते स विभागो धर्मार्थोऽस्ति इत्याहुः आचार्यास्तु सिद्धान्ते अन्यथा च मातृ
जीवने पृथक्कृते ऽपि धर्म्मः सर्वेषामेशित्वं भवतीति भावः परं तु पितृजीव
ने तु रिच्छया विभागो यथा तथाऽसा दृष्टिकत्पायेन मातृजीवने मातुरिच्छ
या विभागः कर्त्तव्यः किंतु तत्र धनपुत्रयोरेव स्वामित्वात् पितुर्द्धीशित्वं अत्र
तु पुत्रमात्रस्वामिना मातुरेकांशएव अतएव पितृर्ज्जितेर्द्धांशेनाऽपि धिकः
पितुः मातृर्जितेन तु शास्त्राभावात् न विभागः वा[..]ल आपाड्शगहृषीनः पौगंड
श्वपि कल्प्यंते परतो व्यवहारज्ञः स्वतंत्रः पितरा वृते इति कात्यायनवचनेन च
मातरि जीवत्सां पुत्राणामस्वातंत्र्यं बोधितं तथा च पितुरुपरमे मातुरुपरमो मा
तुरिच्छा च इति कालद्वयं इति फलितं पितरि जीवति तु पितुरेव सर्वस्वामित्वा
तुरिच्छयैव विभागः न तत्र मातुरप्यपेक्षा येतु स्वेच्छया पिता मरुद्धनवि
भागं वरं निते षामपि पुत्रेच्छाप्रवर्त्तिन श्चपि तुरिच्छयैव विभागः इ[..]स्याश
यः पितुरेव विभागकर्तृत्वात् नत्व कामे पितरि अजन्य विभागः इति हारीतव
चनात् नतदानी पुत्राणां अन्यनिरपेक्षस्वि क्रियानिष्पादनसमर्त्तरूपस्वतंत्रः
त्वाभावाच्च अतएव न मातरु मत्यपेक्षा परिवर्त्स्यस्योमे ध्रुवं धनं इति व
चनात् मातुः स्वत्वसिद्धेः पितुमरणे न पितृस्वत्वे नष्टेः पितृमातृस्वत्वनाशे प्रमा
णाभावात् तन्निष्टिस्वत्वतथा च मातृसाधारण्यं नतदनुमतिं विना न विभजेयु
रिति पर्य्यवसितार्थः न च मातृवत्स्मानुरनिच्छयापि एकस्येव स्वामिनो अनु
मत्या विभागो भवतीति वाच्यं सानुधनपुत्रोभयस्वामित्वात् तस्मात् तथा धनमा
त्रस्वामित्वात् मातुरेवाधि[..]क्यात् ज्येष्ठभ्रातुस्तु महद्गुरुत्वाभावात् नैतादृशः
शित्वमिति किंतु ज्येष्ठभ्रातृ घीडने नैव भागं कुर्वंति निष्य व्यवहारः ज्येष्ठांशदानं वा
तस्य वर्द्धनं ननु अस्वातंत्र्यं सि[..] ज्येष्ठेतु ज्येष्ठं गुणवयः कृतं इत्तिस्मात् पिता
महाभद्राचाप्यीरिघ जात्सम्मतिनः ज्येष्ठे विद्यमाने कनिष्ठेषु अस्वातंत्र्यमिस्प
र्धः एवं च ज्येष्ठे सति तदिच्छां विना विभागो माभूदितिनिवेंतद्वचनं ज्येष्ठ एव तु
गृह्णीयात् पित्र्यं धनमशेषतः शेषास्तमुपजीवेयुर्यथैव पितरं तथा इति मनु
वचनोपदिष्टपितृस्थानपातिनि ज्येष्ठे सत्ते इतरेषां दानादिनिषेधपरमितिवा

चंतावन्मात्रार्थे प्रमाणाभावात् इति चेन्न विभजेयाद्यः ततः सर्वान् इति
नारदवचनात् अनिच्छतां विभागव्यंजनेन एवं सहवसेयुर्वा पृथग्वा
धर्मकाम्यया इति मनुवचने बहुवचनेन स्वरसेन सर्वेषां सहवासपृथ
ग्वासकर्तृत्वबोधनेन च कनिष्ठभ्रातृषु ज्येष्ठत्वास्वामित्वाभावेन अग
त्या असत्वात्तं त्वं हीति वचनस्य कुटुम्बभरणाभावसहज्येष्ठविषयकल्पः
नात् तत्र गुणकृतं वयःकृतं वा ज्येष्ठत्वमित्यत्र यबोधः तेन भ्रातृत्वाशक्तः
कनिष्ठो वा इत्यनेन न विरोधः इत्याकूलन्न पितामहचरणानां अन्येषां च
वृद्धानां ग्रन्थकाराणां मतं यतिधने ऽर्जनाभावात् पत्नीस्वत्त्वानंगीकारा
त् फलं न स्तु न विशेषे पितामह्या जीवन्त्यां तु पौत्रैर्विभागो न कर्त्तव्य इत्यत्र
च प्रमाणं शास्त्रं नास्ति केचित्तु मातृधने मातरि जीवन्त्यां पुत्राणामस्वातंत्र्यं
न तु पितृधने अयमभिसन्धिः जीवति पितरि तदर्जिते यथा पुत्राणां स्वा
म्यं अस्वातंत्र्यं च तथा जीवन्त्यां मातरि तदर्जिते पितृभर्योरेव पुत्रत्वादिस्या
दुरित्येवितानेश्वरः मनुस्तत्रापि इदानीं नाद्रियन्ते इत्यलं विस्तरेण सोद्धा
राद्युद्धारभेदात् द्विप्रकारविभागमाह बृहस्पतिः द्विप्रकारो विभागस्तु दा
यादानां प्रकीर्तितः वयोज्येष्ठक्रमेणैकः परस्तदंशकल्पना इति तत्
प्रपंच प्रागेव दर्शितः परं तु वयोज्येष्ठक्रमेण सफलक्षणं तेन गुणज्ये
ष्ठस्यापि अंशाधिक्यं प्राप्तं तथा बृहस्पति पितृद्रव्यस्य हराः पुत्राः सर्व
एव यथाम्नाताः विद्याकर्मयुतस्तेषामधिकं लब्धुमर्हति विद्याविज्ञान
शौर्यार्थज्ञानदानक्रियासु च यस्येह प्रथिता कीर्तिः पितरस्तेन पुत्रिणः
विद्यावेदादिशास्त्राभ्यासः अयं च ब्राह्मणादीनां त्रयाणां वर्णानां विज्ञा
नं शिल्पार्थशास्त्रज्ञानं एतच्च चतुर्णामिव वर्णानां वर्तिसंकराणां च यथा
योग्यं शौर्यं पराक्रमः अयं च क्षत्रियस्य अर्थो धनं इदं वैश्यस्य तस्याभाव
रक्षणाच्च स्यात्स्योः तयोर्धर्मनिष्ठायाः तेः ज्ञानं परमेश्वरज्ञानं इदं च सर्वे
षामेव भागपे वशादपद्यते दानं प्रसिद्धं क्रियासु एषानुष्ठानं क्रियेष्विति पाठे
कृषिः वाणिज्यार्थं द्रव्यक्रयः विक्रयस्याप्युपलक्षकः अयं च वैश्यस्य चका
रादपरेषां स्वस्वजात्युक्तधर्माणां परिग्रहः पितरस्तेन पुत्रिण इति तस्या च
तस्यातिशयभागदानं युक्तमिति भावः विद्याविज्ञानशौर्यार्थ इत्यत्र अर्थो
पन्यासः प्रासंगिकः अथवा अर्थोपार्जनसमर्थ अतिशयभागदानार्थ
इति बोध्यं पुत्रिण इति अत्र प्रसंसायां मातृपमानार्थ कइन्प्रशस्यपुत्र ४२

श्लोकः २७

सम्बन्धिन इत्यर्थः पुत्राणां विभागकरणे मात्रे पितामहे च पुत्रपौत्रतु
ल्योऽंशो देयस्तदुक्तं भाष्यकृता इन्द्राभावो वस्य तेस्मात्ती ः स्यु इवमा
ष्पीस्पृष्टोस्य नान्या भार्यापरिशिष्यते तस्यां जाताः समांशाः स्युर्यदि पुत्र
शतं भवेत् इति मनुवचनं मत्रमूलं तत्रे दं चिन्त्यं उद्धारस्य यदि अंशद्यट
कत्वात् अंशवैशस्य प्रयोजकत्वा भवति तदा भ्रातॄणामविभक्तानां यद्यु
त्थानं भवेत् सह न तत्र भागं विषमं पिता दद्यात् कथंचन इति म
नुवचनव्याख्याने भकत्वाद्यनुबन्धात् विषमविभागदानं निषिद्धं न तु
द्धारः तस्य भागलाभावादिति जीमूतवाहनाद्युक्तं विरुध्येत इति पितामहस्व
रणास्तु शूद्रस्य उद्धाराभावात् वयोज्येष्ठप्रयुक्तउद्धाराभाव एव न तु गुण
ज्येष्ठप्रयुक्तउद्धाराभाव इत्याहुः एतद्वचनव्याख्याव्याख्यास्यते च तुर्वर्णी
पुत्राविभागप्रकरणे यस्तु भ्रातॄणां मध्ये आलस्यात् स्त्री कुटुम्बभरणोपयु
क्तव्यापारं न करोति किं वा अतिसमत्वात् पितृधनं विना एव कुटुम्बभरणं
करोति तस्य प्रकारः प्रागुक्तः कात्यायन अविभक्ते मृते पुत्रे तत्सुतं रिक्थ
भागिनं कुर्वीत जीवनं येन लब्धं नैव पितामहात् लभेतांशं स पित्र्यं तु
पितृव्यात्तस्य वा सुतात् स एवांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेत् ए
तस्यार्थः पूर्वमेवोक्तः अत्र पर्वस्थितो कः पितृकृतविभागपरः द्वितीयश्लो
कस्त्व पितृव्यात् मृतपितृकभ्रातुष्पुत्रो भागं लभेत इत्यर्थः जीवनं येन ल
५ वैनेव पितामहादित्यस्याप्यनुसंगः कर्त्तव्यः तथा च यदि पूर्वं जीवता पिता
महेन विभक्ताः पौत्रास्तिष्ठन्ति ततः पितृव्याः पित्रा संसृष्टाः तदा तेषां पुन
र्विभागकरणे पौत्रा अंशं न लभेरन् परं तु पितामहसंबंधि यत् धनं तद्विभागं
पौत्रा प्राप्तुमर्हन्ति जीवनमित्यादि किं तु एकधने संसृष्टे भागोत्तरभागनिषेध
तु भावाद एवमेव वक्तव्यं स एवांशस्तु इत्यादि एतद्विषय एव याज्ञवल्क्याः अ
नेकपितृकाणां तु पितृतो भागकल्पना इति लभेतत्तत्सुतो वापीति एत
द्विषय एव अविभक्तविभक्तानां कन्यानां वसतां सह भूयो दायविभागः स्या
दा चतुर्थादिति स्थितिः अत्र रत्नाकरः अयमर्थः अविभक्तानां विभक्तानामे
व वा सह च सह वसतां संसृष्टानां पुनर्विभागो भ्रातृतत्सुततत्सुतपर्य
न्तमेव न तत्सुता चतुर्थी निवर्त्तते इति अयमाशयः चतुर्थादि धनस्वाम्योपस
पा अभिविधावा तथा च पितृमरणोत्तरं भ्रातॄणां सह वासे तदुत्तरं वि
भागकाले भ्राता अंशं लभेत जीवत्येव यदि तथा भ्रातुर्मरणे भ्रातुष्पुत्रस्तदानी

श्लोक: २५

मेवतस्यापिमरणेतत्पुत्रस्तदानिमेवतस्यापिमरणेतत्पुत्रश्चतुर्थ
वास्मिंस्तत्वादियमविभागेवीतिःएतत्कल्पभूस्यइतिनसम्बध्यते एवं
भ्रातरौसंसृष्टानौजातौअनंतरंतत्पुत्रपौत्रप्रपौत्रा मृतःततःतत्र
तत्प्रपौत्रपुत्रोनऽन्येतरलाकरेभ्रातत्तस्पुत्रेत्यत्रभ्रातपुत्रंसंसृष्टि
पुत्रस्यपितृत्वपुत्रपरं रत्नाकरएवतावत्कुल्याःसपिण्डाःस्युःपि
ण्डभेदस्त्वनंतरं सममिच्छंतिपिण्डानांदायार्थस्यविभाजनं एतच्चप
दायस्तविषयोविभागंविना अभुज्यमानोऽपरेणतद्देशस्थितेनैवभुज्य
मानस्तदितिलिखनात् तथाहिविभक्ताःभ्रातरःकिंचिद्धनमवि
भक्तंएकेनपुत्रादिपरम्परयाभुज्यतेअपरेणतत्पुत्रादिभिश्चनभुज्य
तेततःकतिपयदिवसोत्तरंतस्यविभागप्रार्थनेसतिव्यवस्थापकमि
दंवचनंतथाचभ्रातात्तत्पुत्रेणतत्पुत्रेणतत्पुत्रेणतत्पुत्रेणचप्रा
र्थनेविभागोभवतितत्पुत्रेणप्रार्थनेतुनविभागःकिंतुभोगेनतत्रस्वत
नाशात्भोक्तुरेवस्वत्वंभवतिअतएव अनिरत्तेसपिण्डत्वेसकुल्यानां
नसिद्ध्यति इतिवचनंसंगच्छते अत्रचसपिण्डंधनिनएवतथाचध
निपंचमेननलभ्यतेइतिभावःएतच्चएकदेशस्थत्वेविदेशस्थत्वेसप्त
मपुरुषोत्तभोगेनस्वत्वनाशात्तदृश्यतेकेचित्तुविभक्तानांजातविभाना
सहवसतांएकदेशवासिनांभूयःपुनर्दायविभागःसंसृष्टितदेशांतरं
दायविभागःविभागकालेऽवशिष्टएकदायारभुज्यमानदायविभागश्च
चतुर्थपर्यंतभवतिसहवासाभावेतुसप्तमपुरुषपर्यंतमितिवोऽस्ते
एतदेवोपसंहरतितावत्कुल्याइत्यादितावत्चतुर्थपुरुषपर्यंतकुल्याः
कुलसंभवाःसपिण्डास्युःपरस्परंपिण्डसम्बंधाःदानभोजनान्यतरसंबं
धेनअनंतरंचतुर्थात्पिण्डभेदःपिंडसम्बंधविच्छेदःतथाचकिमायातंत
दाहसममिच्छन्तिइतिपिण्डानांसंबंधरहितंपिण्डसम्बन्धेसत्येवेतिया
वत्तदायार्थस्यदायरूपस्यधनस्यविभाजनंपिण्डसम्बंधसद्भावएव
दायविभागइतिफलितार्थकथनमात्रमुपसंहारफलंवेदितव्यंनतुपंचम
पुरुषेणतद्दायोनविभजनीयो[illegible]भोक्तुरेवसत्वादि
तिनिरर्थकमुक्तंपंचमपुरुषस्यतत्रानधिकारात्प्रपौत्रपर्यंतस्यैवदाया
धिकारकथनात्नचपत्न्यादौधनिनानाशस्तत्तत्पुत्रस्य[illegible]तिरीत्याक्र
ममस्युवण्यलेएवेतद्वचनमितिवाच्यंतथासति अविभक्तद्रव्यस्यनिरर्थ ४२

श्लोकाः २४

कत्वायत्तेस्ययाहि अविभक्तस्य लोक्रमेण पुरुषाणां विनाशे शत
पुरुषपर्य्यन्तमपि विभागः संभवनहि संभयवणिजामपि संततीनांप
चमादीनां न विभागः इति चेत् विभक्तानामिति यदुक्तं तत् क्रमस्मुस्यले
अविभक्तानां तु स्मुतक्रमनस्मुस्यले अथ चानेदं च वनं संसृष्टि परं संसृष्टि
परं संसृष्टि संततीनां सन्संगमेषु नदगारमीहार्थी भवति इति बोधाय
नवचनादेव तत्सिद्धेः अविभक्तत्वात्तत्सिद्धेश्च इति तथा च विभा
गकल्पनेनैव सत्वकल्पनसिद्धिः यथाविभक्तस्य प्रपौत्रेणापि प्रपितामह
भ्रातृनोविभोगोन्यास्यः विभक्तस्य यत् किंचित् साधारणं द्रव्यं तत् प्रपौ
त्रेण विभज्यमित्यर्थः इति कात्यायनवचनेनैकवाक्यत्वमित्याहुः अपरे
तु अविभक्तानां विभक्तानां चासह वसतां संसृष्टिनामिति यावत् धनि प्रपौ
त्रपर्य्यन्तं दायभजनं भवतीत्यर्थः यदा उत्पत्तिवधिकं अविभक्तानां पुनर्वि
भागानन्तरं सहवसनां संसृष्टिनामिति यावत् एवं च संभयवणिजां संस
ष्टिनामिति यावत् एवं च संभयवणिजां संसृष्टित्वनिराकरणं तथा च भ्रा
त्रादीनामेव संसृष्टित्वं फलितं तेषां धनि प्रपौत्रपर्य्यन्तं पुनर्दायग्रहणं
एतद्वचनार्थो व्यक्ती भविष्यति उपदिष्टा त्रावत्तकुल्या इति वचनं च सामा
न्यतः प्रपौत्रस्य दायग्राहित्वबोधकमित्याहुः अविभक्ता इत्यादि कात्या
यनवचने पितृकृतविभागकरणे केनापि न लिखितं किंतु मृते पुत्रे इति पा
ठकल्पे पुत्रे कस्मादित्याकांक्षायां कुर्वीत इति क्रियायाः कर्तुरेवोपस्थितिः यथा
मातृभक्त्या प्रवर्त्तित इत्यादौ एवं च विभागकर्त्तुः पुत्रमतेन तत्पुत्रस्याकथनात्
कथनेन न पितृकृतविभागविषयकत्वं सुतरामायातं अत एव लभेतांशमित्या
देर्न वैयर्थ्यं भ्रातृभागनाशार्थकत्वात् निजे प्रेते इति मिश्राः सम्मतपादस्य नि
जे भ्रातरि निशेषः इति मिश्रव्याख्याने च पितृकृतविभागविषयकत्वं नायाति
निजे प्रोषिते पुत्रः कुटुम्बं विभयादित्यत्र यथा निजे कुटुम्बे मरणाधिकारिणीत्य
र्थः क्रियते तथा अत्र निजेऽत्र क्याग्रहणयोग्य इत्यर्थः करणात् पितृकृतविभा
गविषयकत्वं सुतरामायातं अत एव लभेतांशमित्यादेर्न वैयर्थ्यं संभवः किं तु
अविभक्तत्वं विभागाभाववत्त्वमेव भ्रातृभागतात्पर्यकत्वात् निर्वाच्यं परं तु ए
तद्वचनं धनिनि विद्यमाने धनिपुत्रमरणावत् पुत्रयोर्विद्यमानयोस्तत्पुत्रम
रणे तेषु विद्यमानेषु तत्पुत्रमरणे वेदितव्यमिति निसंस्सेय वशिष्ठः अयश्चानृणां
दायभागो व्याख्यानप्रस्तावात् तासामापुत्रलाभात् भ्रातृभागे स्त्रीणामनंशित्वात्

वचनमिदं निरर्थकं भवतीति व्याचष्टे चण्डेश्वरः स्त्रियोत्र भ्रातृजायाता
यदि शंकितपुत्रास्तदा तासामपि भागो दातव्यः पुत्रा तु त्वन्नोसभागो भ्रा
तॄणां तैरेव तासां भरणमित्यर्थः इति तथा च पुत्रमुद्दिश्यैव स्त्रीणां भाग
दानमिति भावः अपुत्रस्य भार्य्यासिद्धेः पित्राभ्रातर एवदंशभागिनः तद्भार्य्या
पोषणकारिणश्चेति स्मृतमच गतं एवं च पत्नी दुहितरश्चैव इत्यादि वच
नेनापात्ततो विवादः प्रतिमावितत्तत्समा भाजीमूतवाहनादिभिः कृता
सवर्णपत्नी अपुत्रधनाधिकारिणी भिन्नवर्णा तु भर्त्तव्या इति अन्ये तु अ
न्यथा समादधते सर्वमपुत्रधनाधिकारे विवेचयिष्यते अत्रेदमव
धेयं शंकितपुत्रापि विमात्रेपि भागो देयस्तुल्यसुतेत्व वचनार्थः स इति जीमू
तवाहनादिमते अवरुद्धा येत भ्रातृभागे विमातुरप्यंशभागितां वदन्ति
तेषां मते अपुत्रलाभादित्यस्यैवैयर्थ्यापत्तिः आत्राच्यते भ्रातॄणां भाग
स्तु आपुत्रलाभात् पुत्रानुत्पत्तौ तु समभागो भ्रातृभिरेव ग्रहीतव्यः विभा
तुरंशाश्चवदनौत्तरोपस्थितया पुत्रानुत्पत्तावपि स्पृहणीयइध्येयं अ
परे तु एतद्वचनं क्षेत्रजपुत्राभिप्रायकं वदन्ति तदग्रेतन प्रकरणस्फु
टी भविष्यति अयं च विभागः पितॄनशोधनाद्यनंतरमेव कर्त्तव्यः यत्तस
र्वं पितृदायेभ्यो दत्वर्णं पैतृकं ततः भ्रातृभिस्तद्विभक्तव्यमृणी न स्याद्यथा पि
ता इति वचनात् पितरस्तेभ्यः पित्रा दातुं प्रतिश्रुतेभ्य इति स्मार्त्तोरस्यः पि
तामहऋणदानं तु पितामहधनविभागात् पूर्वं यदि तु पितृधनं नास्ति स
र्वमेव पैतामहधनं तथा हि पैतामहधनस्यापि पितृधनत्वात्तदृणं संशोध्य
र विभागः कर्त्तव्यः यदि तु पैतामहधनं नास्ति तथापि पैतामहमृणं शोधनीः
यं तच्च विभागात् पूर्वमेव कर्त्तव्यं अन्यथा प्रक्रियागौरवं स्यात् वस्तुतस्तु पै
तामहमप्यृणं पितृऋणमेव पैतामहामृणं आरोपित रंभजन्ते ततः पुत्रमिति प्रा
गुक्तत्वात् प्रपितामहऋणं तु अकामेन प्रपौत्रेण न शोधनीयं तस्य ऋणस्य
दि प्रपौत्रोगह्न तितर्हं तु शोधनीयमेव नन्वत्र ऋणस्य ग्राहित्वं कीदृशं यत्र
बीजिपुरुषस्य पुत्रपौत्रमरणान्तरं नाशस्तत्र तदृणस्य ग्राही प्रपौत्रस्तत्रैव
अप्यवायस्य बीजिपुरुषस्य मरणोत्तरं तत्पुत्रमाप्याति ऋणस्यं नेतत्तन्मर
णे पौत्रं तन्मरणे प्रपौत्रं इत्यत्रापि अत्रोच्यते बी जिपुरुषस्य तत्पुत्रपौत्रक
मेण पञ्च प्रपौत्रमागतधनं तत्र प्रपौत्रो नाप्रपितामहऋणस्य ग्राही परं तु रव ५४
अन्यस्य केनचित्तपित्रे दत्तधनस्य पितृमरणोत्तरं ग्रहणेपि दातुऋणस्य ग्राहि

त्वापत्तिः अथैवं पुत्रासेवयेनं केनचिद्दत्तं तस्यापि कथं स पुत्र ऋणस्यग्राहीणस्या
दिति दानात्तिष्ठतिरेणात्तरस्यग्राहित्वेन ग्रग्रही तत्पुत्रस्येति चेत्तत्वा तस्य
धसम्बंधाधीन ऋणस्यग्राहित्वस्य विवरणे पितान्न प्रपितामहऋणस्यग्राहि
त्वसंभवः स्वपितृपुत्रत्वसम्बन्धेनैव ऋणस्यग्राहित्वात्तत्तथा च पत्न्सम्बन्धेनयो
पस्य ऋणस्यं गृह्णातीति स तस्यैव ऋणस्य ग्राहीति फलितार्थः अथैवमपि अपुत्र
भ्रातुष्पुत्रपर्यन्तहीनस्य क्रमागतधनं भ्रातुः पुत्रः स्वप्रपितामहसम्बन्धेन गृ
ह्णातीति स पितामहधनर्णांशोपन्निति चेत्तनायं प्रपितामहसम्बंधमात्रेण
धनं गृह्णातीति परं तु धनिपितृप्रपौत्रविधयेतिन दोषइत्यलमतिसूक्ष्मावलोकि
तेन नच तद्दणस्य पुत्रे पौत्रे ऽपि क्रमेण प्राप्तिर्वा तत्तदृणं पित्र्यं पैतामहं चेति वा
च्यं पित्र्यधनेन पैतामहऋणस्यापि शोधनार्थमेव क्रमप्राप्तिकथनादन्यथापै
तामहऋणस्यापि सवृद्धिकस्य शोधनापत्तेः नन्वत्तथा सति पैतामहसमदेय
मित्यस्य वैयर्थ्यापत्तिरिति वाच्यं मृतपुत्रो मरणोत्तरं कृतं ऋणं अनंतरं पिताम
हे मृते तद्दणस्य पुत्रे संक्रान्त्यसंभवस्तदानीं पुत्रस्याविद्यमानत्वात्तेन समदेयं
मित्यस्यार्थकत्वान्न चेष्टापत्तिरनभावविरोधात् तस्मात्पित्र्यं पैतामहमित्य
नेन पितामहसम्बन्धि इत्यव बोध्यते स च साक्षात्धनिष्यादित्तत्वस्य प्रपितामह
स्य पितामहादौ क्रमप्राप्तावपि पितामहादिनिष्पादितत्वाभावान्न दोषः इति
ध्येयं ऋणी न स्यात् इत्यनेन नाशङ्को विभज्य शोधनीयमित्युक्तमणीस्याने सौ
कर्तव्यमिति स्मात्तीदेयः तत्र च स्वीकारः मध्येन तद्दणांशो धनी यमित्याकांक्षा
न तथा सति पितुर्ऋणित्वाभावात्कथनेन ऋणी न स्यात् यथा पिता इत्यस्यानु
पपत्तिः तस्मात्पितुर्यद्दणं शतसुवर्णात्मकं तत्र पंचविंशतिः सुवर्णमम ऋ
णं इति भागहारक्रमेण स्वीकर्तव्यं नन्वेवं शतिपरमवृद्धिप्राप्ते पितृदणे पुत्रेण
पुनर्वृद्धिदानापत्तिः वृद्धेः स्वीकारे शास्त्रीकायावृद्धैर्वीरपितुमरणकालत्वात्तन
च सुवर्णस्पर्शिनाभावेन नप्रकृतऋणत्वेनानो वृद्धिदानं इति वाच्यं तथासे
ति हि मूल्यणे वृद्धिदानं नस्यात् इति ऋणविक्रयवत्क्रमणस्यैव ग्रहणात्तकुसु
तस्तु देकस्यैव ऋणं नातः पुनर्वृद्ध्यापत्तिः ऋणविक्रेय पर्यावेश्वादपरिशोधनेक
तज्जातीयपुरुषवर्णीणां शोधनं जपायं भवति नतु विक्रेतृशोधनज्जातं एवं शो
धनसमयेवर्णक्रमस्य तीयत्वे कन्यादत्तवर्णस्यैव धत्तीमनानन्तु विक्रेतृपु
रुषवर्णस्य तत्रापि दैवात्परिशोधने पुत्रस्यैव न नरकं भवति न तु पितुः
इति एवं च तेनापरिशोधनेन तत्पौत्रेणापि शोधनीयं तत्पितामहऋणत्वात्

४५ यत्र त्वेवं क्रमेण संक्रमणं नास्ति तत्र तु पुत्रस्य पौत्रेण न शेषवनीयं अका
मत्त इति विभावनीयं अत्रेदमवधेयं यस्तु पितृश्राद्धविमुखः सन् भागभागीपि
त्वद्दिष्टपतित्वतः परादइत्यादिवक्ष्यमाणवचनात् एवं यदि पितृश्राद्धार्थमेषा भूमिः
स्थापिता इत्यादिप्रतिज्ञा संघैरेकवाक्यतया कृता तदा कथंचित्जीवनधारणे
स्वाभूमिर्न विभज्यते इत्स यं व्यवहारः कुत्रचिद्देशे वर्त्तते कात्यायनः दृश्यमानं
विभज्येत गृहक्षेत्रं चतुष्पदं गूढद्रव्याभिशंकायां प्रत्ययस्तत्र कीर्तितः प्रत्ययो
दिव्यं इति स्मार्त्ताः बृहस्पतिः गेहोपस्करवाह्यास्त्रदोह्याभरणकर्मिणः दृश्य
माना विभज्यंते कोषं गूढे ब्रवीन्मनुः गेहोपस्करउदूखलादिकर्मिणो दासा
द्यः वाह्या वल्लीवर्द्दाद्यः कोषो दिव्यविशेषः इति स्मार्त्ताः उग्रदेवताचरणो
दकस्पर्शः कोषः इत्याभियुक्ताः अधिकं द्रव्यप्रकरणे ऽनुसन्धेयं पित्र्ये स्वतुर
स्तो बृहस्पतिः तदभावे तु जननीतनयांशसमांशिनि समांशमातरस्त्व
पांतुरीयांशा च कन्यका विष्णु मातरः पुत्रभागानुसारविभागहारिण्यो ऽनूढा
श्च दुहितरः अत्र बृहस्पत्येकवाक्यत्वात् अनूढा दुहितरः अत्र हेतुस्स्यैक
वाक्यत्वात् अनूढा दुहितरः स्वभ्रातृभागानुसारेण तुरीयभागहारिण्यः
स्वाभ्रातृभागस्य पादहारिण्य इति यावत् इति रत्नाकरमतं यस्याश्च भ्राता ना
स्ति तस्या अपि स्वरूपयोग्यतामादाय भागो दातव्य इति फलितार्थः तत्र भ्राता
स्वजातीयपुत्रस्य यो भागस्तच्चतुर्थांशो यो भवति तं परिकल्प्य कन्यायै सं
स्कारार्थं दद्यादित्यर्थो विवक्षित इति समुदायार्थं चतुर्थमंशं दद्युरित्यर्थो भवति
अत्र चानेकवाक्यगतचतुर्थांशदर्शिना चतुर्थांशस्य वदानप्रयोजनं तु सं
स्कारः कल्पतरुमिताक्षराप्रकाशाः अथैवं इति चण्डेश्वरः तथा च ब्रा
ह्मणी पुत्राः भ्राता च तुर्भागभाक् तद्गामिनी तच्चतुर्थांशभागभागिनी एक
भागभागिनी इत्यर्थः क्षत्रिया पुत्री तु पादोन भागभागिनी त्यादि क्रमेणोत्य
र्थः तथा च समुदाये त्यादि सर्वेषां भ्रातृणां भागाद्धनग्रहणेन चतुर्थांशप
रणमिति भावः अत्रेत्यादि चण्डेश्वरपंक्तिः तथा च भ्रातवत् भागानीभ्यो
पि भागं दद्यादिति न नियमः परं तच्चतुर्थांशहत्यात्ता सो संस्कारकर्त्तव्यः अत
एव भागिनी चतुर्थांशग्रहीत्वा किंचिद्धनेन संस्कारं कृत्वा अन्यत्तु स्वरक्षेभ
स्यापयेत् भ्रातरस्तु अल्पस्य धनेनैव यथा कथंचित् संस्कारं न कुर्युः स्थितरर्थ्य
चतुर्थांशनियमाः अत एतदेवोक्तं प्रयोजनं तु संस्कार इति अत्र मिश्राः चतुर्थ
भागादानमपि विवक्षितं किंतु यावता संस्कारो निर्वहति तावद्देयमित्यर्थः स्मार्त्ताः ४५

स्वेभ्योंशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक् स्वात्स्वादंशात्चतुर्भागं पति
ताः स्युरदित्सवः इति मनुवचनव्याख्याने जीमूतवाहनः प्रदद्युरिति श्रुतेर
दाने च पतितत्वश्रुतेर्न कन्याभिरधिकारवुद्ध्या गृहीतव्यं नह्यधिकारिणो भ्रा
त्रैः परो भ्रातास्वांशाद्ददातीति यदि कन्याधिका[illegible]रिणी स्यात् तदा तदंशस्यैद
च्छातो दानेऽपि राज्ञा दापयितव्यः स्यात् अतो विवाहप्रकरणे हेडमनन्त्वकाभ्या
तिस्य कथनं संगच्छते इत्याकलय्य स्वेभ्यो अंशेभ्य इत्युक्तं स्वांसादादु[illegible]ष्यदानं
च नाधिकारिणे संभावति इति विभावनीयं हलायुधादयोऽपि यावता संस्कारो
भवन्ति तावद्धनदानमेकर्त्तव्यं चतुर्थांशकथनं स्वरूपलक्षणमित्याहुः अत्र सवर्णा
भ्रातरः संति सवर्णास्तु ननत्रापि दानमावश्यकं अन्यथा सवर्णभ्रातृत्वे अ
भगिनीसंस्काराभावः प्रसंगात् न च ब्राह्मणीसुताः अपि एकांशपाददानं कर्त्त
व्यं तज्जातीयापुत्रस्य यो भागस्तच्चतुर्थांशो भवतीति कल्पयन्ति च एडेस्वरः
लिखनात्स्वेभ्य इत्यादिमनुवचनस्य च स्वेभ्यः भगिनी सजाती या भ्रातृसम्बंधि
भ्यो यच्चतुर्थो भागिनो भवतीति तं परिकल्पितं भ्रातरः स्वात्स्वात् अंशात् धन
मुद्धृत्य कन्याभ्यः सजातीभ्रातृभागाच्चतुर्थं मा कृष्य भ्रातरो दद्युरित्यर्थः इति मिश्राः
यत्के रथ्यमेवार्थः न तु सजातीयानां भ्रातॄणां नेवांशोद्धृनं गृह्णीषुः सर्वभ्रातरः इ
त्यर्थः सजातीयभ्रातृभागचतुर्थीय हरणस्यान्या भ्रातृभिः संभवात् स्वात्स्वा
दि[illegible]शादित्यस्यैव वैयर्थ्यात् सजातीयभ्रातृसत्त्वे भगिनीसंस्काराभावप्र
संगाच्च अत्र चतुर्थांशदाननियमः न च संस्कारमात्रार्थ इति च एडेश्वरः म
तं अन्येषां तु मतं यावता संस्कारोऽत्र निर्वहति तावद्धनं भद्रानमात्रमिति अत्र
जीमूतवाहनः एवं च बहुतरधने विवाहोचितधनं दातव्यं विषमसंख्यायां च
कन्यायां बहुतरधनदानं वा स्यात् पुत्रस्यैव निरंशता वा स्यात् न चैतदुचितं पु
त्रस्य प्रधानत्वादिति अयं भावः भगिनीनां चतुर्थांशो दातव्यः यदि च भगिनीनां
साहस्रेगुण्यं स्यात् तदा भ्रात्रपेक्षया बहुतरं धनं स्या चतुर्गुण्यं स्यात् तदा नि
रंशता अत्र तु भगिनीनां पंचगुणत्वे महान् व्यामोहः किं तु एतादृशकोटिस्फूर्तिः
श्चतुर्थांशदाननियमपक्षे विनानसंभवतीति वस्तुतस्तु बहुतरधनेऽपि चतुर्थां
शं दद्यादेव इति नियमो वर्त्तत एव भगिनीनां भ्रात्रपेक्षया अल्पत्वेन तदभावे
तु विष्णोरेवमूर्ज्जान्तरं अन[illegible]दानां च कन्यानां वित्तानुरूपेण संस्कारं कुर्यादि
ति मनुवचनाच्च तत्रैणार्थे ह पंचोध्यं यथा सजातीयभ्रातृभागचतुर्थांशं स्वा
त्स्वादंशात्परिमित्वा प्रतिभगिनीं दद्युरिति स्वेभ्यः स्वेभ्यः अंशेभ्यश्चतुर्थांश

(श्लोकः २९

यैत्रत्वेवं क्रमेण संक्रमणं नास्ति तन्न तु पुत्रस्य पौत्रेणांशो ध्वनीयं अकामत
इति विभाववीयं अत्रेस्वबधेयं यस्तु पितृव्याद्दूविमुखः सन्भागभागीति तद्दि
द्दूपतितः पराङ इत्यादिवक्ष्यमाणवचनात् एवं पदिपितृव्याद्दांश एषा भगिः
स्यापित्ता इत्यादिप्रतिज्ञा सर्वेव रेकवाक्यतया कृता तदा कथं भ्रित् जीवनधा
रणोसा भगिनीविभज्यते इत्ययं व्यवहारः कुत्रचिद्देशे वर्त्तते कात्यायनः द्द
स्यमानेविभज्येत न गृहं सत्रं चतुष्पदं गदद्व्याभिर्शं कार्यप्रस्य पत्नत्र कीः
र्त्तितः प्रत्यपोदिम्यं इति स्मार्त्तीः वृहस्पतिः ग चतुर्थमंशं भगिनीभ्यो दद्युरिति च
कन्यानां भ्रातसंख्यतेः चतुर्थीशस्तेतस्य न त्वेचतुर्थीशं पूरणं आधिक्ये तु स्वान
स्वानंशान् पारद्दीमान् कृ सर्वधनानि मिश्रयेत्तेनैव भगिनीनां सर्वसामेव संस्का
रः कार्य्यः इति परं तु पारमदाननियमः फलसिद्धार्थ एव यथा कश्चित् कूरो
भ्राता त्रूयात् असैनिर्दितायैव भगिनी देयाप्योत्तु वत्मप्यत्यमेव लोकनिंदा च
मनस्सति करीममतुधनवृद्धिरस्त्विति तन्निराकृत्यकुलोचितं पशस्करं भगि
नीविवाहं संपादायेत् एतेन यास्मच्चेपावदंतं व्यय भवति तावद्द्यात् यादृ
त्तिक्रमे तु न दोषः पदि तु सर्वथैव पारदाननियमस्वंडेश्वरमतः स्यात् तदा द्दि
पुत्रकस्य महापत्यपतेकन्याविवाहे द्दे चात् कथंचिन्मृ[illegible]महापत्याद्दिपाद्दस्यव्य
यो पुत्रयोर्दुरद्दृष्टस्यात्रवेतदानुभावि कं तथा च भगिनीसंस्कार[illegible]द्दिपर्य्यंतंपा
दान्तःपाति धनं दद्यादेवेति नियमविधिः इति विभावनीयं अत्र संस्कारे विवाह
इति रत्नाकरादीनां स्मार्त्तादीनां च स[illegible]म्मतं परं तु [illegible]नामकरणादिकमपि
वक्तुं युज्यते कथं नोक्तमिति पूर्वं असेदुमुः द्विजानामेव संस्कारः दशकस्याव
श्यकत्वं न तु शूद्रस्य स्त्रीणां च इति तथा चेतत् आवश्यकसंस्काराय्यैव धन
दानमिति ग्रंथकारणामभिप्रायः एवं च वक्ष्यमाणभ्रातसंस्कारेपि द्विजानामे
व शूद्रस्य तु विवाहमात्रमिति नियराहुः पितामहचरणाः शूद्रस्य तु विवाह[illegible]
[illegible]न्यसंस्काराणां पूर्त्तादिवत् काम्यत्वात् सपिंडनापकर्षनिमित्तत्वमिति
आह श्चार्थतः सत्यम् द्रुत्वसंपादनापेव अन्ये संस्कार इति अत्र वीजं विवाह
मात्रसंस्कारः शूद्रे पितृवृन्तेसदा इति ब्रह्मपुराणे विवाहमात्रे नित्यत्वबोध
कसदापदस्त्रवणं न चैवं काम्यपि अन्यस्मिन् संस्कारे मंत्रलभता शूद्र इति वा
च्यं शूद्रोप्येवंविधः कार्य्यो विनामंत्रेण संस्कृत इति यमवचनेनान्यत्रापि
मंत्रनिषेधात् विवाहोप्यमंत्रको स्त्विति चेदिष्टापत्तिः व्यवहारोपि तथैवा ५६
नुदृश्यते नन्वस्तु शूद्राणां तथात्वं स्त्रीणां अन्ये संस्काराः कथं काम्या इति चेत्

एवंसर्ववर्णस्त्रीणांसंस्कारेष्वपिचिंत्यंप्रागुक्तेषुक्तेविशेषान्तरइतितैरेवलि
खितत्वादित्येवेहेय- नशूद्राणांस्त्रीणांचसर्वसंस्काराआवश्यकाःविवा
हमात्रंतुकृतमितिवक्तुमिच्छंतितेस्तुसर्वग्रंथएवसंस्कारसामान्यवाचकसं
स्कारपदव्याख्यानायउपन्यस्तंपरिणयपदंसर्वसंस्कारसामान्यस्यउपलक्ष
णमेवववक्तव्यंअन्यथाऽनिस्तारात्इतिध्येयंद्विजातीनांस्त्रीणांविवाहस
मंत्रकएवइतिवचनात्नतुविस्पोवैचनद्वयेनभागदानंवैवाहिकधन
दानयोर्वाधनान्द्वयमेवकर्त्तव्यमितिचेन्न असंस्कृतास्तुसंस्कार्याभ्रा
तृभिःपूर्वसंस्कृतैः भगिन्यश्चनिजादंशात्दत्वांशंतुतुरीयकं इतियाज्ञ
वल्क्यवचनेनचतुर्थांशदानस्यैवसंस्कारार्थत्वप्रतिपादनात् अत्रविज्ञा
नेश्वरः पितुरूर्द्ध्वंविभजद्भिर्भ्रातृभिरसंस्कृताभ्रातरःसमुदायद्रव्येणसंस्क
र्त्तव्याःइतिभगिन्यश्चअसंस्कृताःसंस्क र्त्तव्याःभ्रातृभिःकिंकृत्वानिजाद
शाच्चतुर्थमंशंदत्वाअनेनदुहितरोऽपिपितुरूर्द्ध्वंअंशभागिन्यइतिगम्यते
देवलः कन्याभ्यश्चपितृद्रव्याद्देयंवैवाहिकंवसु व्यासः असंस्कृतास्तुयेतत्र
भ्रातृभिःपूर्वसंस्कृतैःसंस्कार्याभ्रातृभिर्ज्येष्ठैःकन्यकाश्चयथाविधिःअत्र
चनानावचनेषुवैवाहिकधनदानप्रतिपादनात् अन्यत्रमंन्वादिवचनेषु
तुरीयांश दर्शनाच्चद्वयोरेवदानंप्रागुक्तस्तुतथाउन्नेयंकात्यायनोपि
प्रकारद्वयमाहयथा कन्यालंकृतानांचतुर्थोभागइष्यते पुत्राणांच
त्रयोभागाःस्वाम्यंत्वल्पधनास्मृतं अत्ररत्नाकरः स्वाम्यंतुल्पधनेस्मृतमि
तियदाचतुर्थभागरूपेधनेल्पतासंस्कारेस्त्वधिकधननिर्वाहस्तदाया
वताधनेवताधनेनसंस्कारोभवतितावतिधनेकन्याःस्वामित्वंप्रभुत्वंते
नतावद्धनमेवस्वांशदाल्पष्यापिभ्रातानासंस्कारार्थंदेयमिति अत्रनचव
उभगिनीकत्वेभ्रातॄणांअल्पधनताधिरंशतावास्यादितिप्रागुक्तदोषोऽ
स्त्वितिवाच्यंभ्रातृसंख्यायाचतुर्गुणतयाभगिनीसंख्ययाचभागान्कृत्वा
चतुरश्चतुरोभागान्भ्रातृभ्यएकमेकंभगिनीभ्योदानेनभ्रातॄणांअल्प
धनत्वनिर्द्धनत्वयोरभावात्नचजीमूतवाहनेनेवंतत्कल्पकथंनादृत
इतिवाच्यंस्वतंत्रेच्छयादितिअल्पधनेसमुदायेकन्यालंकृतानांस्वाम्यंस्वाम्य
मिवइतिव चनार्थोभावश्चरत्नाकरेणोक्तः इतिएतन्मतेदेवलवचनादि
कमपिधनपरमपि संभवात्तुरीयांशादधिकदानंचान्यमेतं वसु

१५१४ कं:२४

तत्र अत्यल्पधनेनतरपिस्त्रीकार्यमेवयत्नः कन्यापितृनन्तुभ्रातृयत्नःपि
तृगेहेयदाकन्यारजःपश्यत्यसंस्कृता भ्रूणहत्यापितुस्तस्याःसाकन्यावृ
षलीस्मृता इत्यादिवचनेन कन्याविवाहासंपादनेनतद्दोषापत्तेर्मन्येय
चात्ते शुल्कविक्रयी इत्यादिस्मृतिः वचनेन कन्याविक्रयस्य च निषेधान्न
त्यवधानव्यंजीमूतवाहनस्तु कात्यायनवचनमत्यल्पव्याख्याचष्टे यथाअ
ल्पधनेकन्यकानां एकभागे पुत्राणां त्रिषु भागेषु एवं रीत्य एव स्वाम्यंस
त्वमिति एवरत्नाकरमतं शास्त्रसिद्धमपि कदाचित् दैववशात् किंचित्
ननु रीत्यांश दानेन संस्कारसंपादने अनुभवविरुद्धमिव प्रतिभाति अ
त्र च यदि पितुः किंचिदपि धनं नास्ति तदा भगिनीसंस्कारः कथं भवेदिति
चेन्न भ्रस्यैव व्यासवचने देवलवचने येन कथनेनैव संस्कारकथनात्
त् अन्यत्र च न स्पष्टमनभिधानात् स्पष्टस्य तु विधेर्नान्यैरुपसंहारः क्रि
यते इति न्यायात् न चाविद्यमाने पित्र्यर्थे स्वांशादुद्धृत्य वा पुनः अव
श्यं कार्याः संस्कारा भ्रातृभिः पूर्वसंस्कृतैः इति नारदवचनात् पित्र्य
ध[illegible]नाभावे स्वार्जितेनापि स्यादित्यर्थेन च अवश्यं संस्कारं कुर्यादिति
वाच्यं जीमूतवाहनेन तथानंगीकारात् तथाहि तस्याशयः येषां तु न
कृताः पित्रा संस्कारविधयः क्रमात् कर्तव्या भ्रातृभिस्तेषां पैतृकाद्
वतद्धनात् इति येषां तेषामिति पुल्लिंगपदघटितवचनेन भ्रातृसंस्का
रस्यावश्यकत्वमुक्त्वा पैतृकधनाभावे भ्रातृसंस्कारनिर्वाहार्थमुपा
यकथनेन नारदस्य तथा च भ्रातृसंस्कारेपि भ्रातृसंस्कार एव विषयः न
तु भगिनीसंस्कार इति नारदीयवचनस्याभिप्रायः अपरे तु सांदृष्टिकन्यापे
येनागत्या भगिनीसंस्कारोपि स्वार्जितेनैव संपादनीयः अन्यथा कन्या
संस्काराभावेन पितुर्महान्दोषः स्यात् सांदृष्टिकन्यायश्च दायप्रकर
णे जीमूतवाहनेनैवादृतः यथा यदि कुर्यात्समानांशान् पत्न्यः कार्याः
स्याः समांशिकाः न दत्तं स्त्रीधनं यासां पत्न्या वा श्वशुरेण वा इति या
ज्ञवल्क्येन दत्तस्त्रीधनायै पत्न्यै अंशदानं निषिद्धं तत्र ईदृशा न्याया अधिविन्न
स्त्रीविषयकं वचनमुपन्यस्तं यथा अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समं न द
त्तं स्त्री धनं यासां भर्त्रा वा श्वशुरेण वा इति अयमेव सांदृष्टिकन्यायः एकत्र नि
रूपितः शास्त्रार्थो बाधकं विना अन्यत्रापि प्रवर्त्तते इति येषां तेषां इत्यादावेव ५७

शेषस्वीकारिणांमतेतुनदोषःवस्तुतोपिपरंदेवलाप्रसादोपचितशक्ति
संपत्तिकेनश्रीमतामहाराजेनवल्लालसेनेनप्रवर्त्तितास्मद्देशीयब्राह्मणव्य
वहारविशेषस्वीकारेत्तमकथा अपिकन्यायाःकुलाचार्य्यापरिष्ठाब्राह्मणवि
शेषसंप्रदानमेवतत्रापितद्वंशस्याखिलस्य अन्यथातत् पितृवंशस्यमा
नभंगापत्तिरितितुशास्त्रान्तुपदिष्टोपिसर्ववाटीयश्रेणीब्राह्मणोपरिगृही
तोव्यवहारइतिलिखितइत्याहुःमिश्राणांस्वरसोऽप्यत्रास्तिअत्रेदमवधे
यंसत्पुत्रहस्तप्रतिपादनाथापिसत्पुत्रवंशेपनसंस्कारात्आवश्यकाप्यीदृ
शंचनशास्त्रदृष्टंकिंत्वनुभवएवात्रमूलमिति शंखलिखितौ क[illegible]लं[illegible]का न्या
रंवैवाहिकंस्त्रीधनंचकन्यालभेतकन्यालंकारंस्वकीयमनुद्धरादिकन्यालभ
तेइतिरत्नाकरः अयंभावःपितृगृहेकन्यायायद्दत्तंकुमारिकंस्तुतंमतेपि
तरिभ्रातरस्तत्पित्र्यमितिमत्वानविभजेरन्किन्तुकन्यायै[illegible]स्यजेयुःक
न्यालंकारमितिमातुःकन्याकलीनमलंकारं वैवाहिकंचयथाबोधायनः
मातुरलंकारंदुहितरःसमदपिकंलभेरन्नन्यद्वासांप्रदायिकंवैवाहिकं
मन्यतअलंकारादन्यदपिवस्त्रंतेयेसादिकंमातुर्वैवाहिकंतदपिकन्याल
भतेएतच्चमातुर्म्मरणोत्तेयंस्त्रीधनाधिकारप्रकरणेऽधिकंवक्तव्यंअत्र
चतुप्रसंगात्किंचिदुक्तंइत्यवसेयंएतदृत्तिरिक्तंकन्यानलभतेतदाहअ
हिन्तिस्त्वनुवर्त्तते बोधायनःनदायंनिरिन्द्रियाआदद्युःइतिस्त्रियोदायः
विहीनाइत्यर्थकश्रुतिघटितवाक्यंनिरिन्द्रियाःनिःस्वत्वाइतिप्रकाशःए
तच्चविहितांशातिव्यतिरिक्तविषयंइतिरत्नाकरःअतएवदेवलःअपुत्र
स्यचकन्यायाधर्मजापुत्रवद्धरेत् इतिएतद्विविचयिष्यतेपुत्रधनाधिकारे
भ्रातॄणांसंस्कार्य्यतामाह वृहस्पतिःअसंस्कृतास्तुभ्रातरस्तुयेस्युस्तत्रयवी
यसः संस्कार्य्याःपूर्वजैस्तैवैपैतृकान्मध्यकाद्धनात् यवीयसःयवीयांसः
अर्थात्तानुमरीर्घदृष्योरभावइत्येके अन्येतुयवीयसःकनिष्ठस्यमध्यका
दित्याहुः फलतस्तुनकश्चिद्विशेषइतिरत्नाकरः तत्रपूर्वमतंसुगमं परस्मि
न्तुकनिष्ठसम्बन्धिपैतृकधनादेवसंस्कारकरणेप्राप्तेसाधारणादित्यर्थः
साधारणंवकनिष्ठस्यापिभवतीतिभावः व्यासःअसंस्कृतास्तुयेतत्रपैतृका
देवतद्धनात्संस्कार्य्याभ्रातृभिर्ज्येष्ठैः कन्यकाश्चयथाविधिः कन्यकासंस्कारः
परिणयरूपःइतिरत्नाकरः याज्ञवल्क्यः असंस्कृतास्तुसंस्कार्य्याभ्रात

भिः पूर्वसंस्कृतैः भगिन्यश्च निजादंशाद्दत्वांशन्तु तुरीयकं नारदः येषां
तु न कृताः पित्रा संस्कारविधयः क्रमात् कर्त्तव्या भ्रातृभिस्तेषां पैतृका
देव तद्धनात् अविद्यमाने पित्र्यर्थे स्वांशादुद्धृत्य वा पुनः अवश्यकार्य्याः
संस्कारा भ्रातृणां पूर्वसंस्कृतैः अत्र संस्कारविषयजातकर्म्मादुपनयनां
त इति रत्नाकरः पित्रभावे संस्कारकर्म्मणि ज्येष्ठभ्रातैवाधिकारी विवाहे
तु पितरि जीवति तन्मते वा संस्कार्य्यः स्वयमेवाधिकारी अतएव पूर्वजैरि
ति ज्येष्ठैरिति पूर्वसंस्कृतैरिति नाना मुनिभिर्लिखितं धनद्वारा संस्कारसं
पादनत्वात्स्वार्थिकत्वे तु एतेषां विशेषणानां वैयर्थ्यं न हि असंस्कृताः कनि
ष्ठा वा भ्रातरः भ्रातृसंस्कारे धनं न दद्युरिति शास्त्रार्थः अनुभवविरोधात्
यतः तृतीयो भ्राता द्वितीयस्य संस्कारे धनं न दद्यात् स्वसंस्कारस्तु द्वितीयाद्
नेन हीयात् इति कस्याप्यनुभवसिद्धं भवति यदि च संस्कृतैरेव ज्येष्ठैर्धनं
दातव्यं असंस्कृतैस्तु न इति शास्त्रदर्शनादेव उच्यते तथा हि असंस्कृता
नां स्वसंस्कारं यावद्धनेनैव वैषम्यनिवृत्तिरित्युच्यते तदापि ज्येष्ठैरित्यस्य वै
यर्थ्यं यदि विवाहान्यसंस्कारस्य भ्रातृस्वत्वक्रमेण करणे पितृक्रमस्यागः
त्वात् अन्नाभावेपि प्रधानसिद्ध्या संस्कारसिद्धिर्भवतीति चतुर्थस्यौदैसं
स्कारे कृते यदापि तामतस्तत्र चतुर्थ्यादित्यर्थमित्युच्यते तदा नाभवसि
द्धं यो यः संस्कृतः स स एव धनं दद्यादित्यनुभवात् तस्माद्धनद्वारा संस्का
रपादकत्वं ज्येष्ठानां कनिष्ठानां च संस्कृतानामसंस्कृतानां च सर्वेषां कृता
धिकारित्वं तु संस्कृतस्य ज्येष्ठस्यैव संस्कृतत्वं च निर्वाहितोपनयनत्वेन तु निर्वा
हितं किंचित्संस्कारत्वं कृतं च द्वस्यापि वैदिकक्रियायामनधिकारात् नाभि
व्याहारयेत् ब्रह्मस्वधानिनयनादृते शूद्रेण हि समस्तावद्यावद्वेदे न जायते
इति स्मृतिवचनात् अत्र शूद्रेण समत्वं वेदानाधिकारात्तत्त्वं नम[illegible]स्यत्वे
संस्कार्य्यस्य भ्रातुरपि स्वसंस्कारायधनदानां संस्का[illegible]र्य्याः पूर्वजैस्तैर्वै पै
तृकान्मध्यकाद्धनात् इति बृहस्पतिनास्पष्टीकृतं ननु ये जातकर्म्मादी
ति कथमुक्तं जातकर्म्मणां प्रथमत्वात् इति चेत् अष्टौ संस्कारकर्म्माणि
गर्भाधानमिव स्वयं पिता कुर्य्यात्तदन्यो वा तदभावे तत्तत्क्रमात् इति स्मृ
तिवचनात् गर्भाधानस्यापि पित्रैव कर्त्तव्यत्वात् भ्रातुस्तत्र नाधिकारः पुं ५८
सवनसीमंतोन्नयनाभ्यां सकृत्कृताभ्यां सिद्धे ज्येष्ठभ्रातरि गर्भस्थि

नत्वेवं कृते चात्पुनस्संस्कारणापेक्षा अभावात् एवं च जातकर्मादीति
त्वेन स्वरशास्त्रे वैमात्रेयभ्रातुस्तत्र मुख्याधिकार इति व्यंजितं अत्रेदं चिंत्य
संस्कारविधय इति रत्नाकरेणोक्तं न वा रूप्रतिभाति यतः संस्कारविषय इति
नारदवचने ऽस्मिन्नत्र संस्कर्तव्यैरिति पूर्वजैरिति चानास्ति अतस्तद्वचनस्य विवा
हसाधारणसंस्कारपरत्वोक्तार्वनिस्ततिः अतः धनद्वारा विवाहान्तसंस्कारसं
पादनं सर्वेषां भ्रातॄणामिति पितामहचरणैरभिमतं प्रतिभाति तन्निपुणबुद्ध्या
विविचनीयं अत्रेदमवधेयं ज्येष्ठे कृतदारे कनिष्ठस्य विवाहे तत्रेन कनिष्ठस्य सं
स्कारः अतस्तत्र पुनः संस्कारार्थं धनं देयं ज्येष्ठेन च प्रायश्चित्तं कर्तव्यं न तु धन
दानं तु न शास्त्रेणोक्तं इति सर्वेष्वेव वचनेषु असंस्कृता इति दर्शनात् संस्कारापीद
त्यस्य च दर्शनात् शास्त्रानुमतविवाहोत्तरविवाहस्य च संस्कारत्वाभावात्
भ्रातॄणां मध्ये एकस्य चित्तभावेऽपीमरणोद्वीतिय विवाहार्थं धनं न सर्वैर्भ्रातृभिर्देया
ति परं तु अनाश्रमी न तिष्ठेत्तु क्षणमात्रमपि द्विज इति वचनस्य द्विजपदस्य उपल
क्षणपाच्चतुर्वर्णपरत्वेन तद्धर्मीरत्नार्थं विवाहान्तसंस्कारयितुं युज्यते इति विभा
वनीयं नारदवचने च भ्रातृणां पूर्वसंस्कृतैरिति रत्नाकरसम्मतः पाठः भ्रातृभि
पूर्वसंस्कृतैरिति जीमूतवाहनसम्मतः पाठः येत्तयेषामित्यादौ येच्चन्या चूर
त्यादि केशेष स्त्री कुर्वीति तेषां मते संस्कारपदेन आदस्या जातकर्मादि उपनय
नाः विवाहमात्रं च वोद्धव्यं अन्यमतेऽपि सर्वं वचन एवं संस्कारपदेन जातकर्मादि उ
पनयनान्ता श्चरोदव्याः सर्वत्रैव वचने धनादिति दर्शनात् अत्र भ्रातृभिरित्युपल
क्षणं धनदानपक्षे तेन मृतपितृकभ्रातृपुत्रादेरपि ग्रहणं तस्य पितामहादिध
नस्याहि त्वेनदृशांशो धनं न तत्पुत्रसंस्कारस्यावश्यसंपाद्यत्वात् भ्रातुष्पुत्रसं
स्कारे तु पितृव्यैर्धनं नावश्यं देयं तत्संस्कारस्य पितृकर्तव्यत्वादिति अत्र च पिताम
हचरणाः भ्रातृसंस्कारकरणाधिकारस्तु पितामहे अविद्यमाने इति वदन्ति तत्र
बीजं कन्यादाने पिता पितामहो भ्राता सकुल्यो जननी तथा कन्याप्रदः पूर्व
नाशे प्रकृतिस्थः परः परः इति याज्ञवल्क्यवचनं एकत्र निरूपितं शास्त्रार्थो
बाधकं विनान्यत्रापि प्रवर्त्तते इति न्यायमन्वन्द्विवेचनीयं नस्वयेसजात्यमस्तिक्रि
मामालस्या सतिजनन्या अपि संस्कारकर्तृत्वापत्तेः किंतु सोदरभ्रात्रभावे वैमा
त्रेयभ्रातादयः भ्रातृयान्ताः सपिण्डाः बांधवाश्च आशक्तिक्रमेण आनुभाविका
रिणो बोद्धव्या इति अत्र क्रमः संस्कारस्य यथा आदौ जातकर्मनिनोनामकरण
मित्यादि संस्कार्य्यं च यथा आदौ ज्येष्ठस्य तत्कनिष्ठस्य क्रमेणैव दत्तु न संस्कारः

ग्रंथ: २५

वैमात्रेयभ्रातॄणां चक्रमो नास्तीति स्मार्त्तः अलमप्रक्रांतविवेचनेन कात्यायनः
बंधुनापहृतं द्रव्यं बलान्नैवप्रदापयेत् बंधूनामविभक्तानां भोगं नैवप्रदापयेत्
अत्र पूर्वार्द्धे यत्र बंधुना भ्रात्रादिना विभागकाले किंचिदपहृतं तस्यरं तदंशे विचेः
चम्पिष्यते भोगमिति यत्र एकस्य भ्रातुः पितृजनबाहुल्यात् अधिकभोक्तृत्वाद्वा
अधिकधनव्यये कृते विभागकाले न द्रव्यपस्यदात व्यत्वशंकायामिदमुत्तरं तथा
च एकस्याकेनवसनादपेनचित् भ्रात्रा यद्भुक्तं तद्वशिष्टमेवसर्वैः किं भ्युरिति फ
लितार्थः केनचिन्भ्रात्रा कन्याविवाहार्थं यद्धनव्ययः नद्दातव्यं नवा उच्यते
अविभक्तानां साधारणधनेनोपार्जितं धर्म्मं सर्वेषा[illegible]मधिकारस्तत्फलं सर्वैरेव
फलतो व्याप्तितं अतो न देयमेव स्त्रीसंभोगार्थं यद्व्ययितं तदपि न देयं भोगपदे
नउपभोगस्यापि ग्रहणात् गौणलाघः करणमात्रस्य भोगपदार्थत्वे पूर्वभुक्तवस्त्रा
देरपि दाप्यतापत्तेः नदानीमपहृतं अभुक्तं तु दाप्यमेव तत्तदंशे वस्तुत एतन्नि
रि[illegible]क्तं विभाज्यं सर्वे विभजेयुस्त्वचिमाज्यं वस्तुतेभागप्रकारश्च यथा मनुः
समवर्णासु ये जाताः सर्वे पुत्रा द्विजन्मनां उद्धा[illegible]रं ज्यायसे दत्त्वा भजेरन्नितरे स
मं उद्धारं वयोगुणानुसारेण प्रागुक्तं बोध्यं चंडेश्वरस्तु समवर्णासु राजा
ता इति पाठं वदन्ति [illegible] वाकाचादसवर्णापरिग्रहं करोति अत्र बहुपुत्रत्वे ज्येष्ठां
शविचारो नास्ति सर्वज्येष्ठा[illegible]यउद्धारमात्रं दद्यादिति तदाशयः अत्र बहुत्वं त्रित्वा
दिकमेव मनुनात्व्जायपुत्रस्यानुपदेशात् यथा एकाधिकं हरेत् ज्येष्ठ इत्यादीति
वक्तव्यं अपरेतु विषमवर्णाविभागस्तुत्का समवर्णास्तु विभामात्तचारमेव करोति
ग्रेष्यालंकारायउद्धारस्तु प्रागुक्तदिशैवव्याख्येयं वधारणाति वदंति पुनः स एव
अविद्यानां तु सर्वेषामीहातश्चेद्धनं भवेत् समस्तत्र विभागः स्यादपित्र्य इव धार
णा अपित्र्य इति तेन विशेषोद्धारादिरपि नात्रास्तीति मिश्राः सर्वेषां भ्रातॄणां चे
ष्टातः यदि धनं भवति तदा अपित्र्यभ्रातृकृत अंशः समः अविषम इत्यर्थः पितृ
कृते तु विभागे पितुरंशद्वयं अंशद्वयं भवतीत्यपित्र्य इत्युक्तं तत्रापि भ्रातॄणां समः
भाग एव मनुनोक्तः भ्रातॄणामविभक्तानामित्यादिना अथवा अपित्र्यधनइ
तिस्वरूपकीर्त्तनमात्रं फलत[illegible]स्तत्र ज्येष्ठांशनिषेधः स्वयमर्जितमित्युक्त्वा
गौतमः अविद्याः समं भजेरन् भ्रातॄणां यस्तु नेहेत इत्यादि प्रागुक्तव्याख्यानं चेष्टाप्र
करणे एवमनुनोक्तस्वात्त् अलस भ्रातृपरमेव सुष्टु ज्योतिषं रं तत्रैणा परोप्प
र्थी ज्ञातव्याः आकांक्षितत्वात् समपंचित्तं प्राक् सर्वेषां चेष्टां विना यस्य कस्य वि
त्वेषस्यात् [illegible] पितृधनोपक्लेशेणार्जितत्वादाह वशिष्ठः येन चैषां स्व ४९

यमुत्पादितं स्यात् सद्भ्यः समाहरेत् शेषाणामेकैकांश इतिभावः इतिमिश्राणामप्येवमा
शयः व्यासः साधारणं समाश्रित्य यत्न्वाहनायुधा शौर्यादिना प्राप्नोति धनं भ्रातृस्तत्रभा
गिनः शौर्यादिनेत्यत्र आदिपदस्य प्रकारवाचित्वात् च हुव्रीहेश्चास्यतद्गुणसंविज्ञान
त्वात्साधारणोपाय विद्यादिपरिग्रहः ननु साधारणधनाश्रयनेनापि विद्याशौर्यादिनाप्य
र्जितं तदविभाज्यमिति प्रागुक्तमनेन विरुध्येत इति चेन्न तत्र कात्यायनपरिभाषितविद्या
शौर्या[stain]दिपरत्वात् अस्य तु तदितरप्रकारको विद्यापष्टंभमात्रपरत्वादिति मिश्राः
प्रागुक्तमिति मिश्रैर्विद्याधनस्यादौ निरूपितत्वान्न संगतं तथाच परिभाषितविद्याध
नादौ साधारण धन संश्रयेणापि नेतरेषामंशित्वमिति मिश्रादिमतं तच्च जीमूतवा
हनादि विरुद्धं तदयं विद्याधनविचारे विवेचयिष्यते साधारणधनानाश्रयेण तु अ
नर्पिकानां नांशित्व इत्यपि तत्रैव प्रकरणे विवेचयिष्यते अत्रेदं विभावनीयं अत्रापि
ज्येष्ठांशा न दातव्यः ज्येष्ठस्यापि त्र्यप्रकारकत्वप्रदर्शनेन पित्र्यधनएवतत् स्वीकारगमा
त्तन्नैवं समाभावाविधायकवचने सर्वेषामित्यस्यवैयर्थ्यमिति वाच्यं सर्वेषां चेदं कि
नार्जिते अजीकस्यद्व्यंशभागित्वेनसमभागानुपपत्तेरिति ध्येयं नन्वमनुवचने समव
र्णासु हत्युक्त बहुवचनात् समवर्णानानाभार्यासु जातानां भ्रातॄणां परस्परं विभागेबो
ध्यतेन तु मातॄणां त्वप्याच प्रतिमातृबांधवच द्विभाग इति गौतमसूत्रेण विरोधः तेन मा
तरं प्रति विभागकल्पना श्रितिचेन्नमातॄणां समसंख्यपुत्रकस्य स्थले अतिबहुतरभा
गकरणे प्रयासबाहुल्येन प्रयासलाघवायैवमातृद्वारेण पुत्राणामेवं भागकरणो
पदेशात्तेनसूत्रेण तथा च बृहस्पतिः यद्येकजाताबहवः समानाजातासंख्यया सा
पत्न्यास्तैर्विभक्तव्यं मातृभागेन धर्म्मतः सवर्णा भिन्नसंख्या येषुं भागेस्तेषु विधीयते एक
स्यां जाताः एकजाताः जात्या समाना अन्यासु येये जातास्तेषां सजातीयाः फलतः सवर्ण
कजातीया इत्यर्थः संख्ययापि समानाः अन्यासु जातास्यल संख्यकाः मत्स्येकं तत्र संख्यकाः
तथाच सर्वासु त्रयएकजातीयसंख्यकपुत्राणां जनने इति भावः एतदुपलक्षणं [stain]गुण
द्वारापि समानत्वं कर्त्तव्यं अन्यथा गुणतारतम्येन ज्येष्ठांशतारतम्यात् मातृद्वाराविभा
भागस्यासंगतिः स्यात् गुणतारतम्येति क्वचिन्मातृगत भागः संभवति तदिहानीबहुपु
त्राभावे न[stain] निरर्थकत्वात् चतुरकुस्तथिसम्वचितत्वाच्च नन्विध्यते सवर्णा इत्या
दिपत्रच एकस्यां मातरि पंच पुत्रा अपरस्यां चत्वारः पुत्राः एवं क्रमेण भिन्नसंख्यापि स
वर्णा अपि तत्र पुं[stain] भागएवइत्यर्थः सवर्णासुत्रेषु अपि पुं भागित्वातिस्पष्टीकरणा
र्थं सवर्णा इत्युक्तं अथवा अंभागः पुत्रसंख्यको भागः सच वर्णास्वेव संभवति विभि
न्न वर्णासु भागं वैलक्षण्यस्यवक्ष्यमाणत्वात् विष्णुः सवर्णा पुत्राः समानंशाना द्युः

ज्येष्ठाय श्रेष्ठमुद्धारं स्वरसतः भिन्नवर्णेषु समानांशाभावात् सवर्णपुत्रादावुक्तं ज्येष्ठो
द्धारस्तु विचारितः ननु त्र सवर्णपुत्राणां समानांशकथनेन विभिन्नवर्णपुत्राणां
अंशा वैलक्षण्यं प्रतिपादितं न त्वंशवैलक्षण्यप्रकारदर्शनं तत्र इति मनुवचनं एत
द्विधानं विंशतिस्संविभागस्यैकस्यानिषु वन्ध्यीषु चैकजातानां नानास्त्रीषु विबोधनः
ब्राह्मणस्यानुपूर्व्येण चतस्रस्तु यदा स्त्रियः तासां पुत्रेषु जातेषु विभागेयं विधि
स्मृतः कीनाशो गोवृषो यानमलंकारं च वेश्म च विप्रस्योद्धारिकं देयमेकांश
श्च प्रधानतः त्र्यंशं दायाद्धरेत् विप्रो द्वावंशौ क्षत्रियासुतः [illegible] वैश्याजो ध्यर्द्धमे
कांशमंशं शूद्रासुतो हरेत् एकजातानामेकोनात्पादिष्टानां वन्ध्यीषु नाना
स्त्रीषु अनेकवर्णासु भार्यासु सवर्णजातानां स्यन्दयः कीनाशो लवाहकः यानम
श्वादि तेन कीनाशगोवृषयानालंकारवेश्मानि विप्रापुत्रस्य त्र्यंशं त्रय एकः प्रधा
नतः सारतम्यं कर्त्तव्य इत्यर्थः गोवृषादीनां च सति संभव इति रत्नाकरः एकयो
निषु सर्वेषु इति व्याख्यानात् एकवर्णनानाभार्याः प्राप्ते तु विभाग ज्येष्ठांशं श्च प्राप्नु
त एवं वेद्य इति पादितं एतच्च बहुवचनस्वरसादवगम्यते किं तु लक्षणपवलक्षणं वह्नी
ति तिस्रस्वरूपकथनं नानावर्णानामेकत्वासंभवात् वस्तुतो वह्नीष्विति अविवक्षितत्वा
र्थी द्विः वर्णभार्यास्य उक्तानुधारणाय उद्धाराभावपक्षम च लभ्या हरेदेव सर्ववा
न्यत्र ज्ञानं तु दशधा प्रविभज्यते धर्म्यं विभागं कुर्वीत विधिनानेन धर्मवित् चतु
रोंशान् हरेद्विप्रस्त्रीनंशान् क्षत्रियासुतः वैश्यापुत्रो हरेद्व्यंशमंशं शूद्रासुतो ह
रेत् विप्र इत्येकत्वस्याविवक्षितत्वाद्धनेकेषु विप्रेष्वपि व्यवस्था इति रत्नाकरः
फलतः विप्राः प्रत्येकं त्रीनंशान्वा चतुरोंशान्वा गृह्णीयुरयं क्रमः तथा च यत्र द्वौ
विप्रौ त्रयः क्षत्रियाः द्वौ वैश्यौ भद्राश्चत्वारः इत्येकादश पुत्राः तत्र उनविंशति
भागानत्र यस्त्रिंशद्भागान्वा हृत्वा विप्रभार्यौ षड्भागानष्टौ भागान्वा सत्त्रि
येभ्यः षड्भागानन्नव भागान्वा वैश्याभ्यां त्रीन्भागान्चतुरो भागान्वा शूद्रेभ्यश्च
तुरोंशान्हरेयुरित्यर्थः किंचिद्गुणवत्त्वेन विभागप्रकारद्वयमिति जीमूतवाहनः
अत्र द्वितीयकल्पमेवाह नारदः वर्णेचरेष्वंशहानिरूढाजातेषु क्रमात् वर्णेवा
ब्राह्मणस्य क्षत्रियादयः शूद्रापरिणीता अंशहानिः ब्राह्मणीपुत्रस्य चतुरोंशाः क्ष
त्रियाजातस्य त्रयोंशा इत्यादि वर्णेतरेष्विति व्यापिपादः तत्र प्राप्यमेवार्थ इति र
त्नाकरः अत्र शूद्रेस्तर्वनिकृष्ट एको भागः स च स्व द्वौ यस्मान्निकृष्टस्तस्मिन् वैश्यत
त्र एकांशोधिकः फलतो द्वौ क्षत्रिये नत्रोंश एकोधिकः त्रयोंशाः ब्राह्मणे च
त्वारोंशाः अंशहानिरेकैकांशहानिरित्यर्थः तथा च उत्कृष्टत्वात् उत्कृष्टोत अ ५०

अचरेषु एकैकांशस्य हानिरिति फलितार्थः वर्णान्तरेष्विति पारकल्प्ये पूर्वपूर्ववर्णापेक्ष
या भिन्ननिकृष्टवर्णेषु एकैकांशहानिरित्यर्थः अयं च विभागः ब्राह्मणपुत्राणामेव
विज्ञेयः क्षत्रियवैश्यपुत्राणामपि एवं वर्त्तितुं भवितुमर्हतीति तथा च द्व्यंशो क्षत्रि
यासुतस्त्वत्र त्रीनंशान् क्षत्रियासुतः इत्यत्र च ब्राह्मणो हलः क्षत्रियोरसश्चैवो
प्यतएवं वैश्याजो ऽर्धमेवांशमित्यत्र वैश्यापुत्रो हरेद्द्व्यंशमित्यत्र च ब्राह्मणक्ष
त्रियवैश्यनामौरसत्वं बोधयतीति नन्वत उपक्रमे ब्राह्मणस्य पूर्वेण चतस्रः उ
स्तु यद्वा स्त्रियः इति वचनात् तएतत्प्रकारद्वयं ब्राह्मणौरसानामेव वक्तव्यमिति
वाच्यं द्वितीयकल्पे याज्ञवल्क्येन तथा संवादात् प्रथमकल्पो ऽस्त्वापकाकांक्षायाः क्ष
त्रियौरसानामपि संभवे तन्निवृत्त्यर्थे प्रथमकल्पस्यापि तथैवौरसयुक्तत्वात्
याज्ञवल्क्यवचनं च चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः क्षत्रजास्त्रि
द्व्येकभागा विट्जास्तु द्व्येकभागिन इति यच्च ब्राह्मणस्य चतस्रो भार्याः क्षत्रियस्य
तिस्रः वैश्यस्य द्वे तत्रैव तज्जातानां विभागक्रमो यं वर्णशो ब्राह्मणात्मजाः वर्णे
वर्णे ब्राह्मणात्मजाः इति रत्नाकरः नानावर्णासु जाता इति तदर्थः एवं क्षेत्रजाते
रित्याद्यावपि द्रष्टव्ये अत्र च प्रथमकल्पः सर्वेषां समगुणत्वे क्षत्रियपुत्राणां वैश्यपुत्रा
णां च विभागमाह महाभारते भीष्म उवाच क्षत्रियस्यापि हि भार्ये विहिते कुरुनन्दना
तृतीया वा भवेत् शूद्रा न तु दृष्टा ततः स्मृता: अष्टधा तु भवेत् कार्यं क्षत्रियस्वं युधि
ष्ठिर क्षत्रिया हरेत् पुत्रश्चतुरोंऽशान् पितुर्धनात् युद्धोपचारिकं यत्तु पितुः स्यात्स हरे
च्च तत् वैश्यापुत्रस्तु भागांस्त्रीन् शूद्रापुत्रस्त्वथाष्टमं सोऽपि दत्तं हरेत्पित्रा नादत्तं
हर्तुमर्हति एकैव हि भवेद्भार्या वैश्यस्य कुरुनन्दन द्वितीया वा भवेत् शूद्रा न तु दृ
ष्टा ततः स्मृता: पञ्चधा तु भवेत् कार्यं वैश्यस्वं भरतर्षभ तयोरपत्ययोर्वास्य विभागं
च नराधिप वैश्यापुत्रेण हर्त्तव्याश्चत्वारोंऽशाः पुनर्धनात् पंचमस्तु भवेद्भागः शू
द्रस्य तत्र भारत: सोऽपि दत्तं हरेत् पित्रा नादत्तं हर्तुमर्हति: एवं रीत्या ब्राह्मणपुत्रा
णामपि त्रिकः कल्पनीयः अन्यथा आकांक्षायां अनिवृत्तेः स च कल्पो यथा ब्राह्मणी
पुत्रस्य पंचांशाः क्षत्रियापुत्रस्य चत्वारोंऽशाः वैश्यापुत्रस्य त्रयः शूद्रापुत्रस्य एक
इति त्रयोदशांशाः कर्त्तव्याः नारदेन च वर्णेर्वेषांशहानीरीत्यनेन कन्त्राकृत्त्वं
परं त्वतिनिर्गुणत्वात् शूद्रापुत्रस्यांशद्वयमात्रहानिरिति भावः विवाहश्चिकामणे
वैश्यस्योक्ते द्वितीया वा भवेत् शूद्रा न तु दृष्टा तातीयिकेति पारः अत्र दृष्टान्तवेदस्तेना
लेखनाकुष्यितापि रागतस्तज्जीयाश्शूद्रासत्त्रियेणापि वादितापविस्मात्तेन तान्त्पुत्रस्य
[illegible]

५१ वमंश इत्यर्थः एवमुक्तस्यापि शूद्रोपचारिकं शूद्रोपकरणं खड्गादीति रत्नाकरः ए
तेन शूद्राविवाहस्यानिन्दितत्वमुक्तं तदाह मनुः सवर्णाग्रे द्विजातीनां प्रशस्ता दा
रकर्मणि कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशो वराः शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः
स्मृताः ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः शूद्र इत्येवकारः सर्वत्र संबध्यते
स ताः ता इति अनन्तरपूर्वोक्तपरामर्शात् प्रतिलोमपरिणयनं सर्वथा [illegible] न कार्य
मिति फलितं कामतस्तु प्रवृत्तानामिमाः स्युरिति दोषाल्पत्वख्यापनार्थं न तु दो
षाभाव एव इति जीमूतवाहनः क्रमशो वरा इति ब्राह्मणस्य ब्राह्मणी श्रेष्ठा क्षत्रि
या तु किञ्चिन्निन्दिता वैश्या ततोऽपि निन्दिता शूद्रा त्वतिनिन्दितेति भावः तन्त्रेतर
कल्पे ब्राह्मणस्यास्त्रियो वैश्यास्यापि निन्दितोक्ता न कैवलं शूद्रा एवं क्षत्रियस्या
पि तत्कथं क्षत्रियावै[illegible]स्य शूद्रा भार्या वेदवा कथिता इत्याशयेति
अत्र हेतुः मनुविष्णुः हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः कुलान्येव नय
न्त्याशु ससन्तानानि शूद्रतां शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च शौनकस्य सुतो
त्पत्त्या तदपत्यतया भृगोः शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिं जनयित्वा
सुतं तस्यां ब्राह्मण्यादेव हीयते एतानि च वचनानि जीमूतवाहनेन आनुलोम्येति द्वि
जातेः शूद्रायां बहुदोषत्वमाह तुरित्यनेनास्यापि तानि हीनजातिं शूद्रामिति यावत् न
था क्षत्रियावैश्याविवाहे प्रागुक्तमनुवचनेनैव दोषाल्पतापि तः शूद्राविवाहे न दोषस्याब
हुदोषत्वं एतैरेव वचनैरुच्यते इत्यर्थः हीनजातिपरेन शूद्राया एव बोधनात् अन्य
था कुलान्येव नयन्त्याशु ससंतानानि शू[illegible]तामित्युपसंहारविरोधः स्यात् क्षत्रियापु ३
त्रस्य क्षत्रियत्वस्यैवाभीकारात् शौचाशौचं प्रकुर्वीरन् मातृवद्वर्णसंस्काराः इति [illegible]म
नेः ये तु तेषामपि शूद्रत्वं ख्यातं कुर्वीति तन्मते तु नोपसंहारविरोधः इति न वाच्यं यतः
शूद्रावेदीत्यादिवचनेन शूद्रां शयनमारोप्य इत्यादिवचनेन विरोधो दुष्परिहरः एवं ब्रा
ह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः कस्मिंश्चिदपि वृत्तान्ते शूद्राभार्योपादिश्यते इत्यु
पक्रमविरोधोऽपि दुष्परिहरः अत एव हारीतोऽपि शूद्रावेदिन एकान्तनिन्दां करोति ब्र
ह्महा न भवत्यन्यो ब्रह्महा वृषलीपतिः यस्तस्यामाहितो गर्भः स तेन ब्राह्मणो हतः एत
च मन्त्रायैकवाक्यत्वात् परिणीताविषयमिति जीमूतवाहनः अत एव च शूद्रावर्जं
द्विजानां भार्यामाह शङ्खः ब्राह्मणी क्षत्रिया वैश्या ब्राह्मणस्य प्रकीर्तिता क्षत्रिया
चैव वैश्या च क्षत्रियस्य प्रकीर्तिता वैश्यैव भार्या वैश्यस्य शूद्रा शूद्रस्य कीर्तिता तः
स्याच्च एते दोषाः शूद्राविवाहे एव न तु शूद्रायामपत्यजननमात्रे यतो जीमूतवाहनेन ५१
स्वयमुदाहार्या शूद्रायामपत्यजननेऽपि नैते दोषाः किन्तु स्वल्पदोषः प्रायश्चित्तं चाल्प

मिति वक्ष्यते इत्युक्तः याज्ञवल्क्यः यदुच्यते द्विजातीनां शूद्रादारोपसंग्रहः न तन्मम
मतं यस्मात्तत्रात्मा जायते स्वयं तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमं ब्राह्मणक्षत्रि
यविशां भार्याः स्वा शूद्रजन्मनः वर्णानुपूर्व्येण न तु प्राप्तितोऽप्यन्यथा क्रमं तिस्रः द्वे
एका इति ब्राह्मणक्षत्रियवैश्यानां चेद्बोधितः स्यादित्याह तत्र मम तेन तद्द्वयस्यान्यार्थ
तामहं च रामीति भावः तथा च न तु दृष्टान्तः पुरेत्यनेनैव काव्यकारत्वं परं तु याज्ञवल्क्येऽपि
ब्राह्मणस्य शूद्राविवाहं स्वीकरोत्येव अन्यथा चतुस्त्रिद्व्येकभागाः स्युः क्रमशो ब्रा
ह्मणात्मजाः इत्यादेरसंगतिः स्यात् स च शूद्राविवाहः कामादेव न तु वैदिकः महाभारतेऽक
वाक्यत्वाद्वैपरीत्यं नास्ति चतस्रो ब्राह्मणस्य विवाहिता भार्यास्तिस्रो वैकेन वेषां नैवेतरेषां
क्षत्रियवैश्यशूद्राणां तिस्रो द्वे एका च स्वधर्मेषु सवर्णा एव भार्याः सजातीयाः
ऽस्तेषां श्रेयस्याः स्युः इति पूर्वकल्पश्च तिस्रो ब्राह्मणस्यानुपूर्व्येण तिस्रो राजन्यस्य द्वे
वैश्यस्य एका शूद्रस्य इति तथा च सवर्णमात्रे विवाहः शूद्रावर्ज्जो द्विजातिविवाहः
शूद्रासाधारणद्विजातिविवाहश्चेति कल्पत्रयमुत्तरोत्तरमपकृष्टमिति फलितार्थः
इति प्रसंगादुक्तः शास्त्रानुमतानां व्यवस्थानं तत्र च ब्राह्मणेन एकानेकास्तिस्रः चतस्रो वा
भार्याः परिहीनत्याः स्वेच्छया उपायस्तमवधाना च तासु च सर्वासामेव पुत्रसत्वे कस्या
श्चिद्वा पुत्रत्वे विभागान् क्रमेणाह विष्णुः ब्राह्मणस्य चतुर्वर्णेषु चेत्पुत्रा भवेयुस्ते पि
तृकं रिक्थं दशधा विभजेयुः अत्र ब्राह्मणीपुत्रं चतुरोंऽशानादद्यात् क्षत्रियापुत्रस्त्री
न् द्वावंशौ वैश्यापुत्रः शूद्रापुत्रस्त्वेकं अथ चेत् शूद्रापुत्रवर्ज्जं ब्राह्मणस्य पुत्रत्रयं भ
वेत् तदा नवधा धनं विभज्य वर्णक्रमेण चतुस्त्रिद्विभागी कृत्वा भागानादद्युः इति पर्य्यन
क्षित्युस्तत्र यदि चैवैश्यापि वोढुं न लब्धा विहिताप्यविहिताऽपि सा वंध्या तेनापि भागः क्रमा
माह पुनर्विष्णुः वैश्यवर्ज्जमष्टधा कृत्वा चतुरस्त्रीनेकं च समाददयुः इति चतुरोंऽशान् वि
प्रस्त्रीन् क्षत्रियः एकमंशं शूद्रः पूर्वोक्तभागानुसारादिति पूर्वोक्तकारणात् क्षत्रियापुत्रा
भावेऽपि विभागमाह पुनः स एव क्षत्रियवर्ज्जं सप्तधा कृत्वा चतुरो द्वावेकं च ब्राह्मणवर्ज्जं
षड्धा कृत्वा त्रीन् द्वावेकं च क्षत्रियवैश्यशूद्राश्च यथाक्रमं विभागाः इति त्रिपुत्रत्वे विभा
गमुक्त्वा द्विपुत्रत्वेऽप्याह पुनः स एव अथ ब्राह्मणस्य ब्राह्मणक्षत्रिययोः पुत्रौ स्या
तां तदा सप्तधा कृत्वा दत्त्वा ब्राह्मणश्चतुरोंऽशानादद्यात् त्रीन् क्षत्रजन्यः ब्राह्मणस्य ब्रा
ह्मणवैश्यौ चेत् पुत्रौ तदा तद्धनं षड्धा विभज्य चतुरोंऽशान् ब्राह्मण आदद्या
त् द्वौ वैश्यासुत अथ ब्राह्मणस्य ब्राह्मणशूद्रौ स्यातां तदा तद्धनं पंचधा विभजेया
तां चतुरोंऽशान् ब्राह्मणो ह्यादद्यात् एकं शूद्रः अथ ब्राह्मणस्य क्षत्रियवैश्यौ पुत्रौ
स्यातां तदा तद्धनं पंचधा विभजेयातां त्रीनंशान् क्षत्रियापुत्रो दद्यात् द्वावंशौ वैश्यः

अथ ब्राह्मणस्य क्षत्रियशूद्रौ स्यातां तदा तद्धनं चतुर्धा विभजेयातां त्रीनंशान्
क्षत्रियस्त्वाददीतांशं शूद्रः अथ ब्राह्मणस्य क्षत्रियवैश्यशूद्रौ पुत्रौ स्यातां तदा तद्धनं
त्रिधा विभजेयातां द्वावंशौ आददीत एकं शूद्रः इति पर्यन्तं विष्णुसूत्रं पुनरप्यप
रं विभागक्रमं स्पष्टमाह । विष्णुरेव यदि ब्राह्मणीपुत्रौ द्वौ स्यातां नामेकः शूद्रापुत्रः
तदा नवधा विभज्य ब्राह्मणीपुत्रावष्टौ भागान् आददीतां एकं शूद्रापुत्रः अथ शूद्रा
पुत्रावुभौ स्यातामेको ब्राह्मणीपुत्रस्तदा षड्धा विभज्य चतुरोंशान् ब्राह्मण आददी
त द्वावंशौ शूद्रापुत्रौ अनेन क्रमेणांशकल्पना ऽन्यत्रापि भवति नन्वेकपुत्रो ब्राह्म
णस्य ब्राह्मणक्षत्रियवैश्यानां सर्वहरः क्षत्रियो वैश्यो राजन्यस्य वैश्यस्य वैश्यः शू
द्रस्य शूद्रः इत्यन्तं विष्णुसूत्रं यदि ब्राह्मणस्य ब्राह्मण्यादिभार्यासु तिसृषु मध्ये एक
एव पुत्रो भ्रातृरहितो ब्राह्मण्यां क्षत्रियो वैश्यो वा न दा सर्वहरः स एव एवं क्षत्रियस्या
पि भार्याद्वये क्षत्रिय एव वैश्य एव वा तदा सर्वहरः एवं वैश्यस्याप्येको वैश्यः सर्वहरः
शूद्रस्यैकः शूद्रः सर्वहरः क्षत्रियवैश्ययोस्तन्नी यद्वित्ती यभार्य्यायासा अवैदिकतया
नाप्तोक्ता वशिष्ठः यदि ब्राह्मणक्षत्रियवैश्याः पुत्राः स्युः अंशं ब्राह्मणपुत्रो हरेत्त्र्यं
शं राजन्यायाः पुत्रः समभितरे विभजेरन् रत्नाकरः इतरे वैश्यापुत्राः अत्र च विष्णु
वशिष्ठयो विषमविभागवादिनौ भागिगुणोत्कर्षापकर्षाभ्यामविरोधिन याज्ञव
ल्क्याप्यो इति वर्णक्रमेण चतुस्त्रिद्विगुणी कुर्यां शानादद्युरिति विष्णुसूत्रेणाविरो
धइति भाव इदं च वैश्यापुत्रस्याल्पगुणत्वे अयं च कल्पतरोरनुमत एव मन्वेक
वाक्यत्वादिति शंखलिखितौ अन्यवर्णस्त्रीपुत्रा तनां दायाद्यहांद्धि हानिर्वर्णक्रमे
णेन यो च ब्राह्मणस्य चतस्रो भार्य्यासु पुत्राः सन्तो पंचदशधा धनं कुर्य्युः अष्टौ भा
गा ब्राह्मणस्य चत्वारः क्षत्रियस्य द्वौ वैश्यस्य एकः शूद्रस्य शूद्रपुत्राभावे तु चतुर्द
शधा कुर्य्युः एवं क्रमेणांशग्रहणं अथवा सप्त भागान् कुर्य्युः तत्र चत्वारो ब्रा
ह्मणस्य द्वौ क्षत्रियस्य एको वैश्यस्य फलेनैव न विशेषः क्षत्रियपुत्राभावे तु एकादश
धा कुर्य्युः अष्टौ ब्राह्मणस्य वैश्य एकः शूद्रस्य वैश्यपुत्राभावे तु त्रयोदशधा अष्टौ
ब्राह्मणस्य चत्वारः क्षत्रियस्य द्वौ वैश्यस्य एकः शूद्रस्य इति ब्राह्मणधनविभागः क्ष
त्रियस्य तु भार्यात्रयेण यदि त्रयः पुत्राः तदा सप्तधा विभागः शूद्रापुत्राभावे तु षड्धा
त्रिधा ऽवैश्यपुत्राभावे तु पंचधा इति क्षत्रियधनविभागः वैश्यस्य द्विपुत्रसत्त्वे भागत्रयं
इति त्रिपुत्रकरीतिः ब्राह्मणा स ब्राह्मणक्षत्रियरूपपुत्रद्वयसत्त्वे द्वादशा विभागः
ब्राह्मणे वैश्यपुत्रसत्त्वे तु नवधा अन्यच्च क्षत्रियधनविभागवद्द्रष्टव्यमिति शंखलि ५२
खितवचनार्थः अयं च भागक्रमः क्रमशो गुणाद्दुसो वे दितव्यः केचित्तु अंशं दर्पणोंशा

द्विपस्य एवंभूतः समुदायविशेषांश एवेति तथा च नारदाद्युक्तवाक्यत्वमित्ति कुमव्वि
कल्पनां शकुर्वंति प्रतिलोमगुणाधिक्ये तु बृहस्पतिः विप्रेण क्षत्रिया जातो जन्मने
ष्ठो गुणाधिकः भवेत् समांशः क्षत्रेणैव वैश्यजातस्तथैव च विप्रेण समांशः क्षत्रियाः जा
तः स्यात् द्विजन्मज्येष्ठो गुणाधिकोऽपि भवतीत्येकोऽन्यः जन्मज्येष्ठो गुणाधिकोऽपि भव
ति वैश्यापुत्रः न त्वराः क्षत्रियेण समांशः अत्र वैश्यापुत्रस्य जन्मगुणज्येष्ठस्य किं क्षत्रि
यपुत्रापेक्षया उत ब्राह्मणीपुत्रापेक्षया आद्ये ब्राह्मणीपुत्रापेक्षया जन्मगुणज्येष्ठस्य
ब्राह्मणीपुत्रसमत्वापत्तिः द्वितीयस्तु न युज्यते क्षत्रियापुत्रस्य स्वोत्कृष्टापेक्षया उज
न्मगुणज्येष्ठेन तत्समांशग्रहणदर्शनात् वैश्यापुत्रस्यापि स्वोत्कृष्टक्षत्रियापेक्ष
या जन्मगुणज्यैष्ठ्यमात्रेण ब्राह्मणीपुत्रापेक्षया जन्मगुणज्येष्ठे तु विशेषो नास्ति
तथा हि वर्णज्येष्ठात् एकैकांशरूपमधिकं गृह्णंति पुत्राः अनंतरवर्णस्य वचो गुण
प्रयुक्तात्यन्तज्येष्ठस्य परिमस्य अनंतरतुल्यत्वमेव जायते तयो गुणः प्रयुक्तज्येष्ठस्य
समानत्वस्ये तत्स्वीकारात् यत्र ब्राह्मणीपुत्रापेक्षया उत्कृष्टवयो गुणो क्षत्रिया
वैश्यापुत्रौ क्षत्रियस्तु वैश्याद्यपेतिरिक्तस्तत्र च ब्राह्मणसमानत्वं यत्र च ब्राह्मणाये
क्षत्रियावैश्ययोर्मध्ये वैश्यस्य क्षत्रियापेक्षया उत्कृष्टत्वं तत्र क्षत्रियसमानत्वं
च अवश्यमेव वाच्यं एवं च क्षत्रियापेक्षयानिकृष्टस्य क्षत्रियादाधिक्यं न क्षत्रि
यापेक्षयापेक्षया उत्कृष्टस्य च क्षत्रियसमानांश इति वयमहे दृष्टम्म आसीनरु
ग्नो नीनम्नि वासोऽपि जात इति वेदितव्यं वैपायनः सवर्णापुत्रानंतरापुत्रश्च
गुणवानस ज्येष्ठांशं हरेत् गुणवान् हि शेषाणां भर्ता भवतीति अत्र गुणमात्रज्ये
ष्ठस्य उद्धाररूपं ज्येष्ठांशं तयो गुणोभयज्येष्ठे तु स्वापेक्षया उत्कृष्टवर्णसमानत्वं त्वद्र
ष्टत्युक्तं वेदितव्यं ज्येष्ठांशं विना क्षत्रियादेर्ब्राह्मणादिसमानांशभागित्वासंभवा
त् इति विभावनीयं अत्र जीमूतवाहनः अनेन च द्विजातस्याप्येवंविधस्य समांशि
ता प्रदर्शिता इति जन्मविद्यागुणज्येष्ठो द्व्यंशं दायादवाप्नुयात् इति बृहस्पत्युक्तज्येष्ठांश
विचारश्चात्रापि संभवति किंतु न द्व्यंतरेणांशं घवा तुल्यमात्रं स्यादिति नाव नाप्यते गोत
मः ब्राह्मणस्य राजन्यापुत्रो गुणसंपन्नो ज्येष्ठतुल्यभागं ज्येष्ठांशहीनमन्यत् अत्र र
त्नाकरः अन्यात्राः वादिज्येष्ठांशहीनं ज्येष्ठांशरूप उद्धारो न करणीय इत्यर्थः तथा च
तुल्यभाक् ब्राह्मणीपुत्रतुल्यभागित्यर्थः इति भावः पुनर्गौतमः राजन्यावैश्यपुत्रसमा
धायेऽप्यंशं ब्राह्मणीपुत्रे क्षत्रियाचेत्तुल्यभाक् अत्र रत्नाकरः ब्राह्मणस्य ब्राह्मणी
पुत्राभावे राजन्यावैश्यापुत्रयोः क्षिप्तयोर्गुणवान् वैश्यापुत्रो राजन्यापुत्रेण कनिष्ठे
न निर्गुणेन सह तुल्यांशः ज्येष्ठांशहीनो ब्राह्मणीपुत्र इव राजन्यापुत्र इत्यर्थः इति

तथा च पूर्ववचनोक्तो ब्राह्मणीपुत्रभागो दृष्टान्त इति भावः क्षत्रियस्य चेदिति
वं क्षत्रियस्य वैश्यापुत्रादेरेवंविधो यदा भवतः तदायमेव विभागक्रम इति पुन
गौतमः वैश्यस्यापि वैश्याशूद्रापुत्रयोरेव इति अत्रैवं बौधायनस्यैवंविध
विषये ज्येष्ठांशहारित्वाभिधानं सवर्णापुत्रे निर्गुणे कनीयः कनीयसि सगुणे
तु कनीयसी तुल्यांश इत्यविरोधः इति रत्नाकरः तच्चिन्त्यं ते बृहस्पतिना वयोगुणा
भ्यां ज्येष्ठ एव समांशित्वाभिधानात् जन्मज्येष्ठो गुणान्वित इत्यस्य प्रत्येकमन्व
येन वाक्यद्वयक[illegible]ल्पनेऽपि सामंजस्यं भवति किंतु तत्र किंत्वर्थकल्पनीयं प्रा
गुक्तरीत्यैव निर्वाहादिति गौतमवचने गुणसम्पन्न इत्यस्य वयःसम्पन्नस्यापि
लक्षणत्वे सति विरहादिति मनुः शूद्रैव भार्या शूद्रस्य नाना भार्या विधीयते
तस्यां जाताः समांशाः स्युर्यदि पुत्रशतं भवेत् इति अत्र शतपुत्राभिधानादि
ति लभ्यते यथा ब्राह्मणस्य चतुष्पुत्रत्वे ऽंशवैलक्षण्यं शूद्रस्य शतपुत्रत्वेऽपित
था न इति भावः तथा च वर्णप्रयुक्तज्येष्ठत्वमत्र न विधातव्यो गुणप्रयुक्तज्येष्ठ
त्वं केन वारणीयं युक्तभावात् मनुना च नान्या भार्या विधीयते इति भार्याविशेषस्या
भावस्यैव समांशतायां फलतो हेतुत्वेनोपन्यासात् अन्यथा दायभागप्रकरणे
शूद्रमात्रस्य नान्या भार्या विधीयते इत्यनेन विवाहनियमविधानमनर्थकं स्या
त् अत[illegible]एव वैश्यस्यापि वैश्याशूद्रापुत्रयोरेवमेव इति गौतमेन शूद्रागर्भ
जानं वैश्यापुत्रस्य गुणसम्पन्नस्य वैश्यापुत्रतुल्यत्वाभिधानं संगच्छते न हि
सगुणः शूद्राद्युत्कृष्टजातुल्यत्वेन समानभाक् स्वजाती यस्मात्तस्मात्त्वत्वेन सं
भान्त्वभागिति वक्तुं युज्यते इति केचित् स्वीकृत्य तत्कालेन काराभ्येवं पितामह
चरणास्तु वयोज्येष्ठप्रयुक्तज्येष्ठांशमात्रस्य निराशायमनो ऽ[illegible]मांशताभिधा
नं न तु गुणज्येष्ठांशस्य बृहस्पतिना तेषांपि तत्समस्तु स इति हेतोरविशेषणाभिधा
नादिति वदन्ति कुल्लूकभट्टजीमूतवाहनादयो ग्रन्थकारास्तु वयोज्येष्ठप्रयुक्तद्वा
राभावं वदन्ति गुणज्येष्ठ्यप्रयुक्तांशं च न वदन्ति अत्रेदमवधेयं नानाभार्या विधी
यते इत्यत्रायं विराः अन्या भार्या शूद्रस्य न विधीयते नैवेदं नाबाध्यते तथापि
ब्राह्मणस्य शूद्राविवाहवत् शूद्रस्य कामकृतब्राह्मण्यादिविवाहः संभवति तत्रापि
हि पुत्रो भवति तदा कीदृशो भाग इति नेदं वाच्यं यतः कामतः शास्त्रतो वा अनुलो
म्येनैव विवाह उपदिष्टः न तु कदाचित् प्रातिलोम्येन तथा च स्मृतिः स्वस्य विहितवि
वाहे इति निश्चित इति न तत्पुत्रो न भागभागिति किंचिदुपरि वक्ष्यते भागानधिकारि
प्रकरणे एवं च कुल्लूकभट्टादिसम्मतं संगच्छति बृहस्पतिः न प्रतिग्रहभूर्देया क्षत्रि ५२

परिसमाप्तेवैयद्यप्यस्यपितादद्यान्मृतेविप्राप्नुतोहरेत् वृद्धमनुः ब्रह्मदायाग
तांभूमिंहरेद्ब्राह्मणीसुतः गुरुंद्विजानयः सर्वेन्तथास्वेत्रंक्रमागतां एवंच
प्रतिग्रहभूमिरेवब्रह्मदायागतेत्युक्तं इतिजीमूतवाहनः बृहस्पतिरप्येवा
र्त्त्वंतस्यमूल्यंब्राह्मणाद्येशब्दार्थघटनांचनत्रैवकरोतिसएवब्रह्मवेदःत
ह्यध्यापनतरर्थिहानवृत्त्यामतिग्रहविधानात् नपुनर्म्मानृत्काद्वैनलब्धा
यथा आवृत्तानांगुरुकुलाद्विप्राणांपूजकेनवेत् नप्राणामसैयोस्वेषांनिः
धिन्नासोविधीयते अर्च्चनरूपत्वादस्यअध्यवाद्यमेकेननिषिद्धाग्न्याचापरे
णनतुब्राह्मणस्यमण्मिर्नास्यादायाःद्विजातीनांक्रमागतस्वेत्रेसम्बन्धस्यवा
चनिकत्वात्केवलस्यहस्येवनिषेधाच्चइति अत्रार्चनदानयोर्भेदः अनेनस्वी
कृतःदानन्तुस्वस्वत्वध्वंसपूर्वकपरस्वत्वापादकत्यागरूपंतच्चदरदेइस्यादिश
देनयज्यते अर्च्चनन्तुभोगायसमर्पणंतस्यचनमःप्रभृतिपदेनैवव्यंजकंअर्च
नोपचारोद्रव्यंस्वयंनव्यवहार्य्यंदेवतार्च्चनेनयादर्शनात् अचेतनेदेव
तास्यत्वेनुअहोरात्रादिरूपभोगावधिकालोत्तरंब्राह्मणेभ्योदीयतेब्राह्मणा
त्मकदेवतास्थलेतंतेनैवचिरंभुज्यतेइतिजीमूतवाहनाशयइतिवदन्तिनतु
छेत्यपासतित्तच्यात्रावस्त्वत्वस्त्वात्तु अर्चितस्यविप्रस्यमरणेतत्पुत्राणांअधि
कारभवाद्देवविकारस्यानवकाशात्तन्नतु अर्चितस्याभागएवात्रार्च्चनेनचसकृ
तकृतेकृतः शणत्वाधीइतिन्यायात्तस्यकृद्भोगेनैवार्च्चनसिद्धिवत्तत्तदुत्तरदिनेस्य
भूमिर्गृह्यतांनरेन्द्रेणनचैवंसतिदेवताभ्योरक्षाकथंस्वयंनगृह्णातेइतिवाच्यंदेव
ताद्रव्यस्यब्राह्मणएवदानस्यशास्त्रानुमतत्वेननस्यैवसमर्पणंयुक्तमितिस्व
यंग्रहणस्यात्तयुक्तत्वात् नचात्राप्येकस्यैवब्राह्मणस्यार्च्चनंदेवनचसत्रैवचि
रसमन्यपर्य्यन्तंभोगोयुक्तइतिवाच्यंएवंचेत्तन्मरणेतत्प्रत्तिनिधीभूततत्पुत्र
स्यापितद्भोगकत्वेप्रसक्तेविचारस्यउत्थानाच्चचरणेनअर्च्चितेनिविष्टेचेत्तनादे
वात्तानुल्यतांप्राप्तेस्मैकस्मैचित्ब्राह्मणायेतत्समर्पयेद्राजेतिवाच्यंदुहित्रेभर
णार्थीसमार्पितभस्नेरिवसमस्त स्येचभोगस्यानुमतत्वादितिचेत्तत्रदान
मेकिंनस्वीक्रियतेनमःपरस्यदानंविनात्रायोत्वरासंगतेः वस्तुतोभरणार्थ
समर्पणस्यरेडस्सत्तामाउहित्रभरणमुद्दिश्यप्रदत्तत्वात् अत्रेदंध्यतेकेश्चित्
त्यागजन्यापूर्वमुद्दिश्ययुक्तद्रव्यस्वीकारःप्रतिग्रहः अदृष्टार्थकंभोगमुद्दिश्य
द्रव्यत्यागःपूजाअतःप्रतिग्रहार्च्चनयोर्विशेषःअत्रनमःपदेनत्यागएवोच्यते
ननुपरस्व पर्य्यन्तचतुर्थीत्तुभोगोद्देश्यत्वादेवअत्रनार्च्चनीपस्यसंप्रदानत्वं

पृथक्सूत्रेण [illegible] चतुर्थीतु [illegible] उशनसा च चतुर्थी एवं च अर्चनोपचारस्यानि
धिप्रायत्वं किंतु एकेन भुज्यमानत्वात्तस्य उपदाननिकं स्वसमतः परेण न गृहीतः
व्यमिति फलवत्त्वात्कल्प्यते तत्र उपरमे तु तत्संतत्तेर्भुज्यतामेव इत्यपि वादन्ति
इयमेकेन इत्यादि एकेन मनुना इयं अर्चना लब्धभूमिः आन्यप्रतिग्रहलब्धाभू
मिः अपरेण बृहस्पतिना वेदात्तलब्धं तस्यो ब्रह्म प्रह्लादिमः प्रजापतिः इत्यमरकोषा
त् यथा श्रुतेरर्थः ब्राह्मणो ब्राह्मणस्य दायः ब्रह्मदाय इति तन्निरर्थकेनेति न लिखि
गृहं द्विजातयः सर्वे तस्यास्तत्क्रमागतं इति मनुवचनेन द्विजातयः ब्राह्मणक्ष
त्रियवैश्याः गृहं क्रमागतं पितृपितामहपरम्परया प्राप्तं हरेयुरिति अनेन ब्रा
ह्मणक्षत्रियवैश्या गृहं क्रमागतं चितामहानां सर्वेषामेव ब्राह्मणसम्बन्धिस्व
त्रेऽधिकारकथनात्तन्न चैतन्न ब्राह्मणक्षत्रियवैश्यसम्बन्धिधनेनाप्रयुक्तत्वेकेषां
पुत्रस्याधिकारकथनमिति वाच्यं हरेयुर्ब्राह्मणीसुता इत्यनेन ब्राह्मणधन
स्यैवोपक्रमात् तत्रापि भूमेरपि इत्यस्याप्यधिकारस्य वक्तव्यत्वेन द्विजातयः स
र्वे इत्यस्यैव यस्यापि पानाच्च केवलस्य शूद्रस्यैव निषेधाच्च इत्यत्र प्रमाणं बृहस्पति
वचनं जीमूतवाहनेनैवोपन्यस्तं यथा शूद्रो द्विजातिभिर्जातो न भूमेर्भागमर्ह
ति सजातावाप्नुयात् सर्वमिति धर्मो व्यवस्थितः सजातो पित्रा समानायां
जातो सत्यं अथवास्य समानजातो पितरीत्यर्थः अत्र समानयतो भूतेरिति
कथनात् कथनात् प्रतिग्रह[illegible]लब्धाया अप्रतिग्रहलब्धाया अपि भूमेर्भा
गं शूद्रो नार्हतीत्यर्थः अप्रतिग्रहलब्धाभूमिः क्रयलब्धादिः जीमूतवाहनोप्ये
वं क्रयादिलब्धायां तु क्षत्रियवैश्ययोर्भागोऽस्तीति स्मार्तव्यं अत्र ब्रह्मदायइ
ति ब्रह्मा ब्राह्मणः तस्मिन्नेव साधारणो दायः दानं तदागतं तेन लब्धामित्यर्थः
तेन याजनाध्यापनप्रतिग्रहलब्धानां परिग्रहः क्रयादिलब्धाया दानेन ब्राह्मण
वं किन्तु सर्वेषां विशेषात् प्रतिग्रहादिलब्धाया दानं तु ब्राह्मण एव याजनाध्या
पनप्रतिग्रहैर्ब्राह्मणो धनमर्जयेत् इति स्मृतेः ब्राह्मणेतरस्य च निषेधाच्च यथा
मनुः यो लोभादधमो जात्या जीवेदुत्कृष्टकर्मभिः तं राजा निर्धनं कृत्वा क्षिप्रमे
व प्रवासयेत् इति क्षत्रियस्यापि क्वचिद्[illegible]शः सर्वदा तदभावे प्राणधारणा
र्थमेव न तेन पुत्राणां प्राप्तिसंभावना चाद्धेश्वरोऽपि ब्रह्मदायागतां याजनादि
लब्धामित्यर्थः व्याचकार एवं चाच्चनलब्धस्यापि ब्रह्मदायागतत्वं भवतीति अप
रे अत्र क्रमागतक्षेत्रे विशेषेण क्षत्रियवैश्ययोरप्यधिकारः कथनात् पूर्वपि ५४
तामहादिना प्रतिग्रहलब्धाया भूमिपित्रा च सम्बन्धात् लब्धात् तस्यामपि क्षत्रियवैश्य

श्लोकः २४

योरप्यधिकारः अत एव प्रतिग्रहेणाप्यपि त्वार्जिता भूमिः सा ब्राह्मणीपुत्रस्यैव
न क्षत्रियादेरित्युक्तं इति जीमूतवाहनेन इति मनुवाक्येणल भागमित्यत्र क्षः
त्रियवैश्ययोरधिकारः कथमिति चेन्निषेधाभावात् शूद्रे द्विजातय इत्यन्नवार
मात्रं प्रसादाद्यागतामित्यादिकं नियमविधिर्वा कथं अतोऽस्यात्र लक्षणद्वरणीयाश
क्यपेक्षया दुर्बलत्वादिति विभावनीयं यद्यप्येषे पिता दद्यान्मृते विप्रसुतो ह
रेत् इति बृहस्पतिवचनात् पितृकृतविभागाभिप्रायकं तथा च प्रसादापगता
यां भूमौ क्षत्रियादेः स्वत्वं स्वसंबंधाधीनं कथमपि न भवतीति भावः ननु न हि स
न्निधिः स्यात् भिवं पि न स्वत्वमपि न नश्यतीत्यपि वाच्यं यं मृते विप्रासुतो हरेत् इ
त्यस्यान्यथानुपपत्त्या अन्यथा उदासीनोऽपि हर्तुं शक्नोतीति यदि अदत्तार्थं
प्रतिपालनार्थं वा प्रसादरूपं वाच्यं तदा इति तदा किं स्यादिति चेत् न च क्षत्रिया
देव पि स्वत्वं भवति दानस्य पूर्वस्वामित्वनाशाव्यभिचारात् परस्वामित्वात् तुल्य
त्वो निधित्वापत्तेन च नत्र दानेनापि न स्वत्वनाश इति व तुं युज्यते अनुमत्या
दिस्वामिकृतनशक्तिसंकोचस्य कदाप्यनंगीकारात् इति केचित् आहुः देवलः
निषादएकपुत्रस्तु विप्रस्वस्य तृतीयभाक् द्वौ सकुल्याः सपिण्डो वा स्वधा
धारानायसंहरेत् कुल्याभावे स्वधादाता आचार्यो शिष्य एव वा सवीस्यापत्
सुतानार्थान् सगोत्रान् प्रति पादयेत् निषादः शूद्राब्राह्मणजातः इति जातिसं
कर्थवक्तव्यः तृतीयभागमिति समस्तधनं त्रिधा विभज्य एकं भागं गृह्णीयात्
द्वौ भागौ सपिंडस्य तदभावे सकुल्यस्य सपिण्डसकुल्ययोर्भेदो वक्ष्यते यथा
सपिण्डाः पित्रादिः सकुल्यो वृद्धप्रपितामहादिः एष च सवर्णविषय अ
न्यथा पुत्रापेक्षया उत्कर्षानुपपत्तेः सकुल्याभावे आचार्यः अयमेव स्वधादा
ता श्राद्धकर्त्ता तदभावे शिष्यः सवीस्यापत्यस्तु सर्वेषां सपिण्डादिवि शिष्याणा
नामभावे सगोत्रान् तान् अर्थान् धनानि प्रतिपादयेत् निषादपितृसगोत्रायोद्दा
दित्यर्थः रत्नाकरजीमूतवाहनादयोऽप्येवं सत्येन निषादविषयमेतदिति पारिजा
तः तद्विजं ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक् यदेवास्य पिता दद्यात्तदे
वास्य धनं भवेत् इति मनुवचनविरोधभंगः तथा वैतन्मनुवचनं निर्गुणशूद्रा
पुत्रविषयमिति किन्त्वेतद्वचनं द्विजातिपुत्रसत्त्वे एव इति वक्तुं युज्यते तथा च पू
र्वोक्तमहाभारते एकवाक्यत्वं च भवति यथा वैश्यापुत्रस्तु भागांल्लीनं शूद्रापुत्रस्त
थाष्टमं स्मेऽपि दत्तं हरेत् उद्धरणेन करणीय इत्यर्थः तथा च तुल्यभाक् ब्राह्मणीपुत्र

तुल्यभागित्यर्थ इति भावः पुनर्गौतमः राजन्यावैश्यापुत्रे समायां यथांशं
ब्राह्मणीपुत्रेण क्षत्रियाचेत्तुल्यभाक् अत्र रत्नाकरः ब्राह्मणस्य ब्राह्मणीपु
त्राभावे राजन्यावैश्यापुत्रयोर्म्मिलितयोर्गुणवान् वैश्यापुत्रः राजन्यापुत्रेण कनि
ष्ठपित्र्यानारत्नं हर्तुमर्हतीति इति एवं च पितृकृतविभाग एव शूद्रापुत्रस्यांशविशे
षः पितरि मृते तु द्विजातौ भ्रातरि सति निरंशित्वं तस्मिन्नसति नतो यांशग्राहि
त्वं इत्युक्तो सति विरहात् अत एव मनुः चातुर्वर्ण्यविभागमुक्त्वा पितृकृतविभागे
मुक्त्वा रूपे सत्याः शूद्रपुत्राधिकदानमाशंक्य यद्यपि स्यात्तु सत्पुत्रोप्यसत्पुत्रो
पि वा भवेत् नाधिकं दशमाद्दद्यात् शूद्रापुत्राय धर्म्मतः इत्यनेन तन्निषिध्यते
मृते पितरि भागदशमांशमपि निषेधयति ब्राह्मणक्षत्रियविशामभिन्नपारिश
त्र चरदशमांशनियमः चतुर्वर्णपुत्रचतुष्टयसत्वे चतुरोंशान्हरेद्विप्र इति पू
र्ववाक्यैकवाक्यत्वात् एवं गुणविशेषानुसारेण साद्वित्वभागग्रहणमपि
युज्यते अंशं दद्याद्दैवविप्र इत्येकवाक्यत्वात् ननु कदाचित् ब्राह्मणीपुत्रा
भावे शूद्रापुत्राय दशमांशदानमेव ब्राह्मणवर्ज्जं षड्धा कृत्वा तीन्द्राद्वेकं
च क्षत्रियवैश्यशूद्रसप्तमेव विभागः इति विष्णुविष्णुविरोधात् एवं च शूद्रां
द्विजातिभिर्जातो न भूमेर्भागमर्हति इति निषेधो ब्राह्मणविषये पितृकृतवि
भागविषय एवं चेदापत्तिर्न्नवर्णभेदेन विधिवाक्यं इत्यन एव च एवमविशे
षात् भ्रातृरहितशूद्रापुत्रेणापि स्वस्तीयांशो लभ्यते तेन तत्रापि न भूमिर्निर्वेशवि
त्तं युज्यते यत्तु शूद्रापुत्रो नऋक्थभागिति मनुवचनमपरिणीताविषयतः
त्र महाभारते परिणीतापुत्रस्यापि भागानधिकारित्वाभिधानात् ननु यद्यपु
त्र इति कथं संगच्छते अपुत्रस्य दशाधिकस्य वित्तनाशानानुमतेः इति केचित्
दशमांशोऽत्र वलीकृतनियमपर इति प्रागुक्तः तस्मादपुत्रस्य दशमांशस्याः
नीयस्तनीयांशादिविवेति जागर्तीहित्यपरे यद्यपीत्यादि मनुवचने सत्पुत्रः व
र्त्तमानद्विजातिपुत्रः अपुत्रः तद्रहित इति चण्डेश्वरमिश्र कुल्लूकभट्टविज्ञाने
श्वरादयः अत्र लक्ष्मीधरः यदि पिता प्रसन्नः शूद्रापुत्राय दद्यात्तदा दशमां
शमेव दद्यादिति तेन एतन्मते शूद्रापुत्रो न ऋक्थभाक् न पितृदत्तऋक्थभा
गिति नेयं इति चण्डेश्वरः अत्रोभयत्रापि व्याख्यानं शूद्रापुत्राय दद्यादित्येवोक्तं
न तु अंशं प्रदद्यादिति विशेषः तस्माद्दशरएवैतेभ्यः प्रसादप्रदाने संख्यायाः ५५
अन्यपुत्रेष्वनभिधानात् तस्याप्रकृतांशसमत्वेन तद्वचनैकवाक्यत्वे लाघवा

त् मनुसंहितायामेतद्वचनस्य अंशदानोपक्रमकत्वाच्च पूर्वपश्चाच्च पितृदत्तत्र्य
क्थभागित्वस्य विरोधभंगायापित्रा दत्तेति पूरितमिति हलायुधः पारिजातमप्येव
मथमवाक्यमसंतनिर्गुणो शूद्रापुत्र परत्वाद्वितीयं च निर्गुणेन शूद्रापुत्र
परतया भागनिषेधकमेवेति वर्णितं तथा च यदेकस्य पिता दद्यादिति किंचिद्दत्तं दश
मांशान्तरं वा अनुग्रहादेव दद्यादित्यर्थः स गुणो दाशशूद्रापुत्रायत्तु अपुत्रः पिता
स्वकीयभागग्रहणानन्तरं अवशिष्टधनस्य तृतीयांशं दद्यात् तदवशिष्टस्वीये
मेव गृह्लीयात् मृतपितृकविभागेप्येषैव रीतिरनुसरणीया जीमूतवाहनस्तु ब्राह्म
णक्षत्रियविशामित्यादि मनुवचनं पितृप्रसादलब्धदशांशमात्रस्य पुनर्भागग्रह
णनिषेधकमाह वित्तानेश्वरोप्येवं जितेंद्रियेत्व वचनद्वय एवं व्याचष्टे नत्रस्यभा
क् अप्यंतानुग्रहेत्वपि न दशमांशातिरिक्तस्य भागिति एतन्मते नाधिकं दशमा
दद्यादिति वचनं प्रसादरदानविधायकमिति लभ्यते कुल्लूकभट्टस्तु यद्यपीत्यादि
मनुवचनं ब्राह्मणक्षत्रियविशामिति मनुवचनस्योविरोधं गुणापेक्षया ऊढाप
परितया च विकल्पेन समाधत्ते अनपत्यस्य शुश्रूषुर्गुणवान् शूद्रयोनिषु ल
भेतां जीवनं शेषं सपिण्डाः समवाप्नुयुः इति बृहस्पतिवचनं अपरिगृहीतास्त्रिय
धिकारादनूढापुत्रविषयं इति चण्डेश्वरः अन्यथा निषाद एकपुत्रस्तु विप्रस्व
स्यात् तृतीयभाक् इति देवलोक्तेन विरोधः स्यादिति भावः गोतमस्य शूद्रापुत्रोप्यनपत्य
स्य शुश्रूषुश्चेत् लभते वृत्तिमूलमन्तेवासिविधिना अन्तेवासिविधिना शुश्रूषुः
चेत् शूद्रापुत्रसदा अनपत्यस्यापि तु धनं वृत्तिमूलं लभेत इत्यर्थः अन्तेवासी शिष्यः
अत्र [illegible] रत्नाकरकारः अनूढाशूद्रापुत्रोऽपि
वर्णत्रय अविद्यमानस्य द्विजातिपुत्रस्य वृत्तिमूलं कृष्यादिरूपजीवनमूलं कृष्यादि
रूपजीवनमूलं किंचित् लभते यदि शुश्रूषुरन्तेवासिरदारधनकृतास्यादित्यर्थः यच्चन
स्वैपित्रादत्तं नहरिष्यन्ति आहतुः शंखलिखितौ न शूद्रापुत्रोर्थभागी यद्येवास्यपि
ता दद्यात् स एवास्य भागः तस्य गोमिथुनं चापरं दद्यात् कृष्णायसं कृष्णधान्यं ति
लवज्जीमित्याह एतद्वचनमपि चंडेश्वरः फलतोऽनूढापुत्रविषयत्वेन व्याख्यातवा
न् ब्राह्मणक्षत्रियविशामित्यादिमनुवचनमपि पुत्रतत् समानविषयत्वे व्याख्या
तुं शक्यते इति केचित् गोतमः शूद्रापुत्रवत् प्रतिलोमास्तु इति रत्नाकर वर्णाद्वीजा
तः शूद्रापुत्रवत् अन्तेवासिविधायाशुश्रूषुधर्मलमात्रभागित्यर्थः इति चण्डेश्वरः इ
तरवर्णोत्तिवर्णाशंकरः जातास्त्वित्यर्थः शूद्राणां तु सधर्माणः सर्वेपध्वंसजाः स्मृ
तः इति वचनं मसंस्मृतीवाजिताकारिपत्तुनस्य शूद्रावद्व्यवहार इत्यतउक्तं प्रतिलोमा

सुस्त्रीषु जातानामपि शुश्रूषमाणानां शूद्रावज्जीवनं देयमित्यर्थः इत्याह प्रतिलो
माच भर्त्रीपेक्षयाउत्कृष्टवर्णा ब्राह्मणपादिविवाहात् पूर्वमेव विवाहिता क्षत्रिया
दिर्वा इति मिताक्षरा भर्त्रादिनां वैश्यापदिजाति सुस्त्रीषु जनित पुत्राजीवनं हू
प्यादि मूलं हले पकुलादि लभते इत्याहुः क्षत्रियवैश्ययोः सगुणोद्राप्य दूपुत्र भाग
मारह् विप्रद्विजातीनां शूद्रस्त्वेकस्तु चोर्द्धहरः अपुत्र अवश्यस्य यागतिः सावाद्वेस्प
द्वितीयस्य अत्र रत्नाकरः द्विजातीनां ब्राह्मणव्यतिरिक्तानां क्षत्रियवैश्यानां ब्राह्म
णं जेष्यशूद्रापुत्रेरेव त्वेनतती यांशस्योक्तत्वात् द्वितीय इति सगुणनिर्गुणपरतया
पिव्याख्यानं संभवति तत्सर्वं चै ग्रंथवाहुल्यं वर्द्धेत नहीदानीमेतत्प्रवर्त्तते प्रयो
जनमस्ति असवर्णविवाहस्यैव कलौ निषेधात् तथाहि चहुन्नारदीयं समुद्रया
त्रास्वीकारः कमण्डलुविधारणं द्विजानामसवर्णासु कन्यासूपयमस्तथा इत्यादि
न्यभिधाय इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः इति समुद्रयात्रास्वी
कारः समुद्रस्य चतुर्दिक्षु भ्रमणं कमण्डलुविधारणं भरस्सस्पृश्या यज्ञोपवीतत्वे
पार्श्वस्थोदकस्य कमण्डलुः इति स्मृतिरिति पंडिताः आदित्यपुराणं च कन्याना
मसवर्णानां विवाहाश्च द्विजातिभिः आततायि द्विजाग्र्याणां धर्मयुद्धेन हिंसनं
इत्यादिनभिधाय एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः निवर्त्तितानि क
र्माणि व्यवस्था पूर्वकं बुधैः समयश्चापि साधूनां प्रमाणं वेदवद्भवेत् ननुव्यव
स्थापूर्वकं बुधैर्निवर्त्तितानी त्युक्तेः श्रुत्यवेधि नानि वर्तितव्यानीत्यनेनसाचाप्युक्ता
इत्यत उक्तं समयश्चापीति समयः सम्वित्समयांश याथाचारकालसिद्धांतसं
विदइ त्यमरोक्तः सम्वित्प्रतिज्ञा सम्विदागः प्रतिज्ञानं नियमाश्रवसंश्र
वाः इत्यमरोक्तेः साधूनां दोषरहितानां दोषाश्चस्वभाविकाज्ञानं येन गंगायांसा
मान्यव रिबुद्धिः अधनवाधानं च येन पुरोवर्तिनोऽपि वस्तुनः सम्भ्रमारसत्व
बुद्धिः प्रातारणं ब्रचेपस्यासत्यपि धने धनंनास्तीति ब्रूते इंद्रियदौर्बल्यं च येन स
म्यवस्तनिरीक्षणादिकं न भवतीत्यादयः तत् शून्यस्य पुरुषस्य वाक्यं वेदव
द्यवहर्त्तव्यं दोषवत्पुरुषाप्रयुक्तत्वरूपगुणयोगेन वेदतुल्यत्वादिति भावः
याज्ञवल्क्यः जातोपिदास्यां शूद्रेण कामतोंशहरो भवेत् मृतेपितरि कुर्युस्तं भ्रा
तरस्त्वर्द्धभागिनं कामतः पितुरिच्छयाविभागं लभते इति तु पितृकृतविभागवि
षयं तेन सवर्णपुत्रादिभागिदानां चयपकल्पेसत्त्वित्तं अत्रत इत्यपुनरपरि
णीतनतदास्यादि शूद्रापुत्रः पितुरनुमत्या पुत्रांतरतुल्यांशहा इति जीमूतवा
हनः तथा च इदं पिता यद्यब्रवीत् अस्मै तुल्यांशो देय इति तदा विभागका ५६

श्लोकः २१

ऽपुत्रा अस्मै समांशं हरेयुरित्यपि व्यंजितं मते पितरि इत्यादिग्रन्थेन हि परिणीता
पुत्रा अर्द्धभागिने तस्मात् परिणीताविषयादृशोंऽशोऽभिमतः तस्मादर्द्धभागिनेकु
र्युः तथा च भर्त्रीपेस्या अनुरूपाया दासाः पुत्रः पूर्णांशाई आमुष्यादित्यर्थः
अयं भिन्नाभ्रातरा रत्नाकराद्याशयः प्रायः परिणीतापुत्राभावे आह स एव भ्रात
को हरेत्सर्वं दुहितृणां सुता हते परिणीतापुत्रदौहित्राभावे दासीपुत्र एव स
र्वं धर्मं पितृधनं गृह्णीयादिति रत्नाकराशयः मिताक्षरायामेवं तद्वचने अंशहरः
इत्यत्र पुत्र[illegible]तुल्योहरः इति शूलपाणिस्मार्त्तीयः तथा च परिणीतापुत्राणां
शास्त्रं विनान्यनाधिकविभागं न कुर्य्यादिति व्यंजितं सति तु दौहित्रे तु स्यौरसी
यसंतान तत्र न दासीपुत्रस्यापरिणीतास दासस्यां वा यः शूद्रस्य सुतो भवेत् सो
भ्युपातो हरेदंशमिति धर्मेप्येवस्थितः दास दास्यां परिचारकदास्यामिति
कुल्लूकभट्टोप्येवं एवं ऐश्वरस्तु दास्यां च भ्रातृन्ता द्युक्तलक्षणवत्यां
दासदास्यां तथाविधलक्षणवत्यां तदृदास्यामुत्पन्नः दासायां जातो दासाज्जातोः
शिनयामत इति व्यवस्थितो धर्म इत्याह पुनर्मनुः यं ब्राह्मणस्तु शूद्रायां का
मादुत्पादयेत्सुतं स पारयन्नेव शवस्तस्मात्पारशवः स्मृतः एतदपरि
णीताविषयमिति जीमूतवाहन कुल्लूकभट्टास्तु परिणीताविषयमाहुरपि
तस्याद्दौ फलस्यासंपूर्णत्वात् शवतुल्यत्वं चाह ॥ ० ॥ ॥ ॥ ० ॥
इति विवादभंगार्णवे पंचमो दायभागे द्वितीये श्रीजगन्नाथशर्म मणिप्रवालर
त्नं तृतीयं ॥ ॥ अथ नानाविधपुत्राणां पितृधनस्वाम्ये विशेषश्रुति
मत्यर्थे प्रथमं तत्र निरूप्यते तत्र मनुः पुत्रान्द्वादशयानाह नृणां स्वायं
भुवो मनुः तेषां षड् बन्धुदायादाः षडदायादबान्धवाः औरसः क्षेत्रजश्चै
व दत्तः कृत्रिम एव च गूढोत्पन्नोपविद्धश्च दायादा बान्धवाः स्वयंभुवो ब्राह्म
णः पुत्रो मनुः चतुर्दशानां मनूनामाद्यो मनुः स यान् नृणां द्वादश पुत्रानाह
तेषां मध्ये पूर्वे षट् बान्धवाश्च उच्यन्ते गोत्रदायादाश्च एतत्फलं बान्धवत्वेन तपि
एउसमानोदकानां पिण्डोदकादि कुर्वन्ति गोत्रदायादत्वेन पितुरन्यस्यापि
पुत्राद्यभावे दायं गृह्णन्ति च उत्तरे च षट् पितुरन्यस्य धनहारिणो न स्युः
पितुर्धनभागिनस्तु भवन्त्येव पुत्राः कृत्यहराः पितुः इत्यविशेषेण वच
नात् श्राद्धक्रिया चैत्सर्वेषां धनहारिणो भवन्ति न त्वहिंनिमित्तं न सम्बन्धाः प
रं तु श्रोत्रियत्वमेवगते च बांधवा भवन्ति तेन बंधुकार्य्यमुदकक्रियादिकं कुर्वन्ती
ति कुल्लूकभट्टाभिप्रायः मेधातिथिस्तु षडदायादबांधवाश्चत्वारस्त्वहदत्रोत्तरंतत्त

समासं व्याख्याय आदायेदत्वं सबंधुत्वंचाह अदायादत्वंदपितृभिन्नस्य इति
तन्नबौधायनेनतेयामपिबंधुत्वाभिधानात् यथाबौधायनः कानीनंचसहोढं
चक्रीतंपौनर्भवंतथा स्वयंदत्तंनिषादंचगोत्रभाजःप्रचक्षते वस्तुतस्तुया
ज्ञवल्क्येनद्वादशपुत्रानभिधाय पिंडदोंशहरश्चैषांपूर्वाभावेपरःपरः
इ त्यभिधानात्सर्वेषामेवपितृपिंडदत्वंस्फुटं अन्यपिंडदत्वास्वीकारेतु सति
विरहः एतेनगोत्रभाजस्तेसर्वएवपिंडदाबांधवः इतिनियमः असपिंडदत्व
दासीनस्यापितथात्वापत्तेरितिनिरस्तं पुनर्बौधायनः औरसंक्षेत्रिकापुत्रंक्षे
त्रजंदत्तकृत्रिमौ गूढंचैवापविद्धंचऋ क्थभाजःप्रचक्षते इतिएतच्चऋ
क्थभाक्त्वंपूर्वोक्तषट्कव्यक्तत्वात् पितृभिन्नस्यापीतिबोद्धव्यं नन्वेषांऔ
रसादीनांषण्णांकस्यगोत्रभागित्वंजनकस्यउभयस्यपुत्रोभविष्यतितस्यैवत
थाहि एतेभ्योऽपकृष्टाःकानीनादयःयदिगोत्रंप्राप्नुवंतिकिंतर्हिनतदितरेइति
औरसस्तुसुतरांसिद्धः क्षेत्रेष्टमाहपुरोव गोत्रऋक्थेजनयितुर्नहरेद्दत्रिमःसु
तः गोत्रऋक्थानुगःपिंडोव्यपैतिददतःस्वधा अत्रस्वधाशब्दःपितृभस्यार्थः
अथयदिजनकस्यगोत्रंनभजतेतदासुतरांप्रतिग्रहीतुरेवगोत्रंभजतेअतएव
कालिकापुराणे औरसक्षेत्रजश्चैवदत्तःकृत्रिमएव इत्यादिनुपक्रम्यस्वगो
त्रेणैवएषांसंस्कारकरणमुक्तं यथा पितुर्गोत्रेणयःपुत्रःसंस्कृतःपृथिवीप
ते आचूडांतंनपुत्रःसपुत्रतांयातिचान्यतः चूडाद्यायदिसंस्कारानिजगो
त्रेणैवकृताःदत्ताद्यास्तनयास्तस्युरन्यथादासउच्यते पूर्ववचनेपितुःजनक
स्यअन्यतःसन्यस्यतथाच चूडाएवपरपुत्रत्वबीजंजातकर्मअन्नप्राशनना
नांनियमकत्वमितिसाचूडायदिउपनयनकालेक्रियतेतथापिसिध्यतिकिंग्र
हणंपंचवर्षमध्यएवयथा कालिकापुराणे ऊर्द्ध्वंतुपंचमाद्वर्षात्नदत्ताद्याः
सुतान्नृपः गृहीत्वापंचवर्षीयंपुत्रेष्टिंप्रागःसाग्निनिर्वपेत्तुमहाव्याहृति
होमइतिवक्ष्यते नतुपंचवर्षसमर्थेयथाविधिगृहीतामतस्तत्रस्यपुत्रोऽस्य
श्राद्धाद्यधिकारीनराः अत्रकेचित् चूडाद्यायदिसंस्कारानिजगोत्रेण
वैकृताःदत्ताद्यास्तनयास्तस्युरितिकथनात्चूडादिसंस्काराणांनिजगोत्रेण
तस्यपुत्रत्वंनभवतीतिश्राद्धाधिकारीपिनभवातीत्याहुस्तन्नजनकगोत्रेण
चूडाकरणेदत्तपुत्रत्वासिद्धिसंपादनार्थमेयतद्वचनस्योक्तत्वात् अन्य
थाचूडाद्याइत्यत्राद्यपदग्राह्यविवाहपर्यंतासंभवेऽपिपुत्रत्वासिद्धिस्त
तश्चप्रतिग्रहीतुगोत्रेणकृतेचूडोपनयनेपिनसिद्ध्यतांअंगीहीनेवाभव ५७

श्लोकः २+

ताभिति न स्यचा संस्कारवैकल्पमेव स्यात् एवं च पुत्रत्वप्रयोजनं ग्रहणमेव त
त्वासिद्धिप्रयोजकं तु पूर्वगोत्रेणाचूडाकरणं प्रत्याख्यानवत् दृष्टापूर्त्तीद्वीप
वींगोत्राभ्यां रणोऽपि न पुत्रत्वासिद्धिः अत्र वीजं दीप्पी शोणितमात्रं धा जन्म एकं सं
स्कारेण च जन्मान्तरकस्यचिन तुल्यं वा वीजसेकेन पुत्रमुत्पाद्य यद्यन्यस्मै ददा
ति स च संस्कारेण पुनर्जनिमत्ति तदा दातुः सम्बंधविनाशेन ग्रहीतुरेव संबंधो
भवति अनंतरं भ्रांत्या गोत्रव्यतिक्रमेपि न जन्मासिद्धिरिति अधिकमनुपदमेव
वक्ष्यते इति। केचित् अलं विस्तरेण मनुर्वोधायनाभ्यां तु द्वादशपुत्राणाम ए
क एव क्रम उक्तः अन्यैस्तु अन्यः क्रमः यथा गौतमः पुत्रा औरसक्षेत्रजदत्तकृ
गू त्रि ढोत्पन्नापविद्धा ऋक्थभाजः कानीनसहोढपौनर्भवपुत्रिकापुत्रस्वयंद
त्तक्रीता गोत्रभाजश्चतुर्थांशिन इति विष्णुः अथ द्वादश पुत्रा भवंति स्वे क्षेत्रे स्व
यमुत्पादितादितः प्रथमः इति अयमेवौरसः वशिष्ठे कृताकृतत्वात् विष्णुः नियु
क्तायां सवर्णेन चोत्पादितः क्षेत्रजो द्वितीयः विष्णुः पत्न्यस्याः पुत्रः स मे पुत्रो
भवेत् इति या पित्रा दत्ता पुत्रिकाविधिना दत्तापि प्रतिपादिताभ्रातृहीना पुत्रि
कोत्व विष्णुः चतुर्थो पौनर्भवः विष्णुः कानीनः पंचमः विष्णुः गूढोत्पन्नः षष्ठो
यस्य तल्पे यस्तस्यासौ पुनर्विष्णुः सहोढः सप्तमः गर्भिणी या संक्रियते त
स्याः पुत्रः स तु पाणिग्राहस्य पुनर्विष्णुः दत्तकश्चाष्टमः स च मात्रा पित्रा वाय
स्य दत्तः पुनर्विष्णुः विक्रीतश्च नवमः पुनर्विष्णुः स्वयं चोपगतो दशमः स
च यस्योपगतः पुनर्विष्णुः अपविद्धस्त्वेकादशः स च मात्रा पित्रा वा परित्यक्तो
येन गृहीतः पुनर्विष्णुः यत्र क्वचनोत्पादितस्तु द्वादशः अयमेव शौद्र उच्यते
इति विष्णुनोक्तः क्रमः शंखलिखिताभ्यां वान्यादृशक्रम उक्तः अपविद्धः सहो
ढो दत्तः क्रीतः शूद्रापुत्रः उपगतश्च स्वयमित्यदायादाः षडेव पुत्राः तथा षड
दायादेषु विकल्पाः औरसक्षेत्रजः पौनर्भवः कानीनो गूढोत्पन्नश्चेति षड्
बंधुदायादा इति हारीतोन्यापत्त्यपोक्तः यथा सध्या स्वयः सुत्पादितः अत्र
जः पौनर्भवः स्वयमुपागतः सहषाढश्चेति वंधुदायादा इति वारदश्च औ
रसः क्षेत्रजश्चैव पुत्रिकापुत्र एव च कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव
च पौनर्भवोऽपविद्धश्च दत्तः क्रीतः कृतस्तथा स्वयं चोपगतः पुत्रो द्वादशैते प्र
कीर्तिताः तेषां षड्बंधुदायादाः षडदायादबांधवाः पूर्वः पूर्वः स्मृत ज्येष्ठो ज
घन्यो यो यउत्तरः क्रमादेते प्रवर्त्स्यंते मृते पितरि तद्धने ज्यायसो ज्यायसो ऽभा
वे जघन्यो यो यमाप्नुयात् इति औरसपुत्रिकापुत्रक्षेत्रज कानीनपौनर्भ

वरदत्तक्रीतकृत्रिमस्वयंदत्तसहोढापविद्धानभिधाय: मात्रवा[illegible]न्का:
पिण्डदो ऽंशहरश्चैषां पूर्वाभावे परःपरः इति औरसपुत्रिकाक्षेत्रजातकानी
नगूढोत्पन्नापविद्धसहोढपौनर्भवदत्तकस्वयमुपागतकृत्रिमकृत्ता
नभिधाय: देवल: एते द्वादश पुत्रास्तु संतत्यर्थ: सुदाहृता: आत्मजा:पर
जाश्चैव लब्धा याद्दच्छिकास्तथा तेषां षडेव बंधुदाःपूर्वे ऽन्ये पितुरेव षट् वि
शेषस्यापि पुत्राणामानुपूर्व्या विशिष्यते सर्वे चानौरसेस्यैते पुत्रा दायह
रा: स्मृता: औरसे पुनरुत्पन्ने तेषां ज्येष्ठं न विद्यते तेषां सवर्णा ये पुत्रास्ते
तृतीयांशभागिन: हीनास्तुमुपजीवेयुर्ग्रासाच्छादनसंभृता: यम: पुत्रा
स्तु द्वादश प्रोक्ता मुनिभिस्तत्वदर्शिभि तेषां षडेव बंधुदायादा: षड्दायादबां
धवा: स्वयमुत्पादितस्त्वेकः द्वितीयः क्षेत्रज: स्मृता: तृतीया: पुत्रिकापुत्रर
ति धर्मविदो विदु: पौनर्भवश्चतुर्थस्तु कानीनश्चैव पंचम: गूढे च गूढउ
त्पन्न: षष्ठेते पिंडदायका: अपविद्ध: सहोढश्च दत्त कृत्रिम एव च पंचमक्री
तपुत्रश्च पश्चोपनयातिस्वयं इत्येते संकरोत्पन्ना: षड्दायादबांधवा: का
लिकापुराणे च मनसा कृत एवक्रमउक्त: यथा औरस: क्षेत्रजश्चैव च[illegible]दत्त: कृत्रि
म एव च गूढोत्पन्नो ऽपविद्धश्च भागिहास्तनयाइमे कानीनश्च सहोढश्च क्री
त: पौनर्भवस्तथा स्वयंदत्तश्च शौद्रश्च षडिमे पुत्रपांसव: अभावे पूर्वपूर्वेषां
पुराणामभिषेचयेत् कश्चिद्विशेषश्चोक्त: पौनर्भवं स्वयंदत्तं दासं वाद्येन योजयेत्
इति अत्र नारदेन दत्तपुत्रस्त्वे ऽपि अपविद्धस्याधिकार उक्त: विष्णुना
च अपविद्धस्त्वे दत्तस्याधिकार उक्त: एवं अत्रोणे नाना मुनीनां विवादे उपस्थि
ते समाधाय अन्ये क्रियते इदानीं तु तेषां स्वरूपज्ञानं विपनाग्रणविविवेचना
या असंभवात् तत्र औरसपुत्रस्य स्वरूपमाह वशिष्ठ: द्वादशत्वेव पुत्रा:
पुराणदृष्टा: स्वयमुत्पादित: स्वक्षेत्रे संस्कृतायामौरस: प्रथम: पुराणदृष्टाइ
त्यनेन शास्त्रसम्मतत्वं सुदृढीकृतं तेनापि अस्माभिस्तु तद्वाक्य[illegible]मात्रस्य एव
प्रामाण्यं स्वीक्रियते स्वयमुत्पादित इति क्षेत्रजव्यावृत्तये संस्कृत इति क्षेत्र
विशेषणं विवाहेन संस्कृतायामित्यर्थ: एतेन च तद्वाहमिस्पगताया: स्वयंदत्ता
या: भार्याया व्यावृत्ति: कृता: प्रथमत्वाच्चाक्रमे प्रथमो कल्यानं सर्वत्राधकृ
इत्यर्थ: अत्र विचार: पुत्रिकाप्रकरणे वक्ष्यते इति विष्णु: अथ द्वादशपु
त्रा भवन्ति स्वक्षेत्रे स्वयमुत्पादित: परक्षेत्रे नियोगेन स्वयमुत्पादित: पौ ५८
प्रथम: परक्षेत्रे नियोगेन स्वयमुत्पादित: पौनर्भवेन वमपुत्र एवातर्भ

विष्पतीतितत्प्रकरण एवानुसन्धेयं वशिष्ठेकवाक्यत्वात्संस्कृतेइतिपू
रणीयं मत्तुः संस्कृतायांतु भार्यायांस्वयमुत्पादयेत्तुयं तमौरसंवीजा
नीयात्पुत्रंप्रथमकल्पितं अत्रप्रथमचरणेस्वक्षेत्रेसंस्कृतायांतु इ
तिकुल्लूकभट्टसम्मतः पाठः स्वभार्यायामेवविवाहसंस्कृतायांयमुत्पाद
येत् तमौरसंपुत्रंमुख्यंविद्यादितितद्व्याख्यानं केवलं संस्कृतायांतुभा
र्यायांस्वयमुत्पादितोहियः औरसोनामपुत्रः सप्रधानपितृवंशधृक्
प्रधानंपितृवंशधृगितिउत्कृष्टवंशधारित्वात् स्तुतिबोधाय [illegible]ः सवर्णा
यांसंस्कृतायांस्वयमुत्पादितमौरसंविद्यादिति अत्रसवर्णायामित्युक्त
त्वात् ब्राह्मणस्यब्राह्मण्यामेवजातऔरसइतिलभ्यते अतएवकुल्लू
कभट्टेनापि सवर्णायामित्यादिबोधायनवचनात्स्वजातीयामेवस्व
यमुत्पादितऔरसोज्ञेयः इत्युक्तं अतएवशंखलिखितौ ब्राह्मणः स
वर्णायांपाणिंगृहीयात् तस्यापितामहानांतनवोऽनुपन्नेपुत्रोपचा
रेणात्मानंसंमंत्रयेत् आत्मा: परं गुप्तिभ्यां अंगादंगादितिलिखितं आपस्तंबपि
तरौगर्भकुमारं स्वस्कंदसंसृजं मेयो हृदुरूपस्यात्मातस्मात्वमभिजायते
आत्मापुत्र इति प्रोक्तपितुर्मातुरनुग्रहात् पुन्नाम्नस्त्रायसेयस्मात्पु
त्रस्तेनासिसंज्ञितं तस्मांसवर्णायां अनुपश्यात्पितामहानां तनवःस्वय
न्तेयतः अंगादंगात्संभवसीति परस्परयामित्यर्थः पुत्रोपचारेणपुत्र
द्वारोपेण आत्मानंनिजंतत्रसंमन्त्रयेत् तथाचयः पुत्रः सपितात्रपिताच
कस्यचित्पुत्रस्तोऽपितत्स्वरूपएवइतिभावः यद्वायेनप्रकारेणविशिष्टत्वं
स्वरूपः पुरेशरीरेलोपशयनंकरोषि अतस्त्वं आत्मापित्रापसे अन्यथा
आत्मामानिस्यस्यजन्मैवनस्यात्ततथाच शरीरंस्वयएवतयजन्मइतिभा
वः आत्मात्वंपितुर्मातुश्चानुग्रहणात्पुत्रइतिप्रोक्तः पितरंमातरंचानु
गृह्यपुत्रइत्युक्तभवसीत्यर्थः ननुएकोनुग्रहइत्यत्राहपुन्नाइतिकेचित्
नरकस्यान्नामकस्यनामपुदितितस्मात्पितरं मातांच अनुगृह्य त्रायसेइ
त्यर्थः अथचापितांच अनुगृह्यत्वांपुत्रइतिवदंतीत्यर्थः शुभाशुभक
र्मकृतरणार्थेपरिगृह्यमाणेत्तनोः कारणतयाउपस्थितयोरूपकारकत्वा
मातापित्रोः पुन्नामनरकत्राणंतवोचितमेवपितामाताचत्वां ततकर्मके
र्त्वेनैवस्तुसर्वउल्लिखतीतिभावः एवंचसवर्णायामेवपुत्रोत्पत्तिस्तस्या
औरसपुत्रजन्मसवर्णामपूर्वोशास्त्रविहितायेत्तगच्छंतः पुत्रास्तेषांकर्मभिः

सम्बंधः दायेनाव्यतिक्रमः अपूर्वामिति नास्ति पूर्वो यस्य इति बहुव्रीहिः पू
र्वीत्वं तु प्रस्तुतविवाहकर्तृपेक्षया तस्याश्च अस्य पूर्वं यस्याः पतिर्नासीदिति एतेन
न पुनर्भूर्निराकृता तस्याश्च पूर्वमन्यत्र वाग्दत्तापि स्यान्न एवंभूतं इति प्रकाशर
त्नाकरौ शास्त्रविहितां शास्त्रेण पाणिग्रहणकर्मणा विहितां संस्कृतामिति
रत्नाकरः शास्त्रविहिता शास्त्रेणाविवाहोपयुक्तत्वेन विहिता कथिता पि
तृसपिण्डादिभिन्नामिति केचित् कर्मभिः अग्निहोत्रादिभिः तत एव प्रतिनिधीकृ
तीयाः मुख्यकल्पोऽयं इति दायेनाव्यतिक्रम इति पूर्वदायेनाव्यतिक्रमस्ते
षामेव कर्तव्य इत्यर्थः इति रत्नाकरः तत्र वदान्यपीन्याहिण इति भावः तथा
चास्तेम्बिनापि सवर्णाजातस्यैव पुत्रत्वं मुख्यमुक्तं औरसापेक्षया मुख्यश्चा
न्योनास्तीत्यपरे एतेरपि भिन्नवर्णापुत्रस्याप्यौरसत्वं स्वीक्रियते तदा सवर्णात्व
विशेषणं नोत्तिष्ठेत इति याज्ञवल्क्यापि औरसो धर्मपत्नी परिणीता सव
र्णा इति मिश्र पत्नीदुहितरश्चेत्यादियाज्ञवल्क्यवचनव्याख्याने पत्नीसव
र्णाज्येष्ठापत्नीतिवचनात् तदाह मनुः यदि स्वाश्चापराश्चैव विन्देरन् योषि
तो द्विजाः तासां वर्णक्रमेणैव ज्येष्ठ्यं पूजा च वेश्म च इति स्मार्त्ताः तत्र स्वाः स
वर्णाः असवर्णा इत्यर्थः औरसो धर्मपत्नीजः इति याज्ञवल्क्यवचनव्याख्या
न ऊढायां सजातीयायां स्वयमुत्पादित औरसः इति दीपकलिका सवर्णाधर्म
विवाहोढाय ·त्नीतस्यां जात औरसः पुत्रो मुख्यः अत्र च एते ग्रंथकाराः
स्पष्टार्थकनाम्ना मुनिवचनदर्शनात् सवर्णायां स्वयमुत्पादितमौरसं ब्रुव
ते तत्त्वच ... एतेऽस्वरसम्मतं मतस्तथा सति ब्राह्मणात् क्षत्रियायां जातस्य
द्वादशपुत्रबहिर्भावापत्तेः न च यत्र क्वचनोत्पादितस्तु द्वादश इति विष्णु
सूत्रोक्त द्वादशपुत्र एवासम्भावपानी ... ति वाच्यं मनुना तस्य शौद्र इत्यभि
धानात् भद्रपुत्रस्यैव द्वादशत्वयोगपत्त्वात् यथाह मनुः यं ब्राह्मणस्तु
शूद्रायां कामादुत्पादयेत्सुतं सपारयन्नेव शवस्तस्मात्पारशवः स्मृतः ए
वं क्षत्रियायामूढायां जातो यदि द्वादशः स्यात्तदा सर्वापेक्षयाऽनिकृष्टः
स्यात्तस्य सर्वैरेव मुनिभिः सर्वतोनिकृष्टत्वाभिधानात् न हि यपेत्तु धर्म्म
कार्य्यं शास्त्रानुमता तत्पुत्रस्य द्वादशपुत्रवहिर्भावः सर्वनिकृष्टत्वं वा संभवति
इति तस्मात्स्वएवायेसमाधेः सवर्णात्र द्विजस्य सम्प्रसन तु ब्राह्मणस्य ब्राह्म
ण्येवेति पारिजातोऽप्येवं औरसपुत्रमाना मरकुलं प्रसिद्धं पितृकुलं च दायग्रा
हित्वं श्राद्धाद्यधिकारं चास्य स्पष्टमेवेत्यलं विस्तरेण अथ पुत्रिकापुत्रः अयं ५९

द्वितीयः इति याज्ञवल्क्योक्तः औरसो धर्मपत्नीजः इत्यौरसपुत्र विवेचनोत्तरं त
त्समः पुत्रिकासुतः इति तेनाभिधानात् बौधायनोऽपि औरसं पुत्रिकापुत्रं
क्षेत्रजं दत्तं कृत्रिमो इत्यनेन क्षेत्रजात् पूर्वं औरसानन्तरं पुत्रिकापुत्रो यन्या
सः कृतः तत्तुल्यः पुत्रिकापुत्रः दायादः सोऽस्य वा भवेत् पितुर्मातामहस्या
पि निरपत्यस्य पुत्रवत् बृहस्पतिना च क्षेत्रजापेक्षया पुत्रिकापुत्रस्यफ
न उत्कर्ष उक्तः यथा दत्तोऽपविद्धः क्रीतश्च कृतः शौद्रस्तथैव च जातिशुद्धा
कर्मस्तु हीना मध्यमास्ते सुतामताः क्षेत्रजो गर्हितः सद्भिस्तथा योनर्भवः सुतः
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च तथा च तदितरस्य उत् कृष्टत्वमा
यातं तदितरश्च औरसः सवर्णादिसिद्धः पुत्रिकापुत्रश्च इति विज्ञेयः आ
ननस्य मुपागतस्तु नोक्तः तस्या च केनचि औरसात् किंचिन्न्यूनत्वा कथना
त् उत्कर्षमध्यगणनमयुक्तं किंतु अन्यत्रैव तद्ग्रन्थे विवेचयिष्यते नारदेन तु
पुत्रिकापुत्रस्य तृतीयत्वमुक्तं द्वितीयत्वं अत्रजस्य यथा औरसः क्षेत्रज
श्चैव पुत्रिकापुत्र एव च इति वशिष्ठेन च तृतीय पुत्रिका विज्ञायते अभ्रातृ
का हि वंशः पितॄणां इति प्रतीचीनं गच्छति पुत्रत्वं तृतीयः पुत्रिका औरस
पुत्र तुल्यात् तत्कार्यकारित्वात् अत्र प्रतीचीनं गच्छति प्रत्यावृत्तं अपुत्र
त्वं पितृकुलाभिमुखं गच्छतीत्यर्थः इति रत्नाकरः अयं भावः अन्या च दुहि
ता पितृकुलं परित्यज्य भर्तृकुलं गच्छति तत्र संतानं जनयति इयं च पश्चा
द्दिशि परित्यक्तकुले मुखं कृत्वा गच्छति तत्कुल एव संतानकारित्वात् पु
त्रत्वमिति तथा च पुत्रेण यत्कर्तव्यं न तत्तयापि कर्तव्यमिति प्रत्यावृत्तसं
पादितं अनेन च पुत्रिकायाए व पुत्रत्वमुक्तं सदृशं तथा च तस्या एव दाया
द्यधिकारित्वमायाति एवं वचनेन तत्पुत्रस्यैव तद्ग्रन्थे विवेचयिष्यते
शंखलिखितौ पुत्रिकापुत्रवदिति प्राचेतसः अपत्यं पुत्रिकापुत्रो मातामा
हा पितृभ्यां पिंडदः पुत्रदौहित्रयोर्नी विशेषोऽस्ति अनुग्रहे तस्मात् संशया
अयं या दृश्यात्तत्को अत्र अनुग्रहे पुन्नाम नरकोद्धारे संशयात् इयं पुत्र
त्वेन परिगृहीता न वेश्याकारात् इति रत्नाकरः तथा च तस्मात् संशयाद्
श्यात्तकां कन्या विवाहार्थी नीयेयात् इत्यकोऽन्वयः पुत्रिका दुहिता पुत्रतु
ल्यात् तत्कार्यकारित्वात् इति प्राचेतसः प्रचेतः पुत्रोरसः आहतस्मा
अपत्यं पुत्रिकापुत्र उच्यते समात्तामहोपि पितृभ्यां पिण्डदः यात्तत् पुत्रदौ
हित्रयोर्नी विशेषोऽस्ति औरसपुत्रिकापुत्रयोर्नी विशेषोऽस्ति अनुग्रहेऽपि

श्लोकः २०

था औरसः पुत्रः पितरं पुत्रा म्नो नरका त्त्रायते तत्स्या मातामहमपि पुत्रि
का पुत्र इत्यर्थः एवं च मातामहस्य पुत्राम नरकत्राणकर्तृकत्वाभिधा
नात् जनकस्यापि तत्कर्तृत्वं अतः पुत्रिकासंशयेव चो न विरहतत्तु भ्रात
मती मिति वक्तुं जार्थः देवलः तत्तुल्यः पुत्रिकापुत्र इत्यादः सो भवे वा
त् पितुर्मातामहस्यापि विनिरपत्यस्य पुत्रवत् तत्तुल्यः औरसपुत्रतुल्यः
अत्र तत्समं पुत्रिकासुतः इति पाठ तत्व कव्यवचने व्याख्याने औरसतु
भाग इति दीपकलिकामिश्रायेवं अनएव पित्रा दृश्यत तत्समं भागं ल
भते तादृशी सुता इति ब्रह्मपुराणं अत एव मनुः पुत्रिकायां कृतायां तु यदि पु
त्रो ऽनुजायते समस्तत्र विभागः स्यात् ज्येष्ठता नास्ति हि स्त्रियाः इत्यु
क्तवान् अत्र पुत्रिकाया एव दायहारित्वमुक्तं किंतु पुत्रिकापुत्रस्य
च पौत्रत्वमुक्तं यथा अकृता वापि यं विन्देत्सदृशात्सुतं पौत्री मा
तामहस्तेन दद्यात्पिण्डं हरेद्धनं एवं मातुः प्रथमतः पिण्डं निर्वपेत्
पुत्रिकासुतः द्वितीयं तु पितुस्तस्याः तृतीयं तु पितुः पितुः अत्र मातृ
पिण्डदानं पितृस्वत्वाभिषिक्तं मा तामहपिण्डदानं च पितामहस्याला
भिषिक्ते पार्वण इति। तज्जनकस्य पौरसपुत्रान्तरस्य स्वत्वे तस्यापि पिण्ड
दातृत्वमुक्तं तस्यापि पार्वणं तेनैव कर्तव्यं तस्यापि पिण्डदातृत्वमुक्तं
तस्यापि पार्वणं तेनैव कर्तव्यं तस्यापि पुत्रात्वा इत एवोक्तं दौहित्रो ह्य
खिलं रिक्थमपुत्रस्य पितुर्हरेत् इति पितुर्जनकस्य इति कुल्लूकभट्टः
तस्या च तस्य पार्वणद्वयमिश्रमेव तस्या मातामहस्य तु जनकस्य
स्य अथवा एकस्मिन्नेव पितृपिण्डे नमहस्य कीर्तिनं द्विपितृकस्येव जव
त्त तथा च मातामहस्यस्यापि रूपद्वयेन पिण्डद्वय भीकृत्त्वं न तु तत्र
तादृद्वमातामहस्य पर्वसिद्धत्वात् मातयस स्तु द्विधेवइति तथा
च पुत्रिकैव पुत्र तुल्या न तु तत्र पुत्रः पुत्रिका लक्षणं तु वक्ष्यते मनुः न
चैवास्मात्तथा पुत्रः पुत्रेण दुहिता समा तस्यामात्मनि तिष्ठन्त्यां कथमन्यो
हरेद्धनं एवं च पुत्रिकापुत्रस्य पौत्रतुल्यत्वमेव अन्यविधपुत्रसत्त्वेऽ
पि औरसपुत्राभावे तादेव दायादो औरसपुत्रसत्त्वे तु सदृशांश्यारिक्थ
हारी तादिवचनस्य हीन्यात् तत्कुल्लूकभेदेन च औरसपुत्राभाव एव पुत्रिका
तत्पुत्रयोरधिकारित्वं पड्क्तं तस्य वीदायाधिकारित्वमेव न वक्तव्यमिति
मनुवचनानामनुपाराउच्यते एवं च तत्समः पुत्रिकासुतः इत्यादियाज्ञ ६०

श्लोकः २१—

वल्क्यादिवचनजातात् पुत्रिकापुत्रस्यापि न तत्समभागित्वं युज्यते न
च हारीतवचनेन सदृशांशग्रहणकथनात् समभागग्रहणमु
क्तं तत्सगणत्वातिसुक्षेत्रजादीनां बाधकत्वेन इति वाच्यं तस्य निर्गुण
पुत्रिकापुत्रपरत्वेऽपि सत्तिविरहात् ब्रह्मपुराणेन चतुर्थीभागभागित्वा
कथनात् ब्रह्मपुराणं त्रिभागं क्षेत्रजो भुंक्ते चतुर्थं पुत्रिकासुतः इति
अत एव नानावचनेषु पुत्रिकापुत्रस्य नानाविधभागदर्शनात् निर्गुणपु
त्रत्वकथनावश्यकत्वे सिद्धे सगुणस्य समभागकथनमेव युज्यते
पुत्रिकासुत इत्यत्र सिद्धे सगुणस्य समभागकल्पनमेव युज्यते पुत्रि
कासुत इत्यर्थं च कर्मधारयः इति जीमूतवाहनविज्ञानेश्वरादयः इ
ति केचिदाहुः अपरे तु पुत्रिकाकारणे मनुना अपुत्रोऽनेन विधिना सुतां
कुर्वीत पुत्रिकां यदपत्यं भवेदस्यां तन्मम स्यात् स्वधाकरं इति प्रतिज्ञा
या निर्देशात् पुत्रिकापुत्रस्यैव मातामहपुत्रत्वमवगम्यते अत एव च
पुत्रिकाविवाहानिन्दितः पुत्रिकायाः स्वपितृपुत्रत्वेन तत्पुत्रस्य तज्जन
कपुत्रत्वावारणात् पुत्रिकाविवाहस्यानिन्दितत्वापत्तेः तस्मात्पुत्रिका
पुत्र एव मातामहपुत्रः अत एव शंखलिखितौ पुत्रदौहित्रयोर्न विशे
षोऽस्त्यनुग्रह इति बौधायनापि अभ्युपाम्य दुहितरि जातं पुत्रिकापुत्रम
न्यं दौहित्रमिति एवं च मनुनापि पुत्रिकाया विभाग उक्तः न तन्मनुव
चनात्वानामस्येयं न चौत्तेन तस्याः पुत्रत्वमायाति विशिष्टेन च यः पुत्रिका
यां सुतत्वानिर्देश उक्तः सोऽतिदेश उक्तः सोऽतिदेश एव उभयोरेव पुत्रत्वेऽ
च चतुर्दशप्रकारापत्तिः न च विनिगमनाविरहः प्रतिज्ञया पुत्रिकापुत्र
स्यैव पुत्रत्वबोधनात् पुत्रिकाया एव पुत्रत्वे पार्वणलोपापत्तिः तस्मा
त्मातुः प्रथमतः पिण्डमिति गयायां पितृपूर्वकं इति कालपुराणे गयाग
मां पितृप्रसृत्याद्दौ कृत्वा मातृप्रसृत्याद्दमिति क्रम उक्तः तन्निवासार्थं तद
या च पुत्रिकापुत्रस्य सर्वविधेचमात्रमाहृता दो इति फलितार्थः त
स्य पौत्रत्वकीर्तनं च स्वजातजातत्वाभिसंधानात् दामयग्रहणं वस्व
पुत्राभाव एव पुत्रिकायाः तत्रैव उत्कर्षस्तस्याः पुत्रमात्रत्वयोग्यत्वात्
गोत्रं च पुत्रिकापुत्रस्य मातामहगोत्रमेव कालीनसाहोदापोनभिच
पुत्रिकापुत्रस्य यं दत्तक्रीतागोत्रभाजश्चतुर्थांशिन औरसाद्यभावे
इति गौतमसूत्रात् षड्दायादेषु विकल्पः औरसः क्षेत्रजः पुत्रिकापुत्रः

पौनर्भवः कानीनो गूढोत्पन्नश्चेति षट्पुत्रा वंधुदायादाः पितृपिता
महानामेव गोत्रारिक्थपिंडोदकपिंडभाक् चेति शंखलिखितस्त्रि
पितृपदेन सत्त्वेन निकारेरेव ग्रहणात् गोत्रमेकवाक्यत्वात् गूढोत्पन्न
साधारणत्वेन त्वम् पुत्रिकासुतः इत्यादियाज्ञवल्क्यवचनेन चः
औरसपुत्रतुल्यांशित्वमुक्तं परं तु इतरस्य पुत्रबाधकत्वं अन्यथा
पिंडदोंऽशहर श्चैषां पूर्वाभावे परः परः इत्यस्य अनुपपत्तेः
न च समस्तत्र विभागः स्यादन्येषु तु नानाज्ञिहि स्त्रियाः इति मनुना पु
त्रिकायाः समभाग एवोक्तः अन्यथान्येषां शस्तवानीदूरस्यैव स्या
त्तथा च पुत्रिकायाः पुत्रस्यापि समभागित्वे तुल्यन्यायात् सिद्धे वि
एडदोंऽशहर इत्यस्य सर्वदा [illegible] येहर इत्यर्थः श्चनन्माग्रहणे च और
सस्य अस्यल्पभागित्वापत्तेः न च पितरि मृते समुदाय धनास्यैवाधि
कारी औरसपुत्रश्चेतरपुत्रसत्त्वे तु तेभ्यः पितृयथाशास्त्रं अंशं दद्या
त् औरसपुत्रास्सत्त्वे तु ततीयभागैकभागं सेत्रजोगृह्णीयात् अवशि
ष्टधनं उत्तराधिकारिणो गृह्णीय इतरविधपुत्रसत्त्वे तु तेभ्योपि [illegible] अ
वशिष्टधनस्य यथाशास्त्रं अंशं दद्यात् इति वा [illegible] च्यं समुदायपुत्रस
त्वे औरसेन समुदायधने गृहीते अन्येषामधिकारित्वासंभावा
त् अत्र समाध औरसपुत्रसत्त्वे स एव सर्वं गृह्णीयात् अन्यविधैकपु
त्रसत्त्वे तु सपारिसेत्रजाः तृतीयभागैकभागं गृह्णीयात् यदि तु सपुत्रिका
पुत्रः तदा पारमेव गृह्णीयादिति क्रमः बहुपुत्रसमवाये तु शंखलिखि[illegible]ताः
दिवचनं प्रवर्त्तितेन त्वेतद्वचनं षड्दायादे पुविकल्पः औरसः सेत्रजः पुत्रिका
पुत्रः पौनर्भवः कानीनो गूढोत्पन्न षट्पुत्राः वंधुदायादाः पितृपितामहाः
नामेकगोत्रारिक्थपिंडोसापिण्ड्यं चमेषामर्थं दशधा कुर्युरित्त द्वौ भागौ पि
तृद्वौ औरसस्य त्रीन् सेत्रजपुत्रिकापुत्रयोरेकैकमितरेषां विकल्पोऽंशाव्य व
स्या इति रत्नाकरः बान्धवः गोत्रपिंडोदकभाजः दायादाः रिक्थभाजः स्वयमे
व वंधुपरं [illegible] दायादा रिक्थभाजः स्वयमेव वंधुपरं दायादपरं च विवृणोति
पितृपितामहानामित्यादि पितामहस्य ग्रहणं रिक्थस्यार्थप्रावेण्यादाद्यं चेदशधा
विभागः पितृकृत्तपैतामह धनस्य उपरते पितरि स्यो पित्रा भपि ग्रहणोत्तरम
वशिष्टं चाष्टभागाः द्वौ औरसस्य साद्धभागाः सेत्रजस्य सार्द्धः पुत्रिकापुत्रस्य च
एतयो तुल्यवैशम्यमनंगीकृत्य एव भोगः कर्त्तव्य इति चं जितं इतरेषां पौन ६१

श्लोकः ३०

र्भवकानीनगूढोत्पन्नानामेकैकोंश इति नतु दत्तक्रीतादेः चतुरंशपातः
इति वचनेषांग्रासाच्छादनमात्रं इति वचनतात्पर्य्यमेतच्च दत्तादीनामसव
र्णत्वेबोध्यं मिश्रास्तु अत्रमन्वादिभिः सर्वैरेव पुत्रान्तरसत्वे ऽप्यौरसस्य
सकलपितृधनग्राहकत्वमुक्तं तैरेव वचनैषामपि तत्रांशभागित्वमुक्तं अ
यं विरोध औरसस्य गुणवत्त्वे तेनैव सकलमग्राह्यं तस्य निर्गुणत्वे ऽ
न्येषां च सगुणत्वे च यथोक्तभागैर्नैव समाधेयः इत्याहुस्तच्चिन्त्यं निर्गुणे
रसस्य ब्रह्मपुराणे भागानुपदेशात् समग्रधनभोक्तापूर्णांश हर इ
त्यर्थः करणेपि दोषाभावात् बहवश्चेत्तु सदृशाः सर्वे रिक्थस्य भाजः
कानीनसहोढपौनर्भवपुत्रिकापुत्रस्वयंदत्तक्रीतागोत्रभाजः स्वतु
र्थांशिन औरसाद्यभावेगोत्रभाजः गोत्रेष्वन्येनेपिण्डोदकदानक्रिया
दिभिः पुत्रकार्य्यं कुर्वन्तीति तस्यार्थः तेएतच्च कानीनादीनां गोत्रभागि
त्वकथनं औरसादीनामेकतरस्याप्यसद्भावे ऽंशहरत्वप्रतिषेधार्थं च
तुर्थांशिन औरसाद्यभावे पितरि सति असति तु पितरि औरसाद्यभावे
क्रमेणैव रिक्थग्राहक एव इति रत्नाकरः क्रमेणेति क्रमोऽत्र पाठ
क्रम अनेन शब्दादिक्रमस्यानुकृत्वात् एतत्प्रकरणे स्वनीनांपर
स्परं विसंवादात् तेषां क्रमस्यानादेयत्वात् अत्र चायं विभागक्रमः पितृकृ
तविभागे औरसः पूर्णमंशं गृह्णीयात् क्षेत्रजारस्य च तृतीयं कानीना
द्यस्य ग्रासाच्छादनमात्रं औरसासत्वे तु क्षेत्रजः पूर्णमंशं दत्तादय
स्तृतीयांशं कानीनाद्याः पंचेति ते सर्व एव चतुर्थांशं तस्याश्च पिता
तद्गाहगुणं गृह्णीयादिति भावः अनेन तु पितरि औरसस्य तृतीयांशभा
गी क्षेत्रजादिः कानीनादयो जीवनमात्रभागिनः औरसाद्यभावे तु
कानीनादयो जीवमात्रभागिनः औरसाद्यभावे तु कानीनादीनां क्र
मप्राप्तो यस्तिष्ठति स सर्वहरः अपरस्तु तृतीयांशभागिति ननु औरः
स्य सत्वे क्षेत्रजस्य तृतीयांशभागित्वं औरसाद्यभावे कानीनसत्वे सहो
ढस्य च तृतीयांशभागित्वं कुत इति चेत् एतेषां गोत्रमेन विभागानुपदे
शात् देवलवचनात् औरसे वत्तृतीयांशः इति वचनं गोत्रमेन औरसादि
गूढोत्पन्नान्तानां च रिक्थभागित्वकथनेन औरसाद्यभावे कानीनादी
नां चतुर्थभागित्वकथनाच्च तेषां च तुल्यभागित्वमेव पर्य्यवस्यते इति वाच्य
न यथासति क्रमेण सर्वरिक्थस्य हरा एव इत्यस्य रत्नाकरोक्तस्यालग्नक

६२ त्वापत्तेः नहि औरसेन सह तुल्यांशित्वं क्षेत्रजादीनां क्वचित् दृष्टं सर्वे ह्य
नौरसस्यैते पुत्रा दायहराः स्मृताः इत्यादिनैव तद्व्यावर्त्तनात् अवैयर्थ्यवा
ब्रह्मपुराणवचनमपि पितृसत्त्वे एवं हि अंशयथा पितामहधनस्य तद
र्द्धस्य चतुर्थभागे कृभागः पुत्रिकापुत्रस्य तदर्द्धमेव औरसस्य इत्या
दिरूपो विभागक्रमः समग्रधनभोक्ता इत्यस्य च संपूर्णतांऽशभागि
त्वमर्थः मृते पितरि औरसेन यत्र लब्धं तत्तृतीयांशभागी क्षेत्रजः
तच्चतुर्थांशभागी पुत्रिकापुत्र इत्यादिक्रमः यथा यत्र पिता चतुः
विंशतिसुवर्णान् औरसः प्राप्नोति द्वादशसुवर्णान् औरसः षट्सुव
र्णान् क्षेत्रजः चतुरः सुवर्णान् पुत्रिकापुत्रः त्रीन् सुवर्णान् कृत्रिम
इत्यादि अथवा चतुरः सुवर्णान् क्षेत्रजः त्रीन् सवर्णान् पुत्रि
कापुत्र इत्यादिक्रमः मनुष्ये औरसो नास्ति क्षेत्रजपुत्रिकापुत्रकृत्रि
माः तत्र क्षेत्रजस्यैव क्रमप्राप्तत्वात् सर्वांशहरत्वं पुत्रिकापुत्रस्य की
दृशो भाग इति न च तच्चतुर्थांश एव चतुर्थं पुत्रिकासुत इति वचना
दिति वाच्यं तत्र औरसपुत्रचतुर्थांशस्यैव प्रक्रान्तत्वेन बोधितान्नव
क्षेत्रजस्य औरसस्याभावाभिषिक्तत्वे पुत्रिकापुत्रादीनामपि पूर्वस्य
लाभिषिक्तत्वात् तृतीयांशादिरेवं तेषां इति वाच्यं तादृशशास्त्रा
भावादिति चेत् औरसपुत्रत्वे क्षेत्रजेन पुत्रिकापुत्रस्य यादृशं विभाग
वैषम्यमासीत् इदानीमपि तादृशमेव कार्य्यं यथा क्षेत्रजांशतृती
यांशहीनः पुत्रिकापुत्रस्य षट्सुवर्णी क्षेत्रजेन लब्धेन तृतीयांशः सु
वर्णद्वयं तद्धीनश्चतुःसुवर्णात्मकः एवं कृत्रिमादावपि द्रष्टव्यं एवं वी
तिः पुत्रिकापुत्रादेरपि प्रधानत्वबोधनाय अत्र ब्रह्मपुराणे पु
त्रिकापुत्रस्य क्षेत्रजापेक्षयाऽपकर्ष उक्तः तत् क्षेत्रजस्योत्तमवी
र्य्यजत्वे अग्रे याज्ञवल्क्येन च उत्कर्ष उक्तः तत् पुत्रिकायाः उत्तमसंप्र
दानेऽपि यः उभयोरुत्तमत्वे समानत्वे च तृतीयांशचतुर्थांशचतुर्थांशौ
वा योजितौ ज्ञेयः शंखलिखितवचनं च उभयोरुत्तमत्वे सगुणत्वे च
किं नु एतेषां किंकरणीयं इति वाच्यं विषमविभागे पि ज्येष्ठांशशंकासं
भावात् यथा वयोज्येष्ठत्वात् ज्येष्ठांशः पुत्रिकात्वात् तत्पुत्रत्वात् द्वा चतु
र्थभागादिः इत्याशंका भवति तन्निरासार्थमेतत् समस्तत्र विभागः स्या
वा दितिमनूक्तिः सम इत्यस्य ज्येष्ठांशहीन इत्यर्थः अत एव औरसे पुनरुत्स

श्लोकः २१

त्रौतेषुज्येष्ठंनविद्यतेतेषांसवर्णायेपुत्रास्तेतृतीयांशभागिनः इत्यत्र
देवलो ज्येष्ठांशनिवर्तनंकृतवानित्याह अन्येतुतन्ममस्यात्तत्त्वधारकं
इतिमनुनोक्तं ननुममपुत्रइतिनस्याच्चेद्दिनैवनसपुत्रस्तस्यपुत्रस्तुपौ
त्रमेवनहंशस्त्वपुत्रीपितुर्वंशएवतस्याःपुत्रस्तुजनकतत्पित्राद
योमातामहश्चहौत्रेणएव पितुर्मातामहस्यापिनिरपत्यस्यपुत्रवत्तद्भिरे
वलवचनेसादृश्यमार्थिकवत्प्रस्यापौरुषपक्षेनिरपत्यस्येतितुपितुरित्य
त्राप्यन्वेति जनकपार्वणंनकर्तव्यमेवदौहित्रत्वतत्सपुत्रत्वरूपविलक्ष
णसंबंधाभावात्तस्यादिदुहितृत्वस्याघगामाचेपत्नीत्वेनतद्गतितत्र
प्रायःसर्वथास्वत्वनिवृत्तिमपिस्वीकरोति अयंतुसंभोगमात्रार्थंदत्तवा
न् अत्रतदुत्पन्नपुत्रेस्वत्वाकांक्षासत्वात्तन्नोत्रगोत्रपरिवर्तोऽपिनतुशु
क्रशोणितसंभवःपुत्रमातापितृनिमित्तकइतिवचनात् शुक्रनिमित्तक
त्वेनपुत्रेशुक्रसम्बंधिनःपितुरपितुल्यस्वत्वमस्तुनचैवंस्वजन्यनवत्
क्षेत्रिणःएवाधिकत्वंननुशुक्रःसत्यपदृतिवाच्यं अनुमतिसत्वेशुक्रस्यफ
लतःक्षेत्रिणामान्वितत्वात् अनवजामातुःपुत्रिकात्वज्ञानेऽपिपुत्रि
कापुत्रत्वसिद्धिः नदुक्तंशंखलिखिताभ्यां तस्मात्संशयान्नोपयच्छेदभ्रा
तृकांइतिचेन्नममेमतक्षेत्रेयेनकेनवित्तवीजवपनेऽपिममैवशस्यंभवि
ष्यतीतिऽभिसंधानत्वेवीजवापिनांर्द्धंयहीनव्यंइतिवाक्यसत्वेचक्षेत्रिण
एवतत्सस्यंइतिव्यवहारवरचकल्पनात् अथवापुत्रिकास्थलेयस्तुव
द्व्यवहारस्सैवस्वीकारः मनुः यथागोऽश्वोष्ट्रदासीषुमहिष्यजाविकासु
चनोत्पादकःप्रजाभागीतथैवान्यांगनास्वपि येक्षेत्रिणःबीजवन्तोःपर
क्षेत्रप्रवापिनः तेवैशस्यस्यजातस्यनलभंतेफलंक्वचित् यदन्यगोषु
वृषभोवत्सानांजनयेच्छतं गोमिनामेवतेवत्सामोघंस्कंदितमार्ष
भं तथैवाक्षेत्रिणोबीजंपरक्षेत्रेप्रवापिनःकुर्वंतिक्षेत्रिणामर्थंनबीजि
लभंतेफलं फलंत्वनभिसंधायक्षेत्रिणांबीजिनांतथा प्रत्यक्षंक्षेत्रि
णामर्थोबीजाद्योनिर्गरीयसी इतितत्वं किंतुबीजसम्बंधादपकृष्यस
म्बन्धोविद्यते इतितुविशेषः इयंचपुत्रिकामनुनाजन्मोदृशेभ्यःपुत्रे
भ्योऽतिरिक्ताउक्तानचास्याःपुत्रत्वं अतःपुत्रप्रकरणबहिर्भावः पुत्रिकापु
त्रश्च अपरेणमुनिनोक्तः अत्रकेनचित्स्वयमुपागतोनोक्तःकेनचित्कौ
क्षत्रत्वतएतन्मतेयथापुत्राभावेपौत्रोअधिकारीतथा अत्रकेनचित्पुत्रि

काभावेतत्पुत्रः नचपुत्रिकाद्वयकरणेएकस्याश्चमरणेतत्पुत्रेणस
हअन्यस्याःपुत्रिकायास्तुल्योऽधिकारस्यादितिवाच्यंशेषस्यानुमतत्वे
ष्टत्वात् वृहस्पतिः एकएवौरसःपुत्रोधनस्वामीप्रकीर्त्तितःतत्तुल्या
पुत्रिकाप्रोक्ताभर्त्तव्यास्त्वपरेसुताः अतएव प्रतीतिचीनंगच्छतिपुत्र
त्वंतृतीयःपुत्रःपुत्रिका इतिवशिष्ठवचनं आप्यतत्समानंनन्वेवंक
शिष्टोक्तप्रतिज्ञायाविरोधः यथा अभ्रातृकांप्रदास्यामितुभ्यंकन्या
मलंकृतां अस्यांयोजायतेपुत्रःसमेपुत्रोभवेदिति अत्रपुत्रिकापु
त्रस्यैवपुत्रत्वस्वीकारादितिचेन्नपुत्रपुत्रपरद्वयस्यवंशपरत्वात्तए
वचदुहितृवंशस्यतत्पितृवंशत्वात्तन्मूलीभूताया दुहितुःपुत्रतु
ल्यत्वमायातं वस्तुतः इयंपुत्री ममपुत्रवद्वंशंकरोत्वितिसंधानात्पुत्रि
केवपुत्रः तस्याश्चगोत्रपरिवर्त्तोनभवति अस्याःपुत्रममपुत्रोभव
त्वित्यभिसंधानादौनत्पुत्रएवपुत्रः तत्रवतत्पुत्रस्यैवमातामहपु
त्रत्वंनतुतस्याइतिवस्तुतेमत्तुमतेपुत्रिकायाःपार्वणाद्यधिकारोना
स्तिवस्तुतःस्त्रीत्वात्तत्पुत्रस्यमातामातामही प्रमातामहीचमातृपक्षः
मातामातामहःप्रमातामहश्चपितृपक्षःमातामहादित्रयंमातामहप
क्षःक्वचिदेकस्यापिद्वैरूप्यंस्वीकार्यमेव अन्यमतेतुमाताप्रमातामही
वृद्धप्रमातामहीचेतिमातृपक्षः मातामहादित्रयंपितृपक्षःमातामह
पक्षस्तुनास्तितत्रतासिद्धत्वात् नच आकृतिंस्वयंप्रभावादपिश्राद्ध
मर्त्तीमपः पुत्रिकाधर्मम्याश्रित्यशतरूपानुमोदितः इतिभागवतस्मृतेः
शतरूपानाम्न्यापत्न्यासहितस्यैवस्वायंभुवोमनोःपुत्रिकाकरणदर्शना
न्मातामहस्यैवमातेतिवाच्यंजनन्यामातृत्वेबाधकाभावेतस्याःसप
त्नीमातृवत् अतिदिष्टमातृत्वमात्रकल्पनात् पुत्रिकापुत्रस्यक्षेत्रजा
पेक्षयाउत्कर्षबीजंअभ्यजारजातत्वमनुमत्यैव याज्ञवल्क्यादिभिः
द्वितीयत्वमुक्तंवशिष्ठादिभिश्चतस्यक्षेत्रजापेक्षयानिर्गुणत्वमपक्षे
वतृतीयत्वमुक्तंनतुपरकीयशुक्रस्तेजोभयजात्वरूपापकर्षनतस्येत्र
स्यसंतानोत्सादनरूपसत्वाविनाशात्भोग्याधिवत् ब्रह्मपुराणे समग्र
धनभोक्तास्याद्धौरसोपिजघन्यजःत्रिभागंक्षेत्रजोभुंक्तेचतुर्थंपुत्रिका
सुतः अत्रकीदृशोविभागः नतावत्समग्रधनानित्रिधाकृत्वाप्यदवतिनत
स्यैत्रजस्यचतुर्धीकरणेपञ्चवनितत्पुत्रिकापुत्रस्यपंचधाकरणेयद्धनितत्

क्रित्रिमस्य एवं वीत्याभ्युह्यापुत्रपर्यंतं विभागाः करणीय इति तथास्व
ती औरसादेर्निर्विशेषतायनेः तथाहि पंचदशवर्णस्य देवात् द्वादशविध
पुत्रसत्वे क्षेत्रजस्य पंचसुवर्णाः पौरौनस्य सुवर्णचतुष्टयं पुत्रिकापुत्रस्य
सुवर्णत्रयं कृत्रिमस्य सार्द्धवयसुवर्णगृहोत्पन्नस्य किंचिदधिकसुवर्ण
द्वयं अपविद्धस्य तद्दपिनपूर्यते कुतोः पवेषां वास्तीन वसमग्रधनं त्रिधा
विभज्य क्षेत्रजएकमंशं गृह्णीयात् अतोः वशिष्टधनं चतुर्द्धा विभज्य ए
कमंशं पुत्रिकापुत्रो गृह्णीयात् एवं दौ त्स्येव विभागः कर्त्तव्य इति वाच्यं च
रमस्याभ्युह्यापुत्रस्य त्रयोदशभागे कभाग ग्रहणानंतरं अवशिष्टधनस्य या
हकाभावात् औरसस्य भागनियमानुपपत्तेश्चि देवस्य अनाकल्प्येव
विभागबोधकेरेणेन मेनच यत्तु पुत्रिकापुत्रस्य प्रयोत्स्य त्याय कर्षउक्तः
तत्सगुणत्वेन ब्रह्मपुराणं चमीशंसं रसगुणवत्वेद त्यविरोध इति तन्नकिं
ब्रह्मपुराणे क्षापेक्षया गौतमस्योक्तस्य अधिकोत्कर्षबोधकत्वं पु
त्रिकापुत्रविषये तथाहि औरसाद्यभावे एव तस्य चतुर्थांशग्राहित्वमुक्तं
ब्रह्मपुराणे च औरसादिसत्वएव औरसाद्यभावस्य कल्पकभावात् कृत्रि
मापेक्षया उत्कर्षश्चोक्तः न च औरसस्य सर्वांशग्राहित्वकथनात् औरसा
भाव एव पितृकृतविभागे क्षेत्रजादेस्तत्तीयांशादिग्राहित्वमिति वाच्यं सम
ग्रधनभोक्ता इत्यस्य संकोचावश्यकत्वात् अन्यथापितृनिरंशतापत्तेः अ
त एव तेषां सुवर्णस्य पुत्रास्ते तत्तीयांशभागिनः इति देवलोक्तं औरसे उ
त्पन्ने दत्तपुत्रकोंतं किंचिदंशो समानविषयतानादेधाति न च तद्वचनं भि
न्नविषयमेव कृत्नबैलस्यैवमादिति वाच्यं तद्वचनस्यापेक्षकवाक्यत्वात्स्य
पुनर्बलस्यैवे विभागे बलस्यैव स्वीकारे औरसपुत्रत्वनिर्गुणानां कृत्रि
मादीनां तत्तीयांशभागित्वे सगुणानां निरंशत्वे च विषमशिष्टापत्तेः न च
ब्रह्मपुराणवचनं असवर्णक्षेत्रजादिपरमिति वाच्यं उत्पन्ने त्वौरसे पुत्रे
तत्तीयांशहराः स्मृताः सवर्णास्त्वसवर्णास्तु ग्रासाच्छादनभागिनः इति का
त्यायने सवर्णानां ग्रासाच्छादनमात्रभागित्वकथनात् ननु देवलकात्या
यनोक्ततत्तीयांशहरत्वेन ब्रह्मपुराणोक्तविभागविशेषहरत्वस्य च विरोधः
न च देवलकात्यायनेनोक्तं सगुणपरं ब्रह्मपुराणं च निर्गुणपरमिति वा
च्यं एवं सति क्षेत्रजादीनां पुत्राणां स्वाभाविकसमानत्वे गुणकृतविशेषाय
द्विभागं क्षेत्रजो भुंक्ते इत्यनुक्त्वा त्रिभागं सगुणो भुंक्ते इत्यस्यैव वक्तव्यत्वात्

पत्तेः इतिचेदत्रकेचित्तन्नीमांशस्यप्रधानत्वेनैवोपन्यासउपलक्षणार्थ
तथाचपुराणेदेवभागनियमोपन्यस्यः तत्रचगुणत्वनपेक्ष्यपर्यसोत्तम
त्वंब्रह्मपुराणेनस्यैवनिर्गुणत्वमपेक्ष्यमध्यमत्वमधमत्वंवाउक्तं अन्ये
नतथाचकृत्रिमादेरुत्तमत्वापेक्षायांयोभागउक्तः कालीनादेः तादृ
शोत्तमत्वेसएवभागोवेदितव्यइतिनामुनिमते विशेषः तथाचपूर्णांशः
औरसस्यविभागः पुत्रिकापुत्रस्यचतुर्भागः क्षेत्रजस्यपंचमः कानी
नस्यषष्ठोगूढोत्पन्नस्यसप्तमोऽपविद्धस्याष्टमः सहोढस्यनवमः पौन
र्भवस्यदशमः दत्तकस्यएकादशः कृत्रिमस्यत्रयोदशः क्रीतस्यअनु
क्तोऽपिचतुर्दशः शूद्रापुत्रस्यवक्तव्यः अन्यथानस्यानिर्देशतापत्तेः
इतिदेवलमतं अन्यमतेऽप्येवमेवतेषामित्याहुः वाचस्पतिरपिका
त्यायनोक्ततन्नीमांशहरत्वंक्षेत्रजस्यब्रह्मपुराणैकवाक्यत्वात् अ
स्तुकृष्णगुणदत्तकस्यइत्यन्येइत्याहतथाचसुतरामन्येषां अन्यविष
भागहारित्वंनतुसर्वेषांतन्नीमांशहारित्वमिति अतः सगुणत्वेइतिरत्ना
करवाक्यंकानीनादेरिदंस्थ्यं हारीतः विभजिष्यमाणएकविंशांकानी
नाप्नुयात् विंशपौनर्भरायएकोनविंशंमुष्याम[illegible]णाय अष्टदशांक्षेत्रः
जायससदशंपुत्रिकापुत्रायइतानोरसापरस्युः इतिमतेपितरिसम
स्तधनस्यजीवतितुऔरसपुत्रस्यएकविंशतिभागेकभोगंकानीनाय
दद्यात् इतिविभागक्रमोहारीतोक्तः इतरान्नेशबद्रायान् पुत्रोभागोप
युक्तशेषान्वा अत्रमुष्यायणोगूढोत्पन्नइतिरत्नाकरः हारीतेनचए
तेषामेवभागान्समुच्चयनेमथा षड्बंधुदायादाः साध्यास्वयमुत्पा
दितः क्षेत्रजः पौनर्भवः कानीनः पुत्रिकापुत्रोगूढोत्पन्नश्चेतिदत्तः
क्रीतोऽपविद्धः सहोढः स्वयमुपगतः सहसादृष्टश्चेत्येवं षडदायादा
अत्रलक्ष्मीधरः वन्धनांपितद्व्यारीनांदायानादद्तेइतिबंधुदायादाः
इत्याहुः सहसादृष्टः कृत्रिमः अयंचएषांग्रासाच्छादनमेवात्रमन्यते
ननुहीनवर्णाभिप्रायेण अतिनिर्गुणाभिप्रायेणवा इति अत्रचमते
पुत्रिकापुत्रस्यद्वितीयमेवभागग्रहणे तथादर्शनात्केनचिद्यात्संताप
कृष्टत्वमुक्तंतदस्यातिनिर्गुणत्वात् तथाच यत्रसगुणः कानीनः कृ
त्रिमोवास्तिनचातिनिर्गुणः पुत्रिकापुत्रोनसंपूर्णधनभाक् पौनर्भव
पर्य्यंताभावेतुसएवसमग्रमहतीपारितिगोत्तममतं अन्यमतेऽप्येवमेव

समाधेयं अत्र गुणविवेचनाऽतिसूक्ष्मानभ्युपगम्यानन्तविचारकरणे च
व्यर्थः परिश्रमः ग्रंथातिबाहुल्यं च स्यादिति तन्न किं ततः फलं तु पुत्रिकापुत्रो
ऽतीयाय एव नतीयो वा क्षेत्रजस्य गुणविवेचनया मनुयाज्ञवल्क्यनारदबृ
हस्पतिबौधायनविष्णुहारीतदेवलवशंखलिखितयमब्रह्मपुराणादिभि
स्तथा कल्पनात् तथा च क्षेत्रजपौत्रिकेयोभयत्वेन तयोर्निर्गुणवानेवाधि
कारिसमानगुणत्वेन तु पुत्रिकापुत्र एव अज्ञारजातत्वादिति व्यवस्था नच
क्षेत्रे संभूतत्वात् क्षेत्रजोऽन्तरंग इति वाच्यं पुत्रिकायाः संतानोत्पत्तौ सत्ता
विनाशात् पुत्रिकापुत्रस्य स्वक्षेत्रजातत्वादिति न क्षेत्रजः प्रतिनिहितजा
तः पुत्रिकापुत्रस्तु अप्रतिनिहितेन परेण जात इति क्षेत्रजोऽन्तरंग इति वा
च्यं पुत्रिकायाविवाहेदाने नैव जामातुः प्रतिनिधीकरणात् सनूनं पुत्रि
कापुत्रस्तु पौत्रवदधिकारी इति संक्षेपः मनुः पौत्रदौहित्रयोर्लोके वि
शेषो नास्ति धर्मतः तयोर्हि मातापितरौ संभूतौ तस्य देहतः अकृता वा
कृता वापि यं विन्देत् सदृशात् सुतं पौत्री मातामहस्तेन दद्यात् पिण्डं ह
रेद्धनं तथा दौहित्र एव तु हरेद्पुत्रस्याखिलं धनं दौहित्रो ह्यखिलं रि
क्थमपुत्रस्य पितुर्हरेत् स एव दद्यात् द्वौ पिण्डौ पित्रे मातामहाय च शंखलिखि
ताभ्यां पुत्रदौहित्रयोर्विशेषाभाव उक्तः पुत्रिकापुत्रस्य पुत्रत्वाभिप्रा
येण अनेन पौत्रदौहित्रयोर्विशेषाभाव उक्तः पुत्रिकायाः पुत्रत्वाभिप्रा
येण अत्र पौ[illegible]त्र तुल्यत्वाभिधानात् पुत्राभावे यथा पौत्रो दायाधिकारी
तथा पुत्रिका[illegible]भावे पौत्रिकेयो दायाधिकारीति ज्ञापितं सति चान्यविधे
पुत्रेऽन्यस्यां पुत्रिकायां वा सत्यां समानत्वेऽप्यांशग्रहणं च बोध्यं एतद्व
चनं अपुत्रधनाधिकारे जीमूतवाहनादिभिर्लिखितं सामान्यदौहित्र
स्यापुत्रमातामहधनग्रहणापत्तेरत्रैव विवेचयिते अकृता वा पुत्रि
काकरणमतिकृत्य या चाचानभिसंधाय मनसाऽभिसंहिता कृता वा चाए
व कथिता सदृशादिति अधमवर्णनिरासाय उत्तमवर्णस्य निवासे
तु भवविरोधात् एषु नाम्नो राज्ञः संतानस्य प्रचेतसः पुत्रस्य दक्षप्र
जापतेः कृतपरिवाहितानदुहितॄणां पुत्रिकाकरणं श्रुते च यथा मनुः
अनेन तु विधानेन पुरा चक्रेऽथ पुत्रिकाः विवृद्ध्यर्थं स्ववंशस्य स्वयं द
क्षः प्रजापतिः ददौ स दश धर्माय कश्यपाय त्रयोदश सोमाय रा
ज्ञे सत्कृत्य प्रीतात्मा सप्तविंशतिं अनेन विधानेन पुत्रिकाकरणप्र

५६५

कारणस्य प्रकारो वक्ष्यते न चायं दृश्यो ब्राह्मण्यसंभव इति वाच्यं श्री
भागवतस्मृतौ तस्य दुहितृणां कश्यपसम्प्रदानावबोधनात् श्रीमते
महादेवाय तत्कन्यासंप्रदानावबोधनाच्च न तु अन्यत्र ब्रह्मसंभवस्य
कन्याविवाहस्यैव कश्यपे उक्तेस्तेनैव एकवाक्यत्वं मनुसंहितायामिति
वाच्यं इति भागवतस्मृतिविरोधपरिसंहारस्य संभवे तत्परित्यागस्यानु
चितत्वात् दद्यात्पिण्डं हरेद्धनं इति पौत्ररूपेणेति शेषः दायप्रकर
णे पिण्डदानोक्तिः पिण्डदानस्योपकारकत्वेन दायग्रहणमिति
सूचनार्थं एतत्फलं चापुत्रध[illegible]नाधिकारे वक्ष्यते अपुत्रस्य और
सपुत्रस्य मृतस्य इति रत्नाकर कुल्लूकभट्टौ इदं च पुत्रिकापुत्राभिप्रा
येणैव संगच्छते पितुर्हरेदिति पितुर्जनकस्य अत्र दायग्रहणे हेतुभू
तं उपकारं दर्शयति स एवेति यतः पित्रे मातामहाय च पिण्डं ददाति
अतः पितुर्मातामहस्य च धनं गृह्णीयात् [illegible] जनकस्यान्यपुत्रसत्त्वे
स एव मुख्योऽधिकारी श्राद्धदाये च तोऽपुत्रस्येति गौणोऽयं पुत्रः
मातामहस्य च दौहित्र इव श्राद्धं कुर्यात् तद्दायं च गृह्णीयादिति कु
ल्लूकभट्टस्तन्मत व्याख्या अत्र सर्वेषि पुत्रासत्त्व एवास्याधिकार
इति युज्यते कुल्लूकभट्टेन न किंचित्स्पष्टमुक्तं अत्र प्रकाशक
रस्तु दौहित्रो ह्यखिलं रिक्थमित्यादिश्लोकादिमादौ पठित्वा पितु
रित्यस्य मातामहस्येत्यर्थं व्याचकार मातामहस्यैव पुत्रिकापुत्र पि
तृत्वाभिप्रायेण पितृशब्दस्य स सम्बन्धिकतया पुत्रिकायाः पितुरि
त्यर्थीकरणात् दौहित्र एव तु हरेदिति व्यनुवादं वदन्ति उदयकार
स्तु दौहित्र एव तु हरेदित्युत्तरार्द्धहेतुरित्यादस्यतोऽपुत्रस्य धनं दौ
हित्रः प्राप्नुयात् अतोऽत्रापि पौत्रिके यः प्राप्नुयादित्यर्थः चएड
श्वरस्याप्यनयोरेव मातनिर्भावः किन्तु अपुत्रस्य औरसपुत्रः
ऽन्यस्य इत्यपर्यव्याकारस्तन्चिन्त्यं न हि औरसेतरपुत्रसत्त्वेऽसा
मान्यदौहित्रस्याधिकारः सिद्धः यो हेतुवद्वचनत्याहि मनुः न
भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः इति कुल्लूकभट्टः नस
होदरभ्रातरो न च पितरः किं त्वौरसाभावे क्षेत्रजादयो गौणाः पु
त्राः पितृरिक्थहरा भवन्तीत्यनेनोच्यते औरसस्य एकत्र औरस
पुत्रा इत्यनेनैव सिद्धत्वात् अविद्यमानमुख्यामुख्यपुत्रस्य

श्लोकः २१

पत्नी दुहितरश्चैव हि तस्य तत्पिता धनं गृह्णीयादिति वचने चेदं द्वादशवि
धपुत्रनिरूपणानन्तरं विलिखितं फले तेन विशेषः बृहस्पतिः अंगाद
गात्संभवति पुत्रवद्दुहिता नृणां तस्यामपि धनं त्वन्यः कथं गृ
ह्णीत मानवः सदृशी सदृशेनोढा साध्वी शुश्रूषणे रता कृता कृता
वा पुत्रस्यापि तु धनं हरेत्सा तथा यथा पितृधने स्वाम्यं तस्याः
स्मृतं त्वपि बंधुषु तथैव तत्सुतोऽपि इष्टे मातृमातामहे धने पिता
महस्यांगात्पित्रा तदंगात्पुत्रो यथा भवति तथा दुहितापि त
स्मात् तस्यां सत्यां अन्यो भ्रात्रादिस्तत्पुत्रो वा कथं धनं गृह्णीया
यतो भ्रात्रादिर्दुहितृपित्रा महांगजात एवं नत्तु धनिकस्य दुहितृपि
तुः सदृशी सदृशेनोढेति न हीनवर्णेनोढा धर्म्या कृता कृता
वेति अभिलापस्य अविसंधेर्विषयीभूता अन्या यैस्तु अ
पुत्रधनाधिकारे बृहस्पतेरयं वचनमित्ति पुत्रिकायाः पुत्रत्वकल्पेन
नृतैर्बृहस्पतिवचनेनापि तत्तुल्या पुत्रिका प्रोक्ता इत्यनेन तत्तदेक
वाक्यत्वात् पुत्रिकापुत्रस्य पुत्रत्वकल्पेन तस्यैवाद्यावधिकारः
बंधुषु भ्रात्रादिषु मातामहे मातृधने पुत्रत्वात् मातामहधने पौत्र
त्वादिष्टे अधिकर्त्तुं समर्थो भवति शंखलिखितौ स्त्रीधनं च कन्या ल
भेते तदपत्यस्य द्रव्यं कन्याभाग एव इति स्त्रीधनं च कन्या लभेते इ
ति स्त्रीधनप्रकरणे बृहस्पतेरपत्यस्येति अत्र रत्नाकरः तत्परे
न कन्या मातुः परामर्शः तत्पुत्रस्योत्तरकालजन्मनः पुत्रस्यैव मर
णे तद्धनं मातुः पितृष्वा भागिनेये भगिनी गृह्णीयात् अत्र बीजं भ्रात्तः
तुल्यत्वमिति अत्रेदं चिंत्यं शंखलिखिताभ्यां पुत्रिकापुत्रस्यैव पुत्र
त्वमुक्तं न तु पुत्रिकायाः तस्याश्च कथं तस्याः सोदरतुल्यत्वमिति ये
नैव मुनिनार्षीपः पुत्रना[illegible]हितः तेन तस्य तत्र तात्पर्य्यं वक्तव्यं अ
न्यथा तस्य न्यूनत्वाद्यापत्तेः अन्यस्य वा अधिकत्वाद्यापत्तेः अतए
व मनुनापि तत्कृतविभागो नोक्तः किंतु न तत्र भागं विषमं पिता दद्यात्क
थं चनेत्युक्तं एवं च अभिसंधिविशेषाभावे रेण पुत्रिकाया अपि पुत्रत्व
माहरणीयं शंखलिखिताभ्यामित्ति विरोधः ण्यं नन्वेकपुत्रिकापुत्रिको
भयसत्वे धनग्रहणे आद्याधिकारो कस्य स्यादिति चेत् पुत्रिकायाः
एव स्वक्षेत्रे स्वपत्युस्यादित्वात् न च स्त्रीत्वात्तस्या निकृष्टत्वमिति वाच्यं

शास्त्रेवत्सात्तस्याःपुत्रत्वेसिद्धेस्त्रीत्वस्याकिंचित्करत्वात् नचपार्व
णोधनर्निर्देश्यादात्वेनपुत्रस्योत्कर्षइतिवाच्यंतस्याःसतिदत्तापेक्ष
यासामान्यदौहित्रापेक्षयापितस्यानिकृष्टत्वापत्तेःनहितत्कस्या
पिमुनेरभिमतंइतिसंक्षेपः अथपुत्रिकाकरणं मनुः अपुत्रो
अनेनविधिनासुतांकुर्वीतपुत्रिकां यदपत्यंभवेदस्यां तन्ममस्या
त्स्वधाकरं अत्रापुत्रइतिनाधिकारनिरूपणंकिंतुस्वरूपकीर्तनं
पुत्रवत्त्वेपु त्रिकाकरणेनतिप्रयोजनकत्वात् अतएवतद्वचनोपर
शौनकस्यस्वायम्भुवपुत्रवतःपुत्रिकाकरणंसुबोधंभवति तदुक्तंश्री
भागवते आकूतिंरुचयेप्रादादपिभ्रातृमतींनृपःपुत्रिकाधर्ममाश्रि
त्यशतरूपानुमोदितः नृपेतिराज्ञःपारीक्षितःसम्बोधनंस्वविसर्गप
वेतुस्वायम्भुवमनोरेवतदानीमधिपतित्वात्कर्तृत्वेनोक्तेस्वःआकू
तिमितिद्वितीयातदुहितुर्नामरुचिरितिसंप्रदानीभूतस्यप्रजापतेर्ब्र
ह्मणःपुत्रस्यनामः भ्रातृमतिमितिभ्रातरौप्रियव्रतोत्तानपादौराजा
नौभ्रातरौविद्येतेतस्याःशतरूपामनोःपत्नीइतिअप्यवाःपुत्र।अति
शयपुत्राभाववान्इत्यर्थः स्वधाकरमितिपितृणांमन्त्रेस्वधाश्रुति
बोधितत्वात्तथाचश्राद्धकरमित्यर्थः ननुएतत्प्रतिज्ञायांवैयर्थ्य
यतःसर्वैरेवदौहित्रैर्मातामहस्यश्राद्धंक्रियतेइतिचेत् स्वधाशब्देनात्र
मुख्यश्राद्धबोधनीयंअन्यथावैयर्थ्यात् अथवाममपश्चात् मद्वंशएवो
च्यते अपत्यपदेनचपुत्रादिरूपोवंशएवअस्यामितिसप्तम्यर्थोनि
मित्तत्वंतथाचएतन्निमित्तकोयोवंशःसोस्मदीयवंशधारास्वधाकर
इत्यर्थःतथाचमूलत्वात्दुहितुरपितद्वंशानुगतत्वमायातंतेनशश्व
पुत्रइवपौत्रोपिभवति एवंचएतादृशप्रतिज्ञयाकृतेतदुहितुरपि
स्ववंशानुरूपंपुत्रत्वंविषयीक्रियते अन्याचदुहिताभर्तृवंशकारी
इयंतुपितृवंशकारीतिभावः उवशिष्ठः अभ्रातृकांप्रदास्यामितुभ्यं
कन्यामलंकृतां अस्यांयोजायतेपुत्रः समेपुत्रोभवेदिति अत्रापि
अ तृकामितिस्वरूपकीर्त्तनंभ्रातृकसुतेपुत्रत्वेनुपयोगात्तथाएव
मलंकृतामित्यपिअलंकाराभावेपिपुत्रिकाकरणस्यानुभवसिद्ध
त्वात्पुत्रत्वेनुपयोगात्तनन्वेतन्मतेपुत्रिकापुत्रस्यैवपुत्रत्वकथ
नात्पुत्रिकानपुत्रइतिचेन्नपुत्रिकाऔरसपुत्रतुल्याइत्यनेनविरो

भात् तस्मात् पुत्रपरद्वयं वंशपरं वंशाभ्युत्तवत्पौत्रादिरपि भवति
अथवा एतन्मतिज्ञस्यापुत्रिकापुत्रस्यैव पुत्रत्वं पुत्रिकायाः पुत्रा
स्य प्रतिज्ञान्तरं कर्त्तव्यं द्वयमेव वचिष्टाभिमतं वक्तव्यं अन्यथान्यून
तापत्तेः द्वयोरपि किंचिन्नकरोति तथाहि ब्रह्मपुराणवचने दत्तक
स्यानुक्तेः किं दत्तकस्य तादृशगुणत्वे न तादृशभागो न स्यादिति अस्मा
यो जायते स पुत्रः स मे पुत्रो भवेदिति समानार्थशब्दप्रयोगः कर्त्तव्यस्त
द्वाह गौतमः पतोत्सृजेत् पुत्रिकामनपत्योग्निं प्रजापतिं चेष्ट्वाऽ
स्मदर्थमपत्यमिति संवादमात्राभिसन्धिमात्रात् पुत्रिकेत्येकेषां इति
अनपत्य इति अपुत्र इत्यर्थः प्रागुक्त एव अग्निमित्यादि आग्नेयं
प्राजापत्यां चेष्टिं कृत्वा एकाग्निमपि स्मार्त्ते यागमात्र वसत्येतरभावे
पूजामपीति हरिहरः तथाचाग्निहृमेयाग द्वयं मुख्यकल्पः अ
भवि स्मार्त्ते एकाग्निमपि तन्त्र साग्निपरं निरग्नेस्तु पूजामात्रमिति भावः
संवादपरिभाष्य अभिसंधिमात्रात् पुत्रिका इत्येकेषामिति एकेषामित्यने
नानिर्भव संसूचितः अन्ययासावेतिनोक्तं स्यात् अनिर्भरेण चापकृष्टत्वं सू
चितं तथाच परिभाषितपुत्रिकामपेक्ष्य अभिसंहिताया अपकृष्टत्वं सूचितं न
स्यात् कारणं देवकालीनाद्यपेक्ष्या पुत्रिकापुत्रस्य प्राधान्यं गौतमेनोक्तम
न्यैश्च परिभाषितपुत्रिकापुत्र एव स्वकृत्युक्तः अत एव कालीनाद्यपेक्ष्या तस्यप्रा
धान्यमुक्तं सगुणत्वनिर्गुणत्वाभ्यां च स्वेत्रज्ञापेक्षया उत्कर्षापकर्षौ वेदितव्यौ
इति केचित् प्राहुः तथाच अग्निप्राजापत्यौ हौम रूपं पूजा रूपं वा यागं कृत्वा प
रिभाषा अभिसंधानं वा पुत्रिकाकरणप्रकार इति निगर्वः वृहस्पतिः अग्निं
प्रजापतिं चेष्ट्वा क्रियते गौतमोऽवदत् अन्ये वागर्भपुत्रस्यार्चितिताः पुत्रिकाऽ
भवेत् चिन्तितादृयमेव पुत्रिकत्यनुध्याता इति रत्नाकरः अत्रके चिद्याख्यान
माप्याया गर्भावधि पुत्रत्वेन चिन्तिता अयं गर्भः पुत्रो भविष्यतीत्यनुध्याता सा
पुत्रिकासा पुत्रतुल्यैव अस्याः स्त्रीत्वं वास्तवं नायत्तानुमिच्छति एकं पुत्रवद
रोपकरोति एतद्वंशो मम वंशो भवेदिति परिभाषते अभिसंधानुवासा पुत्रिका
वृहस्पत्युक्ता औरसपुत्रतुल्या वशिष्टेन चैसेवोक्ता मनुनापि चयातु प्रसवान
न्तरं परिभाषिता सा देवलाद्युक्तानत पुत्रश्च माता महपुत्रः एवं च पुत्रिकात
त्पुत्रयोः पुत्रत्वार्थप्रतिज्ञा वैलक्षण्य एवेनादरणीयमित्याहुः परे तु अग्निं प्रजा
पतिं चेष्ट्वा सम्वाद इत्येको गौतमस्याभिमतः कल्पः स एव वृहस्पतिश्लोक

स्य पूर्वार्द्धोक्तः अभिसंधिमात्रादिति मात्रपदेन परिभाषायाः प्रागसत्त्वव्य
वच्छेदः स चाभिसंधिः आगर्भज्ञानावधीति द्वितीयः कल्पः गौतमेन इष्यते अभिप्रे
तः स एव च बृहस्पतिना श्लोकस्य द्वितीयार्द्धेनोक्त इत्याहुः विष्णुः यस्त्वस्याः
पुत्रः स मे पुत्रो भवेदिति या पित्रा दत्ता पुत्रिका पुत्रिकाविधिना प्रतिपादिता
पि भ्रातृहीना पुत्रिकैव भवेदिति परिभाष्यविशेषः पुत्रिकाविधिना प्रति
पादितापीति सेत्र केचित् यवीयसीं भ्रातृमतीमिति स्मृतेरेकवाक्यतया
भ्रातृहीनापुत्रः सर्वोऽपि पुत्रिकापुत्रः वरं सोऽपकृष्टोस्तु गौतमोक्त एवेत्याहु
स्तन्न यतस्तस्मात् संशयान्नोपयेमायं भ्रातृकाम् इति शंखलिखितवचने अ
भ्रातृकाविवाहाभावे संशयस्यैव हेतुतया उक्तत्वात् संशयाभावे स्थले वि
वाहकर्तव्यताप्रतीयमानेन तथा च तत्र पुत्रिकात्वभावोऽप्यवसीयते अतो वि
ष्णुवचने पुत्रिकाविधिना प्रतिपादितापीत्यस्य परिभाषया दत्तापीत्यर्थः
एवं च गौतमैकवाक्यत्वात् अभिसंहितापीत्यपि पूरणीयं भ्रातृहीनेत्यपि
स्वरूपकीर्तनं अभिसंधिस्फोरणाय पुत्रहीनत्व एव प्रायोऽभिसंधिर्भव
तीति ब्रह्मपुराणे अपुत्रस्तु तथा कन्यां मनसा पुत्रवत् कृता राजाग्निबा
न्धवेभ्यश्च समस्तं संवाद्य कुत्रचित् अगर्भमथवा भुक्त्वा तुल्कादत्वाव राय
वा मृते पितरि वा दत्ता सा विद्यते यानपुत्रिका पित्र्यद्रव्यात् समं भागं लभते ता
दृशी सुता मनसा पुत्रवत् कृतेत्येकः कल्पः असौ पुत्र एव तस्या वंशो मम
वंश इति मनःकृता प्रतिज्ञा राजाग्निबांधवेभ्यश्च इति द्वितीयः कल्पः तदेतस्
या उत्कृष्टः षष्ठ्यर्थे पंचमी रा जसमीपे ब्रूयात् समेयं पुत्रत्वेन कल्पितेइ
ति अग्निसमीपे होमसमये मंत्रद्वारा ब्रूयात् बांधवानां समक्षमपि ब्रूयात्
आगर्भमिति तृतीयः कल्पः बृहस्पत्युक्त एव वराय शुल्कं दानपूर्वकं वाक्य
परिभाषणमपि चतुर्थः कल्पः एतन्मते च पुत्रिकातत्पुत्रयोः पुत्रत्वप्रति
ज्ञा वैलक्षण्यप्रभेव बीजं तदेव स्पष्टीकृतं मनसा पुत्रवत् कृतस्येनेन एवं गौत
मस्य द्वितीयः कल्पः गौतमीयः प्रथमकल्पश्चात्र द्वितीयः अतो गौतमबृह
स्पतिवचनयोरेकवाक्यत्वाभवे इत्याहुरन्ये ये तु आगर्भं चिन्त्तितयाः एव
पुत्रिकायाः पुत्रत्वं वदंतीति एवं व्याचक्षते आगर्भं मनसा पुत्रवत्कृता राजाग्नि
बांधवानां समक्षमेव च वराय शुल्कं दत्वा वा उक्ता मृते पितरि अन्येनाधिका
रिणा दत्ता पुत्रिका भवेदित्यर्थः अत्र प्रथमवाकारो वारणे द्वितीयवा
कारो विकल्पे तृतीयवाकारोऽप्यर्थे च समुच्चये इत्यमरकोषात् अप्यर्थः सम

श्लोकः ५

॥ क्षेपः तथा च गर्भस्थानां वधिपुत्रवच्चिन्तिनाराजा ग्नि वांधवानां समी
पे गृहीते शुल्काय अत्तु म्न हदे गृहीत शुल्काय वा वराय उक्त्वा दत्ता या कन्या
सा पुत्रिका एवं भर्तां गसमुदायोपेना और सेन समभागं लभते इत्यर्थः अंग
वैकल्पे तु यथा यथ्यमपकर्षो एवं पुंवि पु त्रिका पुत्रे उक्ता वो ध्याः अत्र सम
भागग्रहणमुक्तं मिश्रदीपकलिकाकारादिभि रभिमतं अन्यमते तु और
स पुत्राभावे पूर्णांशग्रहणमिति सर्वः अत्र स्पष्ट ग्राहित्वेन आनुग्राहक
त्वेन वा शुल्कस्य न पुत्रे स्वत्वं इति संक्षेपः अत्र प्रकरणे एतदवधेयं पुत्रि
कायाः पुत्रत्वं दायग्रहणापत्तत्पुत्रस्य पुत्रत्वं पार्वणादिश्राद्धायेति सर्वं
समंजसं न च विनिगमनाविरहः स्त्रियाः पार्वणे नधिकारादिति न कश्चिद
नुपपत्तिः अथ क्षेत्रजः अयं ततोप्य इति याज्ञवल्क्यमते द्वितीयः पुत्रिकापु
त्रादनंतरं एवं क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा इति वचनात् स्व
गोत्रेण कुलोद्भवेन इतरेण उत्कृष्टवर्णेन इति रत्नाकरः एवं च अन्यकुलो
द्भवः सवर्णः निरस्तः तेन च ब्राह्मणस्य स्वकुलोद्भवं विनो क्षेत्रजकरणं
न स्यादिति चेदिष्टापत्तेः अत एव दीपकलिकापरस्यानपत्यस्य भार्या
यां गुरुनियुक्तायां घृताभ्यंगादि नियोगधर्मेण सपिण्डेनोत्तमवर्णेन वा जा
तः क्षेत्रज इति मनुश्च नियुक्तायामपि पुमान्नार्यां जातो विधानतः ने
वार्हः पैतृकं रिक्थं पतितोत्पादितो हि सः अविधानतः सपिण्डोत्तमवर्णा
विधिमुल्लंघ्यने वार्ह इति तथा च क्षेत्रजत्वमेव नास्ति इति भावः
पतितोत्पादितो हि स इति एवं च तज्जनकस्य पतितत्वं सूचितं तथा हि स ए
व नियुक्तौ यो विधिं हित्वा वर्तेयातां तु कामतः तावुभौ पतितौ स्यातां स्नुषा
ग गुरुतल्पगौ विधिं सपिण्डोत्तमवर्णौ विधिं न तु स्नुषाग गुरुतल्पगौ इति द
र्शनात् पूर्वप्रक्रांतयोर्भ्रात्रोरेव गमनं प्रतीयते तथा च तयोः सपिण्ड
त्वात् विध्युल्लंघनमेव न संभवति कथमनयोः पातित्यमुत्पत्तेः इति चेत् वि
धावुत्तेस वर्णेन इति दर्शनात् हीनवर्णव्यावृत्तिकृतात् तथा चानयोः सपि
ण्डत्वे पि हीनवर्णयोगमने पातित्यमित्येवेहि कुल्लूकभट्टस्तु अविधानत
इति घृताभ्यक्तत्वादिकरणं विना इत्यर्थः विधिं हित्वा इत्यस्यापि तस्यार्थः इ
त्येवाहुः एवं च नियुक्तः इत्यस्य यस्याः स्नुत एवार्थः संगच्छते मनुः विधवा
यां नियुक्तस्तु घृताक्तो वाग्यतो निशि एकमुत्पादयेत्पुत्रं द्वितीयं न कदाचन
नियुक्त इति त्वमस्यां पुत्रमुत्पादयेति नियोगस्तस्मात्त्वं पुत्रमुत्पादयेति स्वभर्त्

श्लोकः २७

६८ श्यकनियोगस्यवाविषयः अत्रमते [illegible] यत्नात्कृत्वा [illegible] दिरूपमंगं विनापि प्रधा
नात्सिद्धेः स्यत्र किमुत्पादकस्य पातित्यं उत्पाद्यस्य वा दानर्हत्वं इति निर्विवेच
नीयं सपिण्डाद्वा क्षेत्रजपुत्रकरणमाह मनुः देवराद्वा सपिण्डाद्वा स्त्रि
या सम्यङ्नियुक्तया प्रजेप्सिताधिगंतव्या संतानस्य परिक्षये देवरो मु
ख्यः कल्पः तदभावे सपिण्डः गुरुभिः सम्यङ्नियुक्तया स्त्रिया देवराद्वा
सपिण्डाद्वा कुत्सिता प्रजा अधिगंतव्या प्राप्तव्या इत्यर्थः अत्र कुत्सितेत्य
भिधानात् काम्यासमपुत्रोत्पत्तावपि अभिलषणीयकाप्यधिसमपुत्रत्व
भार्यैवपुनर्गमननुमनं इति कुल्लूकभट्टमतं तथा च एकमुत्पादयेत्पुत्र
मित्यत्रापि एकपदं काम्यस्तमेकपदं वेदितव्यं ब्राह्मणादानप्रकरणे उक्ता
तृतीयापुनर्भूर्विवेका इयं चापरा अथ चा एषापि तृतीयापुनर्भूर्वे [illegible]
[illegible] काद्यस्तमेकपदं वेदितव्यं ब्राह्मणादानप्रकरणे उक्तं तृतीया
पुनर्भूर्विवेका इयं चापरा अथ चा एषापि तृतीयापुनर्भूरेव यस्या असः
त्सु देवरेषु स्त्री गुरुभिर्या प्रदीयते सवर्णेषु सपिण्डेषु सा तृतीया प्रकी
र्तिता इति नारदवचने प्रदीयते इत्यस्य पुत्रोत्पादनार्थं समर्प्यते इत्यर्थः
अपमर्षित्वेन बोध्यः यतो नैवास्ते दिग्णी अतः परपूर्वेयं पुनर्भूर्वामेवां
तरभवितुमर्हतीति विष्णुः नियुक्तायां सवर्णेनोत्पादितः क्षेत्रजो द्वि
तीयः सवर्णेनेति हीनवर्णान्येन इत्यर्थः तथा च सूर्यवंशसंभूतस्य सौ
दासनाम्नो वा राज्ञा वशिष्ठेन मुनिना पुत्रोत्पादनं महाभारतादौ प्रसिद्धं
संगच्छते एतदभिप्रेत्यैवोक्तं दीपकलिकाकारेण उत्तमवर्णेनेति विष्णु
ना च क्षेत्रजस्य द्वितीयत्वं उक्तं गुणवत्त्वाभिप्रायेण तदुक्तं शङ्क पुत्रिका
पुत्रस्य तृतीयत्वमुक्तं औरसक्षेत्रजपुत्रिकापुत्रपौनर्भवकानीनगूढो
त्पन्नसहोढदत्तक्रीतस्वयमुपागतापवि[illegible]द्धयत्रकृत्रिमोत्पादितानभिधा
नरस्यत्वेन रत्नाकरोक्तक्रमेण तथा बोधनात् औरसानन्तरं वशिष्ठं तद
भावे नियुक्तायां क्षेत्रजो द्वितीयः नियुक्तायामिति जात इति शेषः तदभावे
औरसाभाव इत्यर्थः तथा च औरसाभावे क्षेत्रजः श्राद्धाधिकारी दायपू
र्णांशहारी च इति वशिष्ठस्यापि मतं तत्समाहितं मनुः यस्तल्पजः प्रमी
तस्य क्लीबस्य व्याधितस्य वा स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः
स्मृतः तल्पं शय्या उदारे स्तु इत्यमरः दाराः भार्या पतितस्येति पतितो यदि
स्वयं स्तुतस्तु स्यात् स एव तदा सपतितापत्यत्वेनाधिकारी न स्यादिति भावः क्ली

वचनात् पतितोऽपि नियोक्तुमर्हति यावृत्तुशास्त्री पतित्वेन स्तुक्तान स्यात्तदेव
अन्यस्यानन्तस्या पतित्वेन तत्सुतस्यापि यावत्तिस्योन्यतेः वाकारो मतस्य
च सुत्सुच्च्यार्थः तस्याच पूर्वपति नियुक्तायां वामतस्य भार्यायां योजा
तः सोऽपि क्षेत्रजइति बोध्यं स्वधर्मेण घृताभ्यक्तादिना इति रत्ना
करः मनुः धनं यो विभृयाद्भ्रातुर्मृतस्य स्त्रियमेव वा सोऽपत्यं भ्रातुरुत्पा
द्य दद्यात्तस्यैव तद्धनं अथ भ्रातृणां विभागो यात्त्वनपत्याः तासां च पु
त्रलाभात् इति वशिष्ठवचने अपुत्राणामपि भ्रातृपत्नीनां भागो बोधि
तः स च भागो यत् भ्रातृजायानियते स वै स्त्री स च भ्राता धर्मेण तस्यां पुत्र
मुत्पाद्य तस्मै तद्धनं दद्यादित्यर्थः पुत्रजननाभावे तु सर्वे भ्रातरः एव ग
ह्लीयुरित्यर्थः तत्र विविच्य भविष्यति पुत्रधनाधिकारे अत्र ज्येष्ठभ्रातृप
त्न्यास्तस्यात्रेज्येष्ठांशो देयो न वेति संशयः अत्र तद्भागस्य भ्रातृपुत्रेण
ग्राह्यत्वस्य फलत इष्टत्वेन तया यवीयान् ज्येष्ठभार्यायां इत्यादिवचनो
क्तप्रकार एवाहरणीयः स्यादित्येवं नियोगः स्यात्तस्येन केनचित् विहितेन पु
रुषेण पुत्रमुत्पादयेदिति तदा अन्यस्मादपि पुत्रोत्पत्तिसंभावनया ज्येष्ठां
शसहित एव भागो देयः स च भागो यदि कनिष्ठेनचित् भ्रात्रा पात्येत पु
त्रोऽपि तेनैवोत्पाद्येत तदपि ज्येष्ठांशसहित एव तेन ग्राह्यः पूर्वप्राप्त
त्वादिति केचित् तच्च धनेऽनाधिकारे गेयस्य स्वत्वाभावात् तदानीं तद्धनस्य नि
धितुल्यत्वात् जातोऽपि क्षेत्रजः पुत्रो ज्येष्ठांशं नाधिकर्तुं शक्नोतीति तस्मात् समां
श एव तेन ग्राह्यः कुल्लूकभट्टस्तु इदं वचनं विभक्तभ्रातृविषयमाह तस्या
त्र विभक्तोऽभ्राता यदि म्रियेत तस्य तथा तद्धनं रक्षणार्थमन्यस्मै कस्मैश्चिद्देवा वा स्म
र्पितं तेन तस्यां पुत्रमुत्पाद्य तस्मै तद्धनं देयमिति भावः मनुः यानि सुतान्य
तः पुत्रं देवराद्वा समाप्नुयात् तं कामजमरिक्थीयं मिथ्योत्पन्नं प्रचक्षते अ
त्र कुल्लूकभट्टः गुरुभिरनुज्ञातानामपि यदि देवरादन्यतः सपिण्डाद्वा उत्तमव
र्णात् वा तत्स्यापरलक्षणं तथा घृताभ्यक्तादिरूपविधिमुक्तात् कामतः प्रवृ
त्ता पुत्रमाप्नुयात् स पुत्रजन्म भागी मिथ्योत्पन्नः पितृक्षेत्रादिदायाद्यन
धिकारात् वस्तुतो जारजात एवेत्यर्थः अकामजस्तु तस्याभर्तादाया
धिकारीति भावः तदुक्तं नारदेन मुखान्मुखं परिहरन् गात्रैर्गात्राण्यसंस्पृ
शन् कुले तदवशेषे च संतानार्थी न तु कामतः इत्यादिना रवशेष इत्यसंभवि
ष्यत्पुत्रोऽशेषो यत्र तस्मिन् कुले यदा सा स्त्री अवशेष इति संभविष्यत्पुत्रः

त्रो ऽशेषो यत्र तस्मिन् कुले यद्वा साध्वी अवशेषो यत्र इति अयं मखः
वलिपुत्रफलादार इति कालिकापुराणात् भार्य्यायाः फलं रतिरूपमेकं
अन्यच्च पुत्ररूपं तत्र च रत्येवार्थतः पुत्रसिद्धेः पुनः पुत्रपादानां क्षेत्रजा
द्यर्थं अकामस्यापि प्रवृत्त्यर्थं च तत्र रतिरूपफलं देवरादिति ःप्रतिनिधीभ
तैर्न कर्त्तव्यं शास्त्राभावात् पुत्ररूपफलं च कर्त्तव्यमेव रतिस्त्वस्त्रीपुंसयोः
परस्परं भावविशेषः त न्यान्य एव मुखगात्रस्पर्शादिरतो रस्यात्मकभा
वविशेष तज्जनेनैव मुखगात्रस्पर्शादिवर्जनमाज्ञानं पापित्यजनकस्य
स एव भावविशेषः अतो धर्मभावेन पुत्रमुत्पादयेत् तत्र च हीनवर्णादि
वर्ज्जनं विवाहे सपिण्डकन्यादिवर्ज्जनवदिति शास्त्रार्थः अपरे तस्या इत्य
र्थः परं अकारप्रश्लेषः तथा च यायुरुभिरनियुक्ताद्देवरादस्यतः सोपिः
एडं देवी पुत्रमाप्नुयात् स पुत्रकामजः इत्यर्थमाहुस्तन्न अनियुक्तासुता
यैव पुत्रिएयास्थ देवरात् उभौ तौ नार्हतो भागं जातककामजो इत्यने
नैपोनरुक्त्यात् अत्र च भौ जारजातौ कामजौ च वोद्धव्यौ इति परे त्वं
मानियुक्तापि देवराद्वा शब्देन समुच्चयार्थकेन लब्धात् सवर्णात् सपिण्डेत
रस्माः च पुत्रमाप्नुयात् स पुत्रः कामज इत्यर्थः नियुक्तायामपि पुत्र
इत्यादिवचनस्य कुल्लूकभट्टस्तु राम्मत व्याख्यामाकल्पमाहुः अथ पविशे
षात् क्षेत्रजस्य विशेषमाह मनु हरेत्तत्र नियुक्तायां पुत्रो जातो यवीयसः
क्षेत्रिकस्य हि तद्बीजं धर्म्मतः प्रभवश्च सः तत्र विधिबोधितायां पुत्रो स्या
दकीयस्या हीनवर्णायां तन्न सपिण्डायां वाद्यताभ्यक्तेनासंपूज्य
मानायां च यद्दातत्र्योति धनेस्तति सुखमिति यत्स्वामी तथा च तत्र विधा
ने विधिबोधिने स्तति यो जातः स औरसवत् क्षेत्रेस्य यमुत्पादिवत्तहरेत्
धनमिति शेषः तत्तु कस्य धनं हरेत् क्षेत्रिणो वीजिनो वा इत्यत आह क्षे
त्रिकस्येति अत्र क्षेत्रिकः एवं वीजी वीजस्याचकत्वादिति भावः अतः प्र
सवः पुत्र क्षेत्रिकस्यैव विधिं विना जायमानो नियुक्तायां कथं क्षेत्रिका
स्य न भतीस्यत आह धर्म्मत इति अयं धर्म्यः तथा च विधिं विना जाय
मानो न धर्म्यः अतः स क्षेत्रिसंबंध्यपि न तत्पुत्र तत्कार्य्यासमत्वा
दिति भावः तुषवातात्दत्तं वीजं यस्य क्षेत्रे प्रवोहति तद्बीजं क्षेत्रिकस्य
वन साल्लभते फलं इति मनुना च क्षेत्रिकस्यैव तद्बीजमिति सुप्रतिपादि
तं प्राकृतत्वात् तत्तु अनआन वा पुनाबा आनितं धान्यादिबी

श्लोकः २५

जंपरक्षेत्रेपतितंपरशस्यमेवयस्मात्संभावयतितथायाचनादिनापति
तंपरक्षेत्रेपरभार्य्यायांबीजंभुक्तंपरस्यैवपुत्रंसंपादयतीत्यर्थः बोधा
यनः मनुजस्यवयस्ततोपङ्क्तीरस्यव्याधितस्यवा अन्येनानुमतेस्वक्षे
त्रेक्षेत्रजः सएवद्विपिताद्विगोत्रश्चद्वयोरपिस्वधारिक्थभाग्भवति
अत्ररत्नाकरः अन्येनदेवरादिनाप्रसक्तत्वात् यः द्विपितेतिकयोऽभावः
समासान्तविधेरनित्यत्वात् द्विगोत्रोगोत्रद्वयोरपिगोत्रमाकृत्स्वधापि
गोत्रमाकृत्स्वधापितृकर्मइतियाज्ञवल्क्यः अपुत्रेणपरक्षेत्रेनियोगो
त्पादितः सुतः उभयोरप्यसौरिक्थीपिण्डदाताप्रकीर्त्तितः नारदस्तु
स्याम्येने क्षेत्रिकानुमतबीजंयस्यक्षेत्रेप्रजायते तदपत्यंद्वयोरेवबी
जिक्षेत्रिकयोर्मतं शंखलिखितौ मात्रसंस्कारकर्तुरपत्यमित्याङ्गिर
सः बीजिक्षेत्रिकयोरनुमतेयद्बीजंप्रकीर्य्यतेनहिधीशस्यमित्युशनाः
इतितथाचशंखलिखिताभ्यांमुनिद्वयसम्मतिद्धल्लेनद्वयमुभयंमातृस
म्बन्धिसंस्कारः पाणिग्रहणंतत्कर्तुः क्षेत्रिणः अन्यबीजंअपत्यंइत्या
ङ्गिरसः प्राहएतन्मतेनरपत्यंनबीजिनइतिभावः यद्बीजंप्रकीर्य्यतेनिः
क्षिप्यतेतत्तस्यशस्यंशस्यतुल्यंअपत्यंद्विधाद्वयोः बीजिक्षेत्रिकयोरित्याह
उशनाः दैत्याचार्य्यः स्तुकः हारीतः जीवतिक्षेत्रजमाहुरस्वातंत्र्यान्नद्व्या
मुष्यायणमस्तुसबीजत्वात् नाबीजंक्षेत्रंफलंलिनासिनाबीजंरोहतीत्यसु
भयदर्शनादुभयोरपत्यमित्येकेतेषामुत्पादयितुःप्रथमः पुत्रोभवति द्वौ
पिण्डौनिर्वपेद्रिक्थंरेकंपिण्डदारानुकीर्त्तयेत् द्वितीयपुत्रस्तृतीयेपौत्र
ऽपिनप्तृत्रीणाञ्चत्वाराआसप्तमादित्येकेइति अत्ररत्नाकरः जीवतिक्षेत्र
जमन्यजमपिकर्तुरेवकुतः अस्वातन्त्र्यात् स्त्रियाइतिशेषः मृतेपितरि
अपुत्राशयनमित्यादिदर्शनाद्यद्यप्युत्पादितंममविशिष्टंतथापित्वामु
ष्यायणंद्वयोरपत्यमित्याहुः कुतः अत्तुसबीजत्वात्क्षेत्रस्येतिजीवति
हिबीजवहास्तीतिनपरस्परफलयोगोअपत्यमस्यकारणमित्याहनाऽ
बीजमिति उभयोः बीजिक्षेत्रिणोः निरूप्यतेअस्मिन्नित्युत्तिनिर्वापा
पितृयज्ञः एकपिण्डत्वावितिएकैकस्मिन्पिण्डेद्वौद्वाविनिवाप्तीमेतव्या
पद्द्विपितास्यादेकैकस्मिन्पिण्डेद्वौद्वावनुपलक्ष्येपदिद्व्यादिपिण्डानुसा
रान्द्वितीयपुत्रइत्यादिपुत्रोद्वितीयमारभ्यत्यर्थः द्वेपिनप्तृत्रीन्आचत्व
रोद्वौद्वावनुकीर्त्तयेदित्यर्थः इतिकर्त्तृक्षेत्रिणः इत्यर्थः इदमपत्यंयद्भार्यायां

७० वरोभयजन्यत्वान्द्वयोरेव भवत्वित्याशंकानिरासार्थमिहेदमस्वातंत्र्या
त्याच स्त्रीसा च भर्तुरेवातस्तयोत्पादितमपत्यं भर्तुरेव भवतीति भा
वः ननु जीवतीत्यर्थं पत्युर्म्मरणेपि स्त्रियाः पतिपारतंत्र्यात्स्वयमा
मतःपतिकार्यं कमपि पुरुषमुपगछेन्निर्वर्तकपुरुषाभावात् इत्या
शंक्यतेमृते चेत्यादिन च मृतपतिकायाःपुरुषांतरागमनं नास्वातं
त्र्यात्किंत्वधर्मत्वभयात् अन्यथान्दादिपुरं पुरुषं नेयेयादितिवा
च्यं अनंदाद्दशायां अनुमतिकर्त्तुरेवाभावात्समाधत्तेतथापीति नद्या
मुष्यायणमितिवचनेपाठः उभयबीजं येन सतथापतिस्तदभावात्तत्र्या
चपत्युरभवे उभयपुत्रत्वसंवित्करणासंभवात् नद्वयोरपत्यमितिभावः
जीवतिनुनाद्वयासम्बिन्तकरणसंभवतीत्यप्रेत्याहजीवतीति क्षेत्रीस्व
तोलकारःप्रामादिकः रत्नाकरः एके अहुरित्यन्यः द्वितीयं पितामहपि
ण्डं आरभ्य पुत्रः क्षेत्रजपुत्रस्य पुत्रः द्वौ द्वावनुकीर्तयेत् तृतीये प्रपि
तामहपिण्डे पौत्र क्षेत्रजस्य पौत्रः द्वावनुकीर्तयेदित्यर्थः अजवस्तु
जीवतिसु पलक्षणं यत्द्व्यामुष्यायणमितिवचनेपाठः क्षेत्रजंय
त् अपत्यं द्व्यामुष्यायणमाहुः कुत्तः अस्वातंत्र्यात् भर्तुरितिशेषः अ
स्वातंत्र्ये बीजमाह अलुप्तबीजत्वात् ननु बीजस्य चेत् प्राधान्यं तर्हि बी
जिन एवापत्यं भवतु न क्षेत्रिणः अत्रसंवित्योप्रोत्य तदा क्षेत्रिणो
वापत्यं भवतु न बीजिनः इत्याशंक्याद्वयोरपत्यत्वे युक्तिमाह नाबी
जमित्यादि एके आहुरिति याजनाउत्पादपितुः क्षेत्रद्वाराबीजद्वाराचे
त्यर्थः एकपिण्डेवेति गौणकल्पः आवक्षणः इति उद्दिश्येत्यर्थः कः
त्य इदमाहतुनिरस्कात्यायनो तद्वचनंप्राकूलिखितं नारदः द्व्यामु
ष्यायणाकारयुद्धीभ्यां पिण्डौदर्दकेपृथक् अलब्धादर्द्धांशमाद्द्युर्बी
जि क्षेत्रिकयोस्तथा पृथगितिलिखनात् पिण्डद्वयदानं द्वाभ्यांपि
तृभ्यां तत्र क्रमस्यानुक्तत्वादिच्छाविकल्पः रत्नाकरः यत्र बीजिन औ
रसोस्ति क्षेत्रिणोऽपि कश्चिद्विशेषो रसो जातस्तद्विषयमि दं अपुत्रयो
स्तु तयोस्तयोरपि कृत्स्नमंशंगृह्णीयादिति बौधायनः अथा
प्युदाहरन्ति द्विपितुः पिण्डदानं स्यात्पिण्डे पिण्डे च नामनी त्रयश्च पिण्डाः
षण्णां स्युरेवं कुर्वन्न मुह्यति नदुष्यतीति अर्थ इति रत्नाकरः अस्यतु सं
स्कार क्षेत्रिण एव कर्तव्य स्तस्यैव पुत्राकांक्षित्वात् गोत्रं च द्वयोरेव प्राप्नो

तिद्विगोत्राश्चेति बौधायनवाक्यात् तत्कर्त्तव्यनान्दीमुखे च पितृपक्षौ
उभावेव भवतः पार्वणतुल्यत्वादित्याहुः अत्र बौधायनादिवाक्ये मन्वा
दिवाक्यविरोध इति अवचण्डेश्वरः सम्म[illegible]ता समाधाः यदातु पुत्रवान
देवरादिः क्षेत्रिपुत्रार्थं प्रवृत्तस्तदा क्षेत्रिण एव पुत्रो न बीजिनः यदा तु
स पुत्रोऽपि आवयोरपत्यमिदं समानं भविष्यतीति संविद्रूपं क्रियाभ्युप
गममाश्रित्योत्पादयति तदा द्वयोरप्यसौ पुत्रो भवतीति मनुः स्वयमेव
स्पष्टयति क्रियाभ्युपगमोऽर्थेन बीजार्थं यत्प्रदीयते तस्येह भागिनौ दृष्टौ
बीजी क्षेत्रिक एव च क्रियाभ्युपगमः एत[illegible]ज्जातमपत्यमावयोर्भविष्य
तीति प्रतिज्ञाः संविदागुः प्रतिज्ञाननियमाश्रव संश्रवाः अङ्गीकाराभ्युप
गमप्रतिश्रवसमाधयस्त्विदमरः नारदकात्यायनौ क्षेत्रिकानुमतेन बीजं
क्षेत्रे यस्य प्रकीर्यते तदपत्यं द्वयोरेव बीजिक्षेत्रिकयोर्मतं बृहस्पतिः
दत्तोऽपविद्धः क्रीतश्च कृतः शौद्रस्तथैव च जातिशुद्धा मध्यमास्ते सुता म
ताः क्षेत्रजो गदितः सद्भिस्तथा पौनर्भवः सुतः क[illegible]नीनश्च सहोढश्च
गूढोत्पन्नस्तथैव च इति अत्र क्षेत्रजादीनां व्यभिचारिणीपुत्रत्वान्नि
न्दनं तत् विधिमतिक्रम्य कामात् प्रवृत्तयोः जातो यः क्षेत्रजस्तत्परं अ
नेन च स्वयमुपागतस्यापविद्धकृतकानां तभीषः कृतः इति भावः बृहस्पतिः
क्षेत्रजाद्याः सुतास्त्व[illegible]न्ये पंचषट्सप्तभागिनः क्षेत्रजाद्याः क्षेत्रजकानी
नर्भवः यथासंख्यं पंचषट्सप्तभागिनः इत्यर्थः इति रत्नाकरः अष्टाद
शं क्षेत्रजस्य इति हारीत विभागं क्षेत्रजो भुंक्ते इति ब्रह्मपुराणं त्रीन् क्षेत्रपु
त्रिकापुत्रयोः इति शंखलिखितौ भागक्रमः पूर्वोक्तो ध्येयः अयमनिरुक्त
श्चेत् पितृत्र्यक्थहारी बंधुरिक्थहारी चेति सर्वेषां मतं अनुमतक्षेत्रजस्य
तुः यद्यपि कर्मरिक्थिनौ स्यातामौरसक्षेत्रजौ सुतौ तथापि त यस्य पित्र्यं स्या
[illegible]त् सतन्दद्यान्नी तेनेतरः इति कात्यादि रिक्थग्रहणं बीजिन एव तस्य चय
त्रवर्चोनौ त्यादिनौ द्वादश इति विष्णुः पुत्रः अत्र मन्त्रकरणे इदमवधेयं
शौचं ततः प्रवृत्तस्य यदि दैवात् स्वयं संभवति तदा तदपि सम्बिदनुसारात् द्व
योरेव बीजिन एव क्षेत्रिण एव वा भवति इत्युपपत्त्या लभ्यते इति संक्षेपः
अथ गूढोत्पन्नः अयं चतुर्थ इति याज्ञवल्क्यमतं तत्ती यक्षेत्रनिरूपणान
न्तरमेव गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः इत्यनेन गूढोत्पन्नस्यैव
पूर्णांशहरत्वमन्येषां हारी तारयुक्तभागग्रहणार्थं च प्रच्छन्न इति कस्यायं पुत्र

इतिविशेषज्ञानविषयः मनुः उत्पद्यते गृहे यस्य न विज्ञायेत कस्य सः स गृ
हे गूढ उत्पन्नस्तस्य स्यात् यस्य तल्पजः अयं हीनवर्णान्न जातः इति
कथं विज्ञायते बीजिनोऽपरिचये च गूढोत्पन्नः पुत्रो भवति मातुः सवर्णा
मातृसंस्कारकस्य सगोत्रो वंशकरश्च इति रत्नाकरः सम्मतां व्याख्यां
असमानवर्णाद्वा बीजिनोऽपरिचयस्यैव हेतुत्वेनोपन्यासात् स्त्रि
या ज्ञानब्राह्मणीरसपुत्रस्य ब्राह्मणत्वं भवतीति रत्नाकरस्याभिप्रायः
लक्ष्यते तत्र विप्रात् महिषी च क्षत्रस्तु राजन्यामित्याद्युपक्रम्य वैश्या नु
करणः शूद्रायां विद्यान्नेषविधिः स्मृतः इति याज्ञवल्क्यवचनस्य शेषवचो
चनं प्रकुर्वीरन् मातृवद्वर्णसंकराः इति वचनस्य च परस्परविरोधपरि
हारश्चि न्तनीयः कुत्सकुम्भकारस्तु निषादापरनाम्नः शूद्रायां ब्राह्मणी
ज्जातस्य पारशवस्य परिणीतायां पुत्र इत्युक्तवान् अत्र च कस्यापि विशेषं
ज्ञाने च गूढोत्पन्नो भवतीति ज्ञापितवान् नोक्तवान् परं तु सजातीयोऽयं
भवति इति ज्ञाने पुरुषस्य व्यक्तिविशेषाज्ञाने च गूढोत्पन्नो भवतीति ज्ञा
पितवान् तत्रापि सजातीय इति अनपकृष्टवर्णात् स्पर्शः रत्नाकरैकवैक
वाक्यत्वात् यौगिकज्ञाश्च इति ध्येयं अत्र बीजिनः परिचयेऽनुमतिस्तने
घवाभ्यनुज्ञादिरस्यविध्यनतिक्रमे च क्षेत्रजो भवति नानुमतस्त्वेकि
न्नत्याद्युक्तस्यैवेति प्रागुक्तं न तु बीजिनोऽपरिचये गूढोत्पन्नो नाम पुत्रो
भवति परिचये तु न इत्युक्तप्रभावः न चानुमतिं विना परिचितो बीजीप
रिपुत्रमत्यादस्येत्तरात्तस्यैव पुत्रो भवति न त्वस्येति वाच्यं अवन्नाकृ
तं बीजं यस्य स्पर्शे त्रेषु रोहति तद्बीजं स्वेत्रिकस्यैव न च सोऽलभते फलं इ
तिमनुः ना ननिषेधादिति चेदेतस्यापि तु योगं स्तु नन्यत्र चाहितविवः
स्तुतः यद्वा नारुन्धमित्यादिवचनेन गूढोत्पन्नस्य क्षेत्रजपुत्रादीनामेव
निरूपणमुक्तं अन्यथा अननुमतपरिचितनबीजिजातः क्षेत्रजोऽप्य
परः पुत्रः स्यात् नेतत्युज्यते अनियुक्तासुतश्चैव पुत्रिण्याप्तश्च
देवरात् उभौ तौ नार्हतो भागं जारजातककामजौ इति मनुना तस्य भा
गनिषेधात् न वभाग निषेधेपि तत्क्षेत्रिस्वत्वमेवास्त्विति वाच्यं त
त्क्षेत्रे स्वत्वेपि रोहि च वतु बीजिनः पुत्रकार्यकारित्वस्वतिविरहात् नच
स्यापुत्रकार्यकारित्वे किं मानं पुत्रकवचनोत्पादितेत्वोदश इति विष्णुसूत्र
स्य शे वशिष्ठाद्युक्तकानयाम्भद्रापुत्र एव रत्नाकरेण दत्तविषयत्वादि ७२

त्तिवा[illegible]च्यं अप्रमात्ताव स्यं तु मे तं मा च क्षेत्रे परःबीजानि वाप्सुः जनयित्तः
पुत्रोभवति सांपराये मायं वेत्ता कुरुते तं तु मेतं इत्याय स्तम्वेनः बीजं न
एव पुत्रत्वकथनात् तत्र च सांपराये इति दर्शीनात्तत्तस्य बीजि परलो
किकक्रियो प्युत्रपुत्रत्वमिति प्रतीयते वचनार्थं तु अप्रमत्ताः प्रसा
द मनवधानं अकुर्वन्तः तं तु पुत्र पौत्रादिकं क्षेत्रे स्वभार्य्यायां परस्य बी
जानि मा निषेधे वाप्सुः उत्पानि भवन्तु कर्म्मीकर्तीरिटी अनमायोगात्
अत्र बीजमाह जनयितः बीजिनः क्षेत्रो सं परायो परलोके मा यं निरर्थ
कं इत्यर्थं रत्नाकरस्सम्मतः अथ मनुः अत्र गाथा वायुगीताः कीर्तयं
ति पुराविदः यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे नश्यती षुर्यथा
विद्धः खे विद्धमनुविध्यत तथा नश्यति [illegible] यैक्षिप्रं बीजं परपरिग्रहे
पृथोरपीमां पृथिवीं भार्य्यां पूर्वविदो विदुः स्थानुच्छेदस्य केदारमाहुः
शल्यवतो मृगं एनां चानेव पुरुषो यो ज्ञायास्याप्रजेति विप्राः प्राहुस्तु
थ्या वेन यो भर्त्ता सा स्मृतांगना नतु निष्क्रयविसर्गाभ्यां भार्य्या भर्त्तुर्विमुच्य
ते एवं धर्म्मं विजानीमः प्राक्प्रजापतिनिर्म्मितं सकृदंशो निपतति स
कृत्कन्या प्रदीयते सकृदाह ददानीति त्रीण्येतानि सकृत्त् यथा गोश्वो
ष्ट्रदासीसु महिष्यजाविकासु च नोत्पादकः प्रजाभागी तथैवान्यांगनास्व
पि येऽक्षेत्रिण बीजवन्तोः परक्षेत्रप्रवापिनः ते वैशस्य जातस्य न लभ
ते फलं क्वचित् एतेषां वचनानामर्थः खे आकाशे पूर्वमेकेन विद्धस्य
अतेच्छिद्राकाशे इत्यर्थः पश्चात्तु विध्यतन्यथा इषुर्वाणः नश्यति अ
पचितो भवन्ति न तेन मृगप्राप्तिः विवाहकर्त्तुरेव पुत्रे अधिकार इति
भावः ननु भोक्ता यदि त्तां संग[illegible]यानरा कस्य पुत्रः स्यादिति जिज्ञासा
यां पूर्वसंगृहीतत्वात् असिद्धिरित्युत्तरयति पृथो भार्य्या पृथिवी अन
न्तरं वहुभिराजाभिः सम्बन्धमपि पृथोरेव भार्य्या पृथिवीति वदन्ति वर
न्ति तस्याः पूर्वयेन गृहीता न्या पत्नी पश्चात् अन्येन संगृहीतास्याउपभु
क्तापि तस्यैव इति एवं केदारं धान्यादिक्षेत्रं स्थाणुमाः वनच्छेदनं त
रमवशिष्टच्छिन्नस्कन्धवृक्षमुत्पाटयति तमपि तु तदनन्तरं कर्षकस्य एवं
शल्यवतः शल्यप्रहारेण वशीकृतो रेव मृगः ननु मत्त मृगं आरादावारा
यप छायमानस्य ननु तत्यान्य द्रव्यवत् परस्वत्वं कस्यादिनापि जायते
न वा इत्यत्र सहेतु कमुत्तरमाह एतावानिति एतत्परिमाण एकः पुरु

षइति भावः अत्रार्थे तु त्वक्भेदेन श्रुतिरूपन्यस्ता अतः एकस्य स्वरूपम
न्यस्य स्वरूपत्वं कथं भजनेत्ति दानविक्रयादिना क्षितस्य नान्यभाप्यी
त्वं भवतीति सिद्धमुत्तरं स्फुटमाह न निष्क्रये त्यादि निष्क्रयः विक्रयः विः
सर्गः त्यागः एताभ्यां भाप्यीत्वं न गच्छतीत्यर्थः पञ्चमहापनकादौ त्या
गो न भवति प्रायश्चित्तादिना पापनाशे शौचनं भविष्यतीति यथा श
म्भ्रातॄणां दायविभागः सकृदेवेति न कारणं विना भागपरिवर्त्तनार्थं पु
नः पुनर्विभागः कर्त्तव्य इति एवं ददानीति प्रयोगः सकृदेवेत्यत्र च एक
स्मै प्रतिश्रुत्य दत्तेतरस्मै परस्मै दातुं न युज्यते तथा कन्यापि पित्रा सकृदेव ए
कस्मै दीयते अत्र सकृदाह ददानीत्यनेनैव सकृत्कन्यादानस्यापि सि
द्धौ पुनः सकृत्कन्या प्रदीयते इत्युपादानमपार्थमिति चेत् कुल्लूकभट्टः
द्रव्यसामान्यायसकृद्दानसकृद्दायविभागयोरुपादानं प्रासङ्गिकमे
व सकृत्कन्यादानस्यैव प्रकृतत्वात् पुनरुपादानं एतेन वचनेन
च पूर्वमन्यस्मै दत्तायाः पश्चात् पित्रादितोऽपि अन्येन प्राप्तायां न तदपसं
पर्वसंप्रदानस्यैवेति सूचितं इत्याह यद्यपि त्यादि सुगमं चैत्रे क्षेत्रिण इत्या
दिदृष्टान्ते एतेषां वचनानामर्थे स्त्रीपुंधर्मप्रकरणे विशेषोऽभिहितः
अत्र तु यथाश्रुत एव कथितः मनुना क्षेत्रिण एव अपत्यभागित्वक
थनात् न च एताभिर्वचनानि क्षेत्रपुत्रार्थी क्षेत्रिणो नियोगविषयकाः
णीति वाच्यं तथा सति पूर्वोक्तपुत्रिकास्थले तत्र न पुत्रस्य वोढुः पुत्र
त्वापत्तेः जघन्यान्नारुत्तमित्यादि दृष्टान्ते वैशम्पाय तस्य इति चेत्स्व
केचित् पुत्रिकास्थले स्वकीयवंशोत्पादनार्थमेव कन्यासमर्पणं
परिचितस्य स्वयं प्रवृत्तिस्थले स्वसन्तानार्थं क्षेत्रसमर्पणाभाव इति
विशेषः अतएव मनुः भर्तुः पुत्रं विजानन्ति श्रुतिद्वैधन्तु भर्तरि प्राहुरु
त्पादकं केचिदपरे क्षेत्रिणं विदुः क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः
पुमान् क्षेत्रबीजसमायोगात् संभवः सर्वदेहिनां विशिष्टं कुत्रचिद्बी
जं स्त्रीयोनिस्त्वेव कुत्रचित् उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते भर्तुः
पुत्रो भवतीति मनुष्यो मन्यन्ते सामान्यतः तत्र को भर्त्ता पाणिग्राहकः
अपत्योत्पादको वा इत्यत्र श्रुतिवाक्यस्यार्थे संशयः इति प्रथमश्लोक
र्थः अत्र पद्धतिः पाणिग्राहका पत्योत्पादकयोर्मध्ये यः पुत्रोत्पादि
विषये प्राधान्यमवलम्ब्यते तस्यैव पुत्र इति तत्रापि संशयः उभयस्यैव ७२

प्रधानत्वात् इति अन्या हि हिंसाधारणमनाहस्ते चभक्ता इति सर्वैर्हिना
मिति वृहस्पादीनामपीत्यर्थः तथा च क्षेत्रबीजयोः समानत्वसत्त्वाप्यस्य
स्य बीजवतो वा पुत्र इति संशयस्तदवस्थ एव अत्र विषमविभागेन स
मार्धेन माह विशिष्टमिति विषमं प्रधानं अनुस्से अत्र कीदृशो विभागः
तु चाबीजिनः प्राधान्यं कुत्र वा क्षेत्रिण इत्याह कुत्रचक भद्रः अनियुक्ता
यां अन्येनोत्पादने बीजिनः प्राधान्यं नियुक्तायां तु क्षेत्रिण इव इति अन
एवानि युक्तायां बृहस्पति भार्यायां चन्द्रेण जातः बुधः चंद्रस्यैव पुत्रः
न बृहस्पतेः सत्यवत्यां कन्याकाले पराशरमुनेर्जातः पुत्रो व्यासः परा
शरस्यैव न तस्य चती प्रतिपालकस्य पितुर्दाशराजस्य उपविचरस्य
वा राज्ञः तस्य चस्या जनयितुः स्त्रीयोनिः प्राधान्यं यथा विचित्रवीर्य
स्य भार्यायां व्यासाज्जातो धृतराष्ट्र पाण्डु विचित्रवीर्यस्यैव इति न च
विनिगमनाविरहः यथा बीजिनो ऽपत्यं भवति अभिसंधिस्थले विजी
न एवापत्यं अन्यथा तु क्षेत्रिण एव इति वाच्यं बीजसमवाये नैव का
प्यांस्पजन्यमानत्वेन प्रायो ऽभेदात् क्षेत्रस्य चाधिकरणत्वमात्रेणान्त
तो ऽपकृष्टत्वात् तदेवानुभावपूर्वकमाह मनुः बीजस्य चैव यो न्या
श्च बीजमुत्कृष्टमुच्यते अत्र हेतुः सर्वभूतप्रसूतिर्हि बीजलक्षणल
क्षिता बीजस्य जलक्षणेन चिह्नेन आकारविशेषरूपविशेषादिना
ऽव्यभिचरितेन लक्षिता चिह्निता प्रसूतिः प्रसवो भवति हि यत इत्य
र्थः तदेवाह यादृशं तूप्यते बीजं क्षेत्रे कालोपपादिते तादृग्रोह
ति तत्तस्मिन् बीजं स्वैर्व्यंजितं गुणैः न च पौनरुक्त्यं पूर्ववचनार्थे प्र
माणोपन्यासार्थकत्वात् अधिकार्थपोषकत्वाच्च तथा हि अत्र पूर्वपक्षः
उर्वरायां भूमौ उप्तं बीजं उत्कृष्टं फलं जनयति ऊषरायां त्वपकृष्टं अतस्त
त्र भूम्यपवसमवायो ऽपि वाच्य इति सो ऽप्यत्र निराक्रियते कालोपपादि
ते इत्यनेन तथा हि काले वपनयोग्यकाले उपपादिते कर्षणादिना संस्कृ
ते क्षेत्रे उप्तं बीजं उत्कृष्टं फलं जनयति अनुचितकाले कर्षणे तु न तथेति
किंकालस्यापि समवायो वक्तुं शक्यते तस्मान्निमित्तविशेषात् फलविशे
ष इत्येव वाच्यः न त्वापत्तिः नोत्तरकालस्यं निरवयवस्य द्रव्यत्वमवाधित्वा
यीनात्त इत्यत्राह इयं हि भूमिर्भूतानां शाश्वती योनिरुच्यते न च योनिगु
णान्कांश्चित् बीजं पुष्यति पुष्टिषु वैष घाय स्वयोनिभूताया याभसेरूदर्शीनं यो

श्लोकः २८

निगुणान्भूमिगुणान्श्यामत्वादीन्शिखित्वावयवसंयोगादींश्च
कांश्चित्पुष्यत्तिगृह्णातियद्युक्तंउर्वराजातंशस्यंपुष्टंभवतीतिपुष्टि
रवयववाधिकस्समत्वात्तभूम्योवयवोऽप्यत्रकल्प्यतेइतितदपिवसंग
छन्तेयतःपुष्टिरपिनभूमिगुणाःश्यामत्वादयोचनीत्तेयथाश्याम
कपालाइत्यन्नघटःश्यामोभवतिनात्रतथाचधान्यबीजगतान्य
परिमाणेनतत्क्षेत्रप्राधान्यहस्यस्येतिधान्यबीजारंभकसूक्ष्मावय
वैःशिथिलभावमापन्नैराहोस्विदेवधान्यांकुरोजन्यतेतदनंतर
मुदासीनापिसत्याउत्कृष्टेभूम्यवयवकजलावयवैःसएववृक्षःसंवर्द्ध
तेअतःपूर्वनिमित्तत्वात्तबीजंप्रधानंअनन्तरंमितित्वात्तभूमिपरप्र
धानंउदासीनस्तुनप्रधानंअप्रधानंवाअतएवभर्त्तानियुक्तायांजा
तःपुत्रःक्षेत्रिणएवनतुस्वार्थमप्युदासीनेननियुक्तायांउदासीन
ननियुक्तायांउदासीनस्येतिनचवैपरीत्यंआरोभस्यवयवैरेव
वृक्षउत्पद्यतेइतिवाच्यंतथासतिनानाभूमिषुएकजातीयबीज
वपनेएकजातीयशस्योत्पत्तिवतएकस्मिन्नानाजातीयबीजव
पनेएकजातीयशस्योत्पत्त्यापत्तेश्चितितएतदेवाह मनुःभूम्यामप्ये
ककेदारेकालोप्तानिकृषीवलैःनानारूपाणिजायंतेबीजानीह
स्वभावतः ब्रीहयःशालयमुद्गास्तिलामाषास्तथायवाः अन्यदुप्तं
त्ततदेवप्ररोहति अतएवविनापिक्षेत्रंअतिकठिनलोहादिभाज
नेपिजलोपसिक्तंबीजमंकुरंकरोत्तिनतुविनाबीजंजलोपसि
क्तेक्षेत्रमात्रेनतुविनापिबीजंजलोपसिक्ताभूमिस्तृणादिकंज
नयतीतिक्षेत्रस्यापित्तथात्वंकचिद्दृश्यतेन चसत्तृणादिषुवरंक्षे
त्रस्यप्राधान्यमस्तुधान्यादौकुचित्बीजस्यैवप्राधान्यंविद्यतेअ
एवास्तत्रयधान्यादयोऽत्रदृष्टान्तविधयाउपन्यस्ताभवंतीवाच्यंप्रकृ
तस्यअपत्यजननस्यवर्कितृणादिदृष्टान्तेनबीजाप्रधानकत्वमि
त्यत्रविशेषप्रतिपादकयुक्तभावात्तदितिचेन्नातत्रपार्थिवभागस्यै
वबीजत्वात्तथाउद्भिद्वृश्चिकवदलगीइलिन्यायाचाप्पीयकारिताः
व्याख्यानेदग्धवेतबीजात्तकदलीकाण्डोत्पत्तिदृष्ट्वा अत्रहेतुःपार्थि
वानांसर्वेषामेवसूक्ष्मत्तिकाप्राणिशरीराणांपरमाणुनामकैरत्ति
सूक्ष्मभूतिव्यपदेशावत्वत्वेनतादृशावयवानांचसत्वानतेविशेषा



(श्लोकः२८

त्परस्परसंयोगलक्षणारंभेण चानाजातीयसंस्थानोत्पत्तिः न च एवं सं
त्तिकेवलमृत्तिकापुंजात् धान्यादिवीजावानकथं यवादिवृक्षोत्प
त्तिः मृत्तिकापुंजे धान्यादिवीजे च तादृशावयवसत्वादिति वाच्यं ईश्व
रेच्छानियन्त्रितस्तेभितवाप्रुनास्वभावेन धान्यवादिवीजसम्बन्धि सं
योगविशेषविशिष्टावयवैर्वैवयवादिवृक्षोत्पादकसंयोगविशेषज
ननोपगमात् फलवत्वेन चक्षुर्वित्तदन्यवीजगतसंयोगविशिष्टावय
वैरपि अन्यवृक्षोत्पादकसंयोगोपगमः च यथा रंभेवेत्रवीजा
त् कदलीकाण्डोत्पत्तिरिति एवं च तृणादिस्यत्वे मृत्तिकाभागीयसं
योगविशिष्टतादृशावयवैरेव तृणाद्युत्पत्तिरवसीयते न चैवं लक्षे
त्रस्य प्राधान्यं वीजस्यानुपयोगित्वेन अप्रधानत्वेनोक्त्रेखनीया
भावात् वस्तिच चाक्षुषयः पुराणे पृथिव्यामेव सर्वौषधीवीजस्य
स्पष्टनन्तर्रस्थितिरिति यथा श्रीभागवते त्वं खल्वोषधिवीजानिप्रा
क् सृष्टानि स्वयम्भुवा न मुंचस्यास्मत्तद्ध्यानि मामवज्ञाय मन्दधीः
आत्मरुद्धानीत्यनेन पृथिव्यां सर्ववीजस्थितिरुक्ता अत एव भग
वान् कालिदासः यदमोघमपामन्तरुप्तं वीजमत्वया अतश्चराचर
विश्वं प्रभवस्तस्य गीयते इति यामदुः सर्ववीजप्रसूतिरितीतिच अ
त्र प्रथमश्लोकः दैवैर्व्रह्मणः स्तुतिः हे अजन्मन् सृष्ट्यादौ जलमात्रे
उत्पन्ने तस्मिन्नप्सु ह्रीजं त्वया उप्तं तस्य प्रसवः विश्वं स्थावरं जंगमं रूप
मित्यर्थः तथा च जलस्य वीजसम्बन्धात् स्थावरजंगममूलीभूतवीज
मयी पृथिवी उत्पद्यते इति संक्षेपः अत्र इदमवधेयं शुक्रशोणित
संभवः पुत्रो मातापित्रोर्निभिन्नकः इति वशिष्ठस्मरणात् पुंशुक्रस्त्री
शोणिते तोभयाभिन्यनेनापत्यशरीरोत्पत्तेः क्षेत्रप्राधान्यमेव युज्य
ते इति न दृष्टान्तसमता इति चेत् वशिष्ठवचनेन दानविक्रयादौ अ
प्रधानीभूताया अपि मातुर्मत्यपेक्षार्थं तस्य प्रदानविक्रयत्यागे
षु मातापितरौ प्रभवतः इत्युत्तरार्द्धेन तथा पर्यवसानात् नैते
नयोन्यपेक्षया पुरुषस्य प्राधान्यं विरुद्ध्यते न चैतादृशकल्पनायां
मनाभावः शरीरावयवस्य शुक्रशोणितसंभवत्वाविशेषादिति वाच्य
यं शुक्र एव जीवसम्बन्धाधिक्यात् तथा च श्रीभागवते कर्मणा दै
वनेत्रेण जन्तुर्देहोपपत्तये स्त्रियाः प्रविष्ट उदरं पुंसो रेतः कणाश्रयः इ

तिरेवं नेत्यणायकं पस्य अत एव विनापि क्षेत्रं काष्ठुद्रोणस्यादौ भरद्वा
जो द्रवीथ्यां चिक्षेः पात द्रोणादेरुत्पत्तिः न विना तु बीजं क्षेत्रमात्रे
ण कस्याप्युत्पत्तिः भगीरथादेस्तु पीत वलादेवउत्पत्तिः स्वयंभुवद्
व रवइद्रभ्नीत्तन नमानामल्पतपसां तु विना क्षेत्रं न सन्तानोत्प
त्तिः अत एव स्वापापात्मर्थ्यः जन्मसंस्कारविधारैः शैकेः स्वाध्यायक
र्मणोः ह्रासदर्शननोह्रासः संप्रहायस्मतीयतां इति शुक्रशोणित
समवायात्मतातापि तत्सजातीयावयचोऽपत्यस्येति अनुभवतया
पत्यसंतानोत्पत्तिमुद्दिश्य परक्षेत्रसमर्पणे वचनवशात् क्षेत्रिण
वापत्यं तदनुद्देशे तु बीजिन एव इत्याहुः केचित्तु परक्षेत्रे जायमानः
पुत्रः परस्वत्वास्पदीभूतो बीजिनः परलौकिकक्रियायामधिकारीः
न क्षेत्रिण आपस्तम्बवचने संपराय इति दर्शनात् अत्र गाथा वायुगी
ता इत्यादिना च मनुना क्षेत्रिकस्य स्वत्वप्रतिपादितं बीजमत्कृष्टं मुः
च्यते इत्यनेन न च पारलौकिकक्रिया बीजिनः इति कश्चिद्विशिष्टमित्यस्य
कश्चिन्न विषये पारलौकिके कर्मणि कुत्रचिद्विषये स्वत्वनिमित्तकेः
हिके कर्मणि स्पर्धा इत्याहुः गूढोत्पन्नस्य च बीजिपरिचयासम्भवेन
स्वाम्यं तदभावात् बीजिनाउपेक्षितत्वाच्च क्षेत्रिपुत्रत्वमेव इति
सांप्रतं गूढोत्पन्नः षष्ठोऽपत्यं तल्पजस्तस्यासौ इति विष्णुः गूढोत्पन्न
स्य षष्ठत्वकीर्त्तनं एतत्स्वपेक्षया उत्कृष्टगुणज्ञातिपौनर्भवकानीन
सत्वेपूर्णशास्त्रणा सुभां वैचो धनार्थं अन्यत्कानीनमकारणे वस्यैण
अत्यच वित्तहाम हरत्वं बन्धुदायहरं त्वं च प्रायः सर्वमुनिभिः दृष्टएको
न विंशत्पुत्राणाम् इति हारीतः षड्भागं गूढसंभवः इति ब्रह्मपुराणे
एकैकमितरेषां इति शंखलिखितौ इतरेषां पौनर्भवकानीनगू
ढोत्पन्नानां असवर्णगोत्रं वंशः क्षेत्रिण एव इति ध्येयं अथ कानी
न अयं पंचम इति याज्ञवल्क्यमतं चतुर्थगूढोत्पन्ननिरूपणान
न्तरमेव कानीनः कन्यकाजातो मातामहसुतो मतः इति तन्निरूपणा
त् वशिष्टेनाप्यस्य पंचमत्वमुक्तं किंतु गूढोत्पन्नापेक्षया उत्कृष्टत्वम
पकृष्टत्वं तु पौनर्भवापेक्षया यथा वशिष्ठः कानीनः पंचमः सामपित
गृहे संस्कृताकामाद्युत्पादयेत् तत्र कानीनो मातामहस्य पुत्रो भवतीत्याह
पुत्रो भवतीत्याह अथाप्युदाहरन्ति अप्रत्तादुहिता यस्य पुत्रं विन्देत तु ७४

त्यतः पुत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनं इति कामात् स्वच्छन्दा
त्तु अप्रमत्ता असंस्कृता तुल्यतः समानजातीयादिति रत्नाकरः समा
नजातीयादिति अहीनजातीयादित्यर्थः तथा च अप्रमत्ता दुहितापि
रि कामात् संक्रमपि पुरुषं रमयित्वा पुत्रमुत्पादयति स पुत्रः मातामह
स्यैव कानीननामा इत्यर्थः अत्र बोधायनः असंस्कृतामनतिसृष्टां
यामुपगच्छेत् तस्यां यो जातः समवर्णेन पितुर्गृहे स कानीनः सुतः
स्तस्य यस्मै सौ दीयते पुनः इति तथा च यस्मै सा कन्या दीयते तस्मैव सः
पुत्र इति च शिष्टयाज्ञवल्क्याभ्यां विरोधः न चात्र कानीनपदं योगार्थ
परं तथा च कन्याकालीनमपत्यं सहोढनाम कं पाणिग्राहकस्य तस्य
नामकालीन इति न विरोधः इति वाच्यं कालीनस्य सहोढस्य गूढोत्प
पश्चजाते तेषां चोढा पितास्तेयः ते च भागहराः स्मृताः इति नारदेन
सहोढस्य पृथगुपादानात् मनुना च पितृवेश्मनि कन्या तु यं पुत्रं ज
नयेद्रहः तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवं इत्यनेन कानी
नमुक्त्वा अभिगर्भिणी संस्क्रियते इत्यादिना सहोढस्य पृथगभिधाना
च्च न च वशिष्टयाज्ञवल्क्यवचने अस्यां पुत्रो मम पुत्रो भवेदिति
अभिसन्धिरस्त्वीयमिति वाच्यं तथा सति तस्याः पुत्रिकात्वेन त
त्पुत्रस्य पौत्रत्वात् पुत्रत्वानुचितत्वात् इति चेत् एवं चेदिह मातामहस्य
दपुत्रस्तत्र तस्मै च पुत्रः कालीनः वोढा चेदपुत्रस्तदा तस्यैव उभ
योरेवेति चण्डेश्वरसूलपाणिपारिजातादयः उभयपुत्रत्वेऽपि
स्य मातामहसगोत्रभागित्वमेव पार्वणशौचद्विपितृकस्येव ज
वद्व्यवहारः इति अत्रेयमाशंकानन्तरं पुत्रः कथं वोढुः सम्ब
न्धि क्षेत्रजातत्वात् तद्बीजाजातत्वाच्च इति तत्र वचनस्य नातिश
यभावः इति समादधते केचित् अपरे तु यथा अरण्ये पतिते क्षेत्रे आ
त्पन्नं शस्यं ततः केनचित् क्षेत्रस्य ग्रहणे तत् शस्यस्यापि ग्रहणं
सुम्यते तथात्रापि न पुनस्तदानीमुत्पन्नशस्यस्य न कालीनः स्वामिनैव
ग्रहणं युक्तं अन्यथा चिरपर्वमपि नतस्ते क्षेत्रे जातानि शस्यानि सर्वगृही
यात् एवं च असंस्कृतादशायां कन्यायां पितुः स्वाम्यं नेवातः तज्जातम
पत्यं पितुरेव भवतीति चेत् न कन्याकालेऽपि तुरीनोपसंक्रमे वस्वामित्वस्वी
क्रियते न त्वन्यविधं अत एव तद्रोगादिर्निकर्त्तव्यः तत्र शोणितसंभव

त्वात्तमात्स्वत्वास्पदीभूतः पुत्रो मातुः स्वमेव भवति अथैवं वशिष्ठय
ज्ञवल्क्याभ्यां कन्यां संगच्छते न वचनाभ्यां पितुः कन्यायां स्वाम्यमेव स्त्रीऽ
क्रियते भोगश्च वचनवलादेव निवार्यते स्वस्वत्वास्पदीभूतमहिषादि
वदिति वाच्यं तथा सति मुनीनां नानामतत्वेनास्माकं व्यवहारेऽनध्य
वसायापत्तेः न चोक्त एव विषयविभागः मातामहस्य मातुः संस्कर्तृक
स्य वा अपुत्रस्यैव स पुत्र इति तथा वचनानध्यवसाय इति वाच्यं पुत्रा
एकस्य स्वत्वे निश्चिते परस्यापुत्रत्वस्याकिंचित्करत्वात् मातृविवा
हानन्तरमेव मातामहमरणे तदानीमेव तत्पुत्रत्वे सिद्धे तद्गोत्रेण
च संस्कारे कृतेऽनन्तरं वहुरपि मरणे कवनात्त्वे तदानीं तस्य किंगोत्रे
ण संस्कारः कर्तव्य इत्यत्रानध्यवसायः एवं सहोदरस्यापि कालीनत्तु
ल्यत्वापत्तिः तस्यापि आधानदिन एवोत्पन्नत्वात् विवाहकाले च त
स्य न दानं विवाह्यातः पृथक्कृत्वा इतस्तस्यापि द्विपितृकत्वसंभवे एकपि
तृकत्वनम्मपि न युज्यते न च मातुः कारवरत्वे कन्यादाने वस्त्रस्यापि दा
नमिव सगर्भाकन्यादाने गर्भस्यापि दानं भवतीति वाच्यं तथा सति त
स्य दत्तत्वेनैव पुत्रत्वसिद्धौ अतिरिक्तविभागस्य दत्तापेक्षया भागवैफ
ल्यस्यापस्य चानुचितत्वापत्तेः तद्गर्भजातकन्यायाः गर्भवतीविवा
हकर्तुर्भोग्यत्वापत्तेश्चेति उच्यते कालीनत्वेतरपत्यं द्वयोरेव भवति
यत्तत्तस्मिन्नपत्यशोणितसंभवत्वात् तन्मातुरधिकारस्तदानीं मातृ
प्रभुत्वात् मातामहस्यापि अतो मात्रंशे विवाहकर्तुरेवाधिकारः भा
व्यपुत्रत्वे स्यादिति वचनात् न च शोणितसंभवत्वेऽपि तदानीं पितुरेवा
धिकारो युज्यते तदानीं दुहितृसम्बन्धिनः शोणितस्यापि पितृपरतंत्र
त्वादिति वाच्यं तथा सति औरसपुत्रेऽपि मातुरनधिकारात् वशिष्ठोक्त
मातृपरतन्त्रदानानुपपत्तेः न च अस्तु मातुः स्वातन्त्र्यं तत्र एवं सति औ
रसपुत्रे पितुरेवाधिकारः स्यात् तथाहि शुक्रोत्पन्नत्वात् पितुरधिकारः
स्वाभाविकः शोणितोत्पन्नत्वेनापि तस्यैवाधिकारप्राप्तिः तस्मात्त त
स्मिन्नपत्ये क्षेत्रजेऽपि पितुरधिकारो मातामहस्य मातुरधिकारो मा
तुरेवेति वाच्यं भार्यापुत्रश्चेत्यादिना यस्य पत्नी स्वत्ववति पतिस्वत्व
स्य वा स्यपि तु मशक्यत्वात्तन्न चैवं सपत्नीपुत्रेऽपि स्यात् तेऽम्भिधगं धनं इ
ति वचनात् विमातुः स्वत्वापत्तिरिति वाच्यं इष्टत्वात् तत्पितुः पार्वणपिण्ड ७५

दानेनु रत्नकप्रकरणे वक्ष्यते अत्र च मातामहस्य मातृसंस्कारकस्य वा अ
पुत्रत्वे नदृपत्याधिकारः इति ग्रंथकारैरेतदुक्तं हेतुनां च धरे मामः अपुत्रे
ण परक्षेत्रे नियोगोत्पादितः सुतः उभयोरप्यसावृक्थी पिण्डदाता च धर्म्म
तः इति याज्ञवल्क्यवचनात् क्षेत्रजस्य लोपशायां पुत्रत्वं निषामकमित्युक्तं
तथात्रापीति वाच्यं न तट्टीकाकारेण शूलपाणिना एतद्वाभयानुमत्यानदा
हृतारः क्षेत्रकानुमत्ते वीजं क्षेत्रे यस्य प्रकीर्य्यते तदापत्यं द्वयोरेववी
जिक्षेत्रिकयोर्म्मतं इत्यनेन आवयोरपत्यं भवत्वभिसन्धिपूर्वकक्षेत्रजो
त्पादनस्य लोपत्वकथनात् अन्यथा पुत्रेणोत्युक्तं उसारकस्य पुत्राका
क्षासत्वेनाभिसन्धिर्निरहांर्थस पुत्रस्य परक्षेत्रे जातन पुत्राकांक्षाया:
प्राप्तीसंभवात् अपुत्रस्य चागत्यां तत्राकांक्षोत्पत्तेः न च औरसादिरूप
पुत्रचतुष्टयसत्वे तस्य पुत्रत्वासिद्धिरित्येतदर्थमेव ग्रंथकारैरुक्तमि
ति वाच्यं औरसपुत्रं नरासिद्धौ प्रमाणाभावात् सहोढादेरपि तथात्व
प्रसंगात् मलस्मृतिकर्त्तुर्मिनोर्यग्यपुत्रवतः पुत्रिकाकरणस्यासं
गतत्वापत्तेश्च न च पिण्डदोऽंशहरश्चैषां पूर्वाभावे परः परः इति याज्ञ
वल्क्यवचनात् एवं पुत्रचतुष्टयवतः पिण्डदानानधिकारार्थेन
थोक्तमिति वाच्यं ज्येष्ठसत्वे कनिष्ठस्येव औरसादिसत्वे कालीनस्या
प्यनधिकारबोधनार्थतदुक्तेः अन्यथा मातामहस्य तदीनौ सपुत्रत्वे
मतस्य वोढुः पुत्रत्वसिद्धेः नन्तरं किं मातामहस्य पुत्रमरणेऽपि पिण्डं स
नदद्यात् एवं वोढुः पुत्रत्वसिद्धेः नन्तरं तन्नाशकाभावात् एवं औरस
क्षेत्रजोभयसत्वे औरसस्यैवाधिकारित्वसिद्धेः नन्तरं औरसस्य मरणे च किं
क्षेत्रजः पिण्डं न दद्यादिति तस्मात् पूर्वाभावे इत्यस्य स्वाद्याद्यियोग्यपूर्वे
स्मिन् अविद्यमाने इत्येवार्थो वक्तव्यः यदि च कालीने उभयोः स्वत्वं नवा
रयामः परं तु तद्बाधकसत्वे तस्याधिकारं इत्युच्यते तदा तु तन्मते मस्या
कमपि एवं मातामहस्य तावत्पर्य्यन्तं तन्मातृविवाहपर्य्यन्तं तन्मातृसं
स्कारकस्य कस्यांचिदपि भार्य्यायां पुत्रान्तरजनने नपुन्नामनरकत्राण
कर्त्तृत्वं अपुत्रत्वंप्रयुक्तदोषनिवारणं च तेनैव भवतीत्यपि मतमस्माक
मित्याह मनुवचनेयं पुत्रं जनयेदिह इति दर्शनात् रहोजात एव काली
नः न तु परिच्छिन्नपितृकः तथ्यासतियोग्यपेक्षयाचीजस्य प्रधानत्वेन वी
जिन एव पुत्रः स्यादित्यवधेयं अत्रेदमवधेयं मनुनाप्यसत्त्वमुक्तं रत्नक

क्षेत्रकर

कृत्रिमापविद्धादपि न्यूनत्वं देवलेन चकारस्य चतुर्थत्वमुक्तं नारदेन च तथापि वि
ष्णुवशिष्ठाभ्यां पंचमत्वमुक्तं किंतु पौनर्भवापेक्षया न्यूनत्वं गूढोत्पन्नापे
क्षया उत्तमत्वं हारीतेन च फलितः षष्ठत्वमुक्तं एवं रूपविरोधे गुणतार
तम्येनैव व्यवस्था ग्रंथकारसम्मता जातितारतम्यमपि तत्र विवेचनी
यं यस्याहीनवर्णाजातकानीनस्य मदंमंदतरगुणत्वे षष्ठत्वे सप्तमत्वं अ
त्र च सहोढापेक्षया स्य निकृष्टत्वं केनापि नोक्तं तथा च सहोढनिर्गुणका
नीनसत्त्वे का व्यवस्था स्यादिति चेत् तुल्ययुक्त्या सहोढस्यैव तद्धनग्राहि
त्वमेतच्च सवर्णाजो ऽप्यगुणवान्नार्हः स्यात्पैतृके धने इति वचनग्र
ण विरुद्धं दायभागतात्प्रयोजकत्वात् गुणवत्पुत्र सत्त्वे निर्गुणस्या
पि न्यूनभागतायायुक्तत्वात् तत्समानगुणवत्तजन्मा सत्ति धर्म्मविवेचने
च कर्त्तव्यायोरत्नकः संप्रतिग्रहादत्तकः कृत्रिम निधितुल्यः कानीनस्तु
स्वे वस्याद्दत्तकः पौनर्भवः औरसः किंतु तन्मातुर्व्यभिचारेण जातः गूढोत्प
न्नः क्षेत्रजः निधिस्वरूपः तथा च पौनर्भवस्यक्षयप्रत्यासत्तित्वात् ततो
न्यूना कानीनस्य जन्मकाले स्वसम्बन्धाभावात् ततोन्यूनत्वं मातामहस्य
तु तदानीमपि सम्बन्धात् तन्न्यूनत्वं किंतु एतेषां न मातृसंस्कारकाद्युत्पन्न
त्वं दत्तकृत्रिमयोस्तु मातृपरिणीतपरिणीतजातत्वं संभवत्येव परं तु तन्मा
यो जीन्मासत्तिनीमित्ति इति विवेचनां अत्र सिद्धांतः धर्मापेक्षया जन्मसंम्ब
न्धस्य शास्त्रीयस्य दायग्राह्याधिकार प्रकरणे आधिक्यं वक्त
व्यं अन्यथा पुत्रप्रतिनिधी भूतसहोढादि सत्त्वे भागिनेयादेरधिका
रः स्यात् तथा च दत्तकृत्रिमयोः सत्तोरपि आदौ पौनर्भवस्याधिकारः स
च विष्णुवशिष्ठाद्युक्तः याज्ञवल्क्येन च परस्य निकृष्टत्वं उक्तं तद्गुणजातिता
रत म्येनैवेति वक्तव्यं तथा हि अविद्यमानस्वामिके परक्षेत्रे स्ववीजजा
तं शास्यं अनयोः परस्परं विशेषः वीजस्य प्राधान्यादेवं क्षेपः न तत्र वीजं
निधितुल्यं अतस्य स्वामित्वात् क्षेत्रं च स्वकीयं इति गूढोत्पन्नमधिकं पुन
र्भूः पुनः संस्कारे ऽपि प्रथमपरिणेतुरेव स्वत्वे जाते आपुत्राशयनमित्यादि
वचनात् पतिमरणे ऽपि तस्या नाशस्त्रीकारे परक्षेत्रजातमिस्यं शान्तोन्यू
नं पौनर्भवमपत्यं कानीनस्तु दानफलिकायाः दुहितुः शास्त्रोक्तप्रजा
फलकत्वाभावात् तज्जातमपत्यं गूढोत्पन्नान्निकृष्टमिति नाध्यं वीजि
नो अपरिचये गूढोत्पन्नस्येत्यैव क्षेत्रिणो ऽपरिचये पौनर्भवस्यापि आस ७६

न्नत्वात् अत्र केचित् प्रमेयमित्याकारकस्वीकारविषये परक्षेत्रे उत्पादितपौ
नर्भवः विप्लुतः उत्कृष्टः तादृशस्वीकाराभावे तु षष्ठो याज्ञवल्क्योक्तः निकृ
ष्टः यथा च क्षेत्रिकस्य आवयोरपत्यं सममादन्यस्य जीवतः क्षेत्रे परस्मात्त
स्मात् रक्षणात् भर्तुरिव द्वयोर्वेति गोतमसूत्रेण बोधितं परक्षेत्रे जातं तज्जीय
मपत्यं नियोगात् नोत्पादयेदिति द्वितीयामत्यस्यार्थे दृष्टुत्पादयेत् जनपि
तुस्तत् स्यादिति जनयितुरपत्यमित्यस्यार्थः समयात् संकेतात् सर्वं अ
पत्यं भविष्यतीति नियमादन्यस्य क्षेत्रिणो भवतीत्यर्थः इति समयादन्य
स्येत्यस्यार्थः जीवतः प्रजानामसमर्थस्य पत्युः क्षेत्रे भार्यायां परस्मादुत्प
घनेन तत्तनीमपि क्षेत्रिणः वीत्यापि समयेन परस्मान्नस्य इति नस्य जी
वितश्च क्षेत्रे बीत्यपि परस्मात्यस्येत्यस्यार्थः यदि तु परे बीजी क्षेत्रस्य भर
णं कुरुते तदा प्रथममपत्यं जीविन एव अरक्षणे तु भर्त्तुः यदि तु भर्त्ते
व भरणं कुरुते तदा क्षेत्रिण एव इति भर्तृशब्दस्य भरणकर्तृत्वाच्च कृत्यमः
भिप्रेत्य रक्षणात् भर्तुरित्यस्यार्थः द्वयोर्वेति यत्र तद्वावप्यपत्यार्थिनौ तत्र द्व
योरपत्यमासौ भवतीत्यर्थः इति मीर्वे स्पष्टं माह गूढोत्पन्नस्तु बीजिनोऽ
परिचयेमात्तु रेवमप्याह नारदः नस्यात्क्षेत्रं वीना वीजं च विनास्तितत्
अतोऽपत्यद्वयो दृष्टं पितु मीतुस्तु धर्मतः पितु वीजिन इत्यर्थः ततश्च
मानसम्बन्धादेव मातृस्वामिनः सम्बन्धः तत्रच रतिपुत्रफलादाराः इति
कालिकापुराणात् पुत्रविषये दुहितृपे साभाव्यावलवत्वात् आदौ
गूढोत्पन्नोऽधिकारी ततः कानीन इति याज्ञवल्क्यमतं मनुनापत्का
नीनस्य समत्वमुक्तं तन्त्वोक्तमातसंस्कारक पुत्रत्वमपेक्ष्य तत्स्य
स्वत्वकाले उत्पन्नस्वादपकर्षः कानीनस्य मातृसंस्कारक पुत्रमंगी
कुर्वीणो नारदो यत्तु गूढोत्पन्नापेक्षया उत्कृष्टत्वमुक्तवान् तदतिशय
गुणावत्त्वमपेक्ष्यैव अधिकमग्रे स्फुपरमेव व्यक्तीभविष्यति विद्धुद्दे व
लाभ्यामपि कानीनस्य गुणवात्त्वमपेक्षितं एवमन्यत्रापि समाधेयं इ
त्याहुः शंखलिखितदेवलादिभिः कानीनस्य बंधादायादत्वमुक्तं मनु
बौधायनाद्यैश्च पितृमातृदायादत्वमुक्तं तत्र केचित् सर्वस्मृतेः प्रबल
त्वान्मनुस्मृत्योक्तं पितृमातृदायादत्वं युक्तं इत्याहुः तत्र तथा सति शंखा
दिनामप्रमाणत्वापत्तेस्तस्मत्कानीनो यो द्विपितृकः समातृसंस्कार
कपितुर्धनहरः ततन्नाचारेः मनुवचनात् मातामहरूप पितुस्त

ऊढात्वादेः सर्वस्यैव धनाहारी नारदादिवचनात्तन्मैवं सति परस्परन्यूनत्वं न च
मनुवचनेऽपविद्धपर्यन्तता दृशकालीनस्यापि ग्रहणमिति वाच्यं तथा सत्यपवि
द्धतादृशकालीनयोः समानाधिकारापत्तेः इति मैवं अपविद्धश्चेति चकारेण
तस्यापि संग्रहात् याज्ञवल्क्यादिवत् क्रमस्य दत्तप्रकरेताकेव अवधारणी
यः न चैवं नारदेन विरोधः तेन कालीनस्यामान संस्कारकपुत्रत्वपित्वं बंधुधन
हारिद्वयोः कथनादिति वाच्यं वंधुधनहारीद्वयोः कथनादिति वाच्यं वंधुध
नहारित्वबोधकवचनेकालीनस्य मातामहपुत्रत्वाभिप्रायकल्पनासति
विरहात् न हि याज्ञवल्क्येन यदभिप्रेतं नारदे न तन्नाभिप्रेतमिति वक्तुं श
क्यते अधिके दत्तप्रकरणे वक्ष्यते अत्र जाद्याः सुतास्त्वन्ये पंचषट्सप्तभा
गिनः इति बृहस्पतिः क्षेत्रजकालीनर्भवा यथासंख्यं पंचषट्सप्तभागि
नः इत्यर्थः इति रत्नाकरः अत्र जादयः पंचस्वगुणमध्यविधनिगुणाभेदे
न पंचषट्सप्तभागिनः इत्युक्तौ कासुतिरिति चिंत्यं विभजिष्यमाण एकविं
शं कालीनाय दद्यात् इति हारीतः कालीनस्याष्टमांशकं इति ब्रह्मपुराणं
एके कमितरेषां इति शंखलिखितौ इतरेषां पौनर्भवकालीनगूढोत्पन्ना
भित्यर्थः इति संक्षेपः अथ पौनर्भवः ० ॥ सप्त ९ इति याज्ञवल्क्यस्तत्र पंचम
स्य कालीनस्य निरूपणानंतरमेव असतायां सतायां वा जातः पौनर्भवः
स्मृतः इति तन्निरूपणात् पूर्वोक्तप्रकारेण क्षेत्रिणा निसृष्टके क्षेत्रे पूर्वस्व
य्यभुक्ते सम्भुक्ते वा यो जायते स पौनर्भवः क्लीवं विहाय पतितं या पुनर्ल
भते पतिं तस्यां पौनर्भवो जातो व्यक्त अपत्यादकस्य सः इति कात्यायनव
चनमपि नियुक्तः परस्त्री वत्वं पतितत्वादिरूपक्लेशजनकरणप्रयोजक
रूपस्यात्रापि कथनात् तथा चैतादृशस्थले क्षेत्रिणः क्षेत्रजः पुत्रो भव
तिता दृशो स्थले तृतीयादि पुत्र आवयोरपत्यं भविष्यतीति नियमवि
षयं पुत्रो वा पौनर्भवः न त्वया पाणिग्रहीतारं परित्यज्य तथा हमिसुक्ता
ऽन्यं पुमांसं भजति तस्याः पुत्रः पौनर्भव इति केचित्तन्न विधवायांयत्क
पतिकायां वा पुनः संस्कृतायां जातः पौनर्भवइति शूलपाणिना पतित्या
गिन्याः पुत्रस्यापि पौनर्भवत्वकथनात् न हि या पतिं त्यजति सा चेन्न चि
त्तनि युज्यते तन्नियोगे वा क्षेत्रजस्याधनं भवति तरसाध नं लेऽपि पौन
र्भवस्त्वत्रसिद्धो किमपवादः सामान्यतोऽनियुक्तापुत्रेण इति अत एव
कात्यायनवचने पौनर्भवत्वस्वीकारात् अन्यथा तस्य ह्यादृश पुत्र



श्लोकः २१

चरिभिर्वापत्तेर्याज्ञवल्क्येन त्यागपर्यन्ताकथनाच्च मनुः या पत्या वा प
रित्यक्ता विधवा स्वेच्छया यया उत्पादयेत्पुनर्भूत्वा स पौनर्भव उ
च्यते या भक्ता परित्यक्ता मृतभर्तृका वा अन्यस्य पुनर्भार्या भूत्वा त्पा
द् इति तु पुनर्भूत्वा इत्यर्थः तेन । च स्त्रियाः द्वितीयविवाहकर्त्तोत्पा
दितः पौनर्भवः ननु क्षेत्रिणा नियुक्तायाः पुत्र इष्यते सचिरन्तं अतएव
च रत्नाकरः उत्पादये त्स्वर्णादिति शेषः पुनर्भूत्वा पुरुषान्तरेण
स्मानं विवाह्य इत्ति अत एव च पुनःसंस्कारनाम्नां जातेः पौनर्भव इति
शूलपाणिस्तत्रेयम उपपत्तिः एवं सति क्षेत्रिकानुमानस्पउत्पाद
नः पुत्रस्य द्वादशपुत्रा बहिर्भावापत्तिर्नतु क्षेत्रिणा ज्ञाते ज्ञाते वा
ते वा क्षेत्रे बलात्कारेण उत्पादितस्य वास्यापि द्वादशपुत्रबहि
र्भावइष्ट एव न हि तस्य पुत्रत्वं केनाप्युक्तं न च बीजस्यैव च योऽन्याश्च
बीजमुत्सृष्टमुच्यते इत्यनेन तस्य बीजिपुत्रत्वमा पाद्यमिति
वाच्यं तद्वचनस्य बीजित्वत्ववोधकत्वेनेव बहूनामर्थत्वात् न च ज
नयितु पुत्रो भवति संपराये मोघं वेत्ताकुरुते तत्तनुमित्यापस्त
म्बेन पारलौकिकस्य कर्तृत्व कथनात् पुत्रत्वमेव कथमिति वाच्यं
अपस्तम्बवचनस्य वेत्ताकुरुते इति दर्शने क्षेत्रजपुत्र का र
णनिरूपोधकत्वकल्पनात् इति च न्न अपुत्रस्य परक्षेत्रो
त्पादितपुत्रभागित्वदर्शनात् पारलौकिकपुत्रार्थे चबीजिनः
प्रवृत्तेश्चाहने अन्य थाऽऽवश्यपत्नीभिविष्पतीत्यभिसन्धिवै
पर्थ्येत्वतमाऽन्त्रोपेक्षितं तत्त्वे परस्त्रीगमनं परित्यज्य द्वासमेव कार्णी
यात्कामजपुत्रार्थं तु कामादेव प्रवृत्तिसंभवात् अथ असत्ता च स
ता चैव पुनर्भूः संस्कृतपुनः इति याज्ञवल्कीयेन पुनःसंस्कृतायाः पुनर्भू
त्वकथनात् मनुवचने पत्या परित्यक्ता इति दर्शनात् कात्यायनवचने विहा
येति त्यगार्थकहाधातो प्रयोगदर्शनाच्च वाचनिकैव न्याय्यानवतार इति
न्यायात् क्षेत्रिकानुमतपरक्षेत्रोत्पन्नस्य पौनर्भवत्वं नांगीक्रियते एव
तवाहमित्युपगताऽसा च तुर्थी प्रकीर्तिता इति नारदोक्तचतुर्थस्वैरिणीपु
त्रादिवत् पौनर्भवत्वं नांगीक्रियत एव न चैवं बुधस्य चन्द्रपुत्रत्वं मा भूदिति
वाच्यं देवानां मनुष्यपर्यनुयोगानर्हत्वात् अन्यथाऽऽत्मस्यपराशरपुत्र
त्वात् उपपत्तिस्तु तत्पूर्वं सत्यवत्याः पुंसम्बन्धाभावेन कथं चिदपि पुनर्भूत्व

वाच्यस्यानुपपत्तेः एवं च एषां पौनर्भवबहिर्भावे यत्र क्वचनोत्पादितः इति
विप्लुतब्रह्मदरापुत्र एवं तन्भीवः तथात्वेपि तपोवीर्यप्रभावात्तस्योत्कृष्टत्वं
क्षत्रियवंशोद्भवस्य विश्वामित्रस्य ब्राह्मणत्वमिव तपोवीर्यप्रभावेन तु ज
ध[illegible]न्यत्वमेव अत एव मुनिभिः मतभेदेन प्रायः सर्वेषामेव पुत्राणामुत्कृ
ष्टत्वमुक्तं नन्वेकादशस्वन्तत्रतपःप्रभृतिगुणतारतम्येनैव व्यवस्थापनं कृतं
इति चेत् त्रकेचित्त पुनर्भूस्वैरिणी विभागप्रकरणे याज्ञवल्क्येन पुनःसंस्कृ
तायाः पुनर्भूत्वकथनेऽपि अत्र पौनर्भवपदार्थघटकपुनर्भूत्वपतिच्छित्ती
यगामिन्येव का स्यात् न वचने सागमबोधकपदं चोपलक्षणमवश्यं वक्तव्यः
अन्यथा पतिकर्तृकस्त्रीकर्तृकत्यागबोधकत्वेन तयोरेव परस्परविरोधा
त् न तु न महायाः कामात् किंचित् पुरुषं गतायाः कथं पुनर्भूत्वं पुनरुपदा
य्यो संगमिः न च स पुत्र एव न इति वाच्यं परमतः पुत्रस्य पुत्रत्वं स्वीकुर्वतो
अभुक्ता पुत्रस्य पुत्रत्वास्वीकारे युक्तभावात् यत्र क्वचन जातेन पिता
पुत्रेण नन्दति तेन चानृणतां याति पितॄणां पिण्डदेन वै इति शंखलिखि
तहारीतपैठिनसिवचनेन न सकोवानर्हणात्तस्यापि नृणमोक्षणाकर्तृत्वज्ञा
पना तत् इति चेत् कालीन एवं तन्भीवत्वं न च मुनिभिः स्मादकपुत्रत्वका
लीनस्येनोक्तं इति वाच्यं मनुभिः स्पष्टमनभिधानेऽपि युक्त्या सिद्धत्वात् स्य
वा पुनर्भूषितार्थसंगमानःपि पौनर्भवः पारिभाषिक एव परस्तेनैव स्वयंस्तु
स्यादित इति एवं च नानामुनीनां मतभेदेन पौनर्भवस्य नानाविधत्वेन उत्क
र्षापकर्षव्यवस्थापनं वंधुदायहरणे हरणाभिधानं च स्वासंगत्वेत ए
च चतुर्थपौनर्भवे इति विश्वसत्रस्य सुसंगच्छते न तु परिकस्यचित् पितामह
हस्यो वसो वर्त्तते भ्रातुरद्यपौनर्भवित तत्र तदृक्थ्यं कोगच्छेत्यादि इति चेत् पि
ए उदान तारतम्येनैव व्यवस्था एवं च पुनःसंस्कृतापुत्रः पौनर्भव विवक्षाय
भिप्रेतो भ्रातुष्पुत्रोधिकारी असंस्कृतापुत्रस्तु नाधिकारिमनुना निरस्त
त्वात् तन्न च मनुवचनेपि पुनर्भूत्वा इति स्पष्टेनैवोक्तं पौनर्भवस्य वंधुदा
यानधिकारित्वमिति वाच्यं स्वयमसंस्कृतापुत्राभिप्रायेणैव वंधुदायान
धिकारित्वमुक्तं इत्युक्तौ स्मृतिविरहात्तन च मनुस्मृतेः सर्वतो बलवत्वात्
तेनोक्त एव क्रमः स्वाभाविको ग्राह्यः अतिशयगुणवत्वे तु अन्यमुत्पुत्र
क्रमो वाच्यः एवं च साम्यगुणदत्तकातिशयगुणपौनर्भवयोः समांशित्वं ७८
वंधुदायग्राहित्वं च भवत्विति वाच्यं साक्षिस्थले द्वैधे बहूनां वचनं समेषु

गुणिनां तथोक्तयाज्ञवल्क्येन समसंख्यकत्व एव गुणिपर्य्यन्तानुसारेणानुज्ञा
पितृस्थाकल्पनात् नचात्र समानत्वेमेव वक्तव्यं मुनिनां अतित्वबहुत्वात्
किंचिदल्पाधिकसंख्याविवेचनस्यायुक्तत्वात् इति वाच्यं तथापि स्मृत्योर्वि
रोधेऽन्यायस्तु बलवानव्यवहारतः इति याज्ञवल्क्येनायुक्तिमत्या एव स्मृते
र्बलवत्त्वकथनात् अत्र श्रुतिस्पृहाधीनसम्बन्धापेक्षया जन्माधीनसम्ब
न्धस्य बलवत्त्वं युक्तिः अत एव बृहस्पतिः मनुः यत्रते भिहिताः पुत्राः प्रसंगा
दन्यबीजजाः परस्येति बीजं ते जाताः तस्य ते नेतरस्य तु बीजापि स्यापायच्छ
ष्टं सिंचमिति विभावनीयं इति बृहस्पतिः क्षेत्रजाद्याः सुतास्त्वन्ये पंचषट्स
सभागिनः क्षेत्रजाद्याः सुतास्त्वन्ये षट्सप्तभागिनः क्षेत्रजाद्याः क्षेत्रजः
कानीनैपौनर्भवाइत्यर्थः विंशपौनर्भवाय इति हारीतः पौनर्भवन्तु परत
इति ब्रह्मपुराणं परतः एकदेशमित्यर्थः एकैकमितरेषां इति शंखलिखि
तौ इतरेषां पौनर्भवकानीनगर्भस्यन्नानां बृहस्पति क्षेत्रजो गर्हितः
सद्भिस्तस्या पौनर्भवः सुतः कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च
अत्र नीचबीजे तेषां मातुर्व्यभिचारित्वप्रतिज्ञेयं याज्ञवल्क्यः क्षेत्र
बीजान्यतरसम्बन्धेन जनितान्यष्टपुत्रानुक्त्वा न हितान्कृतान् षट्पु
त्रान् वक्तुमुपक्रामन्तेषां प्रधानत्वात् प्रथमं दत्तकमाह दद्यान्माता पि
तावा यं स पुत्रो दत्तको भवेत् अयं सप्तम इति याज्ञवल्क्यमतं षष्ठस्य पौन
र्भवस्य निरूपणानंतरं निरूपणात् अत्र वाकारः समुच्चये वास्यादिकल्पोप
मयोरेवार्थे च समुच्चये इत्यमरः एवं च मातापितरौ उभौ एव यद्दद्यात् तदा द
त्तकः सिद्ध इति एतच्च मातापित्रोरुभयसत्त्वे एकतरमरणेत्वेकतरेण दानं चैत
त्र च पुंसो मरणे भर्त्रनुमतिं विनापि स्त्रिया न दातव्यं विशेषवचनात् यथा वशि
ष्ठः शुक्रशोणितसंभवः पुत्रः मातापितृनिमित्तकः तस्य प्रदानविक्रयत्यागेषु
मातापितरौ प्रभवतः नत्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा स हि संतानाय
पूर्वेषां नतु स्त्री दद्यात्प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्तुः पुत्रं प्रतिग्रही
ष्यन्बंधूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा दूरबांधव
सन्निकृष्टमेव गृह्णीयात् संदेहे चोत्पन्ने दूरेबांधवं शूद्रमिव स्थापयेत् विज्ञा
यते ह्येकेन बहून् त्रायत इति दानवत् विक्रयपरित्यागावपि न कार्यौ विक्रय
त्यागपरिभरणासमर्थे त्यागः संतानाच्छेदे हि महान्दोषः इति प्रकाशः प्रति
गृह्णीयादिति तत्कुलोच्छेदस्यात् कर्तव्यत्वादिति भावः नन्वेनं दत्तकत्वासिद्धिः

श्लोकः २८

केचित्तु प्रमत्तादिदत्तवत् अज्ञानिनादत्तो भ्रातृरहितः पुत्रो सिद्ध्यतीत्याहुः
ननु स्त्री भर्त्तुरनुज्ञां विना दद्यात् अत्र बीजं उभयस्वत्वास्पदीभूतद्रव्यस्य
एकेनापरानुमतिं विना दानस्याकर्त्तव्यत्वं ननु साधारणधनस्यैकेनकृतं दा
नं चेत् सिद्ध्यति तदा एकस्य मातापितृसाधारणस्य पुत्रस्य दानं न सिद्ध्यती
ति चेत्तत्र उभयोरेव जन्मस्त्वस्यैकव्यापारजनितं उभयनिरूपितमेकस्य
स्वत्वं कल्प्यते एकेनापि दाने तु तस्य नाशात् उभयस्वत्वनाशः तत्र च शु
क्रशोणितरूपविभिन्नकरणत्वाङ्गीकृते विभिन्नं स्वत्वं जायते अत्र चैक
कर्तृकदानात् तन्मात्रस्वत्वनाशेऽपि नेतरस्वत्वनाशः न च तत्रापि जन्म
नो नानात्वं व्यक्तिकालयोर्भेदादिति वाच्यं जन्मनो नानात्वेऽपि जन्मत्वस्य
एकत्वात् तथाहि पित्र्यधने स्वत्वप्रतिपित्र्युपादानकजन्मत्वेन हेतुत्वं अ
त्र च मातृस्वत्वं प्रतिशोणितसंभवत्वेन पितृस्वत्वं प्रतिशुक्रसंभवत्वेन
हेतुत्वं कल्पनीयं कथंचिदनुगमसंभवेऽपि सत्कार्य्यैः श्रुतिवचनानुसा
रित्यमेव कल्प्यते ननु साधारणं न दद्यादित्यत्रैव न स्त्री दद्यात्त्रापि अकर्त्तव्य
त्वमात्रं प्रतीयते न तु दानासिद्धिरिति चेत् नैको दद्यादित्यत्रोक्तस्यात्स्वत्वसा
रणद्रव्यस्य कुंसाप्येकेन दानस्याकर्त्तव्यत्वात् तस्मात् भर्तुः पुत्रं विज्ञानन्ती
त्यादिवचनात् एतावता नैव पुरुषो यज्जायात्मा प्रजेति हि तिवचनाच्च
पुत्रे भर्तुरेव स्वत्वं मुख्यं तस्य रक्तत्वाभावा भार्य्यायास्तु पुत्रस्य मातृपि शोणितस
म्बन्धित्वात् गर्भधारणकृतत्वाच्च गौणमेव स्वत्वं अतः मुख्यस्वाम्यनु
मतिं विना अस्वतन्त्रकृतं दानं न सिद्ध्यत्येव एवं च भार्य्या पुत्रश्च दासश्च
इत्यादिवचनस्य पत्नीधने भर्त्तृस्वत्वबोधकत्वादिनां मते मधुसंगच्छते
इति ध्येयं प्रतिगृह्णीयाद्वेति भर्त्राज्ञां विना भार्य्यया प्रतिगृहीते पुत्रे स्व
त्वं सिद्ध्यति न तु न तत्पुत्रकार्य्यकारित्वं दायग्रहणश्राद्धदानादिकं पुत्र
करणस्य पुत्रकृत्यबोधनात् न हि कश्चित् शास्त्रे स्त्रियाः पुत्रकरणं दृश्य
ते ननु कालीनादेः स्त्रियेवाकृतत्वमिति वाच्यं स्त्रिया कातावत्स्वयमेव
स्यारवेपितस्य पुत्रत्वसिद्धिः पितुरिच्छयैव शास्त्रबलाद्दानं तु स्त्रियाः इ
च्छयाइति एवं च मातापित्रोर्मिलितयोर्यद्दानमुक्तं तद्धर्म्मजनकदा
ननिष्पत्त्यर्थं तु मात्रैव न तु दानं सि ध्यत्येव किंतु न तेन मातृसम्बन्धनिवृ
त्तिः अत्र तु जननीमातृकोगृहीतपितृकोदत्तकेन व्यवहारसिद्ध इत्युभया ७८
नुमतमेव गृह्णीयात् अथ ग्रहणप्रकारः पुत्रं प्रतिग्रहिष्यन् इत्यादिस्व

वंधुनारूपइत्यर्थः अनेनसवंधुभिर्हीनःपुत्रोदायंग्रहीष्यति श्राद्धा
दिकंचकरिष्यति बांधवश्चतंननिवारयिष्यंतीतिसूचनार्थे दानजनिवेदने
चार्पेतदर्थकं एवव्याहृतिहोमश्चाबांगं तदासिद्धावपिपुत्रत्वासिद्धिः अं
गासिद्धौप्रधानासिद्धेः केनाप्यनंगीकारात् अथालौकिकंलौकिकेनांगमि
ति नसम्भवात् लौकिकेप्रसंसंदृष्टेपुत्रेकल्प्यमानेवासत्वे आलौकिकोवि
धिमात्राबोधनीयः व्याहृतिहोमःनंगिभवतियथा वास्तुयागोनगृहांगंकिं
तुप्रधानंअत्रायंभावःफलवत्सन्निधावफलंतदंगमितिजैमिनिसूत्रेणः
फलवतःप्रधानफलवतःप्रधानकर्म्मणःसन्निधिस्थःतज्जन्यापूर्वसा
सकोयोफलःप्रधानफलाजनकःसांगमितिबोधनात्लौकिकस्यगृहा
देश्चापूर्वजनकत्वाभावात् नांगलक्षणसंभवोवास्तुयागादारितिनहि
विनावास्तुयागंगृहस्यभित्तिसमवधानप्रच्छादनादिकंनभवतिइतितथा
चव्याहृतिहोमंविनाकिंपुत्रकरणजन्यापूर्वंनभवतिव्याहृतिहोमेतद्भ
वतीतिवक्तुंयुज्यतेपुत्रकरणस्याजनकत्वाभावादितिचेदस्तुसवास्तुया
गवत्स्वतंत्रंप्रधानकर्म्मतथापिनदकरणेनपुत्रत्वासिद्धिःवस्तुतस्तुपु
त्रकरणेःपूर्वमेवनाप्यतेतस्याफलंतदाभावात् नहितत्करणेनपुत्रो
भवतितस्यफलंतदाभावात्प्रागेवजातत्वात् अथतत्रसपुत्रत्वंक्रियतेद
त्तिंचतर्किंतावत्स्वपुत्रत्वंस्वस्वत्वास्पदत्वंस्वरापस्याद्याधिकारित्वविशे
षितंवा नाद्यःअन्यथादासउच्यतेइत्यनेनसंस्कारादभावइवमहाव्याहृ
तिहोमाभावेपिप्रतिगृहीतस्यस्वस्यसर्वैर्द्धिसिद्धत्वात् द्वितीयश्चेत्स्वाद्या
द्यधिकारित्वं किंश्राद्धाद्युक्तव्यापारवत्वंतदाप्रतिग्रहपर्य्यन्ताभा
वेपिपर्षिकेनतत्करणेबालत्वेमंत्रपाठान्नपिण्डनिःस्वपादिसिद्ध्यैव
व अथतत्पिण्डदानंमंत्रपाठेनतस्यस्वर्गसिद्धिरितिचेद
न्योन्याश्रयःतथाहि अधिकारिकृतेनकर्म्मणास्वर्गसिद्धिःस्वर्गसि
द्धिसमकर्म्मकर्तृत्वंअधिकारित्वमिति परस्परमपेक्षते अथाधि
कारिकृतकर्मणास्वर्गसिद्धिरित्यत्रविशेषतः औरसपुत्रकृतकर्म्म
णा औरसपुत्रविनाभूतस्यदत्तजपुत्रकृतकर्म्मणा इत्येवार्थेवाच
कव्यस्तथातपूर्वपरवीभावेप्रतिगृहीतपुत्रकृतकर्मणास्वर्गसिद्धि
रित्यपिवक्तव्यंतथाचप्रतिग्रहेएवतत्पुत्रेस्वर्गसाधन
त्यधनग्रःसकर्म्मकर्तृत्वमेवारोपानेइतितदारोपश्चप्रतिग्रहविष

पीकरणमेव एवं महाव्याहृतिहोमोद्देश्यताविशेषाश्रयीकरणं चे
त्तिचेत् प्रतिग्रहादेः तावत् पुर्ण्यत्वं वि[illegible]नाशात् अपूर्वाख्यसंस्कारविशे
षस्यैव कल्पनात् न च प्रतिग्रहविनाशेपि प्रतिग्रहध्वंसस्यैव फलसाध
कत्वं वक्तव्यं तस्यासति सर्वत्रैव कर्म्मध्वंसस्य फलजनकत्वेन अपूर्वप्र
माणाभावप्रसंगात् भवतु वा प्रतिग्रहध्वंसः फलसाधनं तथापि लौ
किक एवायं स इति पूर्वोपवर्णितोत्तरः ननु प्रतिग्रहांगं न महाव्याहृतिहो
मः किं तु स्वतंत्र एव अधिकारिविशेषणं तस्याश्चाधिकारिकृतकर्म्मणो
ऽप्यस्य महाव्याहृतिहोमोद्देश्य प्रतिप्रगृहीतपुत्रकृतकर्म्मणा इत्यर्थः
एवं च होमाभावेधिकारित्वाभावात् पुत्रत्वासिद्धिरिति न च द्वयोरधिका
रिविशेषणत्वे गौरवात् प्रतिग्रह एवाधिकारिविशेषणमस्त्विति वा
च्यं प्रतिग्रहोऽधिकारिविशेषणं होमो वा इत्यत्र विशेषप्रतिपादकयुक्त्य
भावात् द्वयोरेवाधिकारिविशेषणत्वस्य युक्तत्वात् एवं केवलप्रतिग्रहा
त् पुत्रत्वाभावस्य शास्त्रसिद्धत्वात् सगोत्रेण संस्कारस्यापि सहकारि
त्वं वाच्यं एवं च विधिविनिगमनाविरहात् व्याहृतिहोमस्यापि सहकारित्वं
युज्यते वंधुनिर्वचनादेश्च दृष्टार्थकत्वेन च [illegible] उपपत्तौ अदृष्टार्थकत्वक
ल्पनेन युक्तं एवं च [illegible]व्याहृतिहोमं विना पुत्रत्वसिद्धिर्नभवतीति निदृ
ष्टार्थ इति चेत् किं त्वेवं जनिर्वदनबंधुसन्निधानयोस्तद्वाचारादिनिष्प
न्न सहकरणनामजात्यादिज्ञानरूपदृष्टार्थकत्वेनावश्यकत्वं अतस्त
दंगं विनापि क्वचित् पुत्रत्वसिद्धिः एवमसामर्थ्ये कुत्रचिद्धोमांगाभावेः
पि द्रष्टव्यं विवाहादिवत् इति पितामहोक्ते व्ययमासयोश्चन्यत्ति यथाह
मो कन्यां भवते ददे इत्येतावन्मात्राभिसंधाने साफल्यं भवति इति प्रति
ग्रहीता च लपति भवति किं तु अन्यस्मै तां दातुमर्हतीति यस्मात् स्तुरेव
स्वपित्रा प्रदत्ता नाम्नी कन्यां कुंनिभोगाय दत्ता तेन च पुनः पांडवे दत्ता स
तां कन्यां पत्नीत्वेन ददे इत्यभिसंधाने तु प्रतिगृहीतुः पत्नी एव भव
ति न तेन सा अन्यस्मै दातुं युज्यते अयमेव विवाहः तथा केवलस्वत्वा
भिसंधाने न दाने तु स्वत्वमेव भवति यस्माद्दासे पुत्रत्वेन भवते हं ददा
मीत्यभिसंधाने पुत्रत्वम् अहं स्वामी स्यामित्यभिसंधाने च पुत्रो भवति न तत्राऽ
न्योपि स्यात् तत्रच चूडाद्याद्यदि संस्कारा निजगोत्रेण वै कृताः दत्ताद्यास्त
नयास्ते स्युरन्यथा दास उच्यते इति कालिकापु[illegible]णे न निजगोत्रात्वे

स्वापूर्विकसंस्काराभावेपुत्रत्वाभावप्रतिपादनात् तस्यसहकारित्व
मावश्यकंस्मात् तिहोमाभावेपुत्रत्वाभावस्यैकेनाप्यप्रतिपादनात्
व्याहृतिहोमविनापिकेवलदानप्रतिग्रहाभ्यांपुत्रत्वसिद्धिनिष्प्र-
त्यूहैवपरंतु यथामंत्रपाठंविनापिगर्भाधानेनपुत्रोत्पत्तिर्भवत्येवमं
त्रपाठात्पुत्रस्यप्रयतत्वमेवभवति एवमेनःसमेयातिबीजगर्भ
समुद्भवमितियाज्ञवल्क्यवचनात् तथाव्याहृतिहोमंविनापिप्र
तिग्रहमनामकेच्छायाविषयःपुत्रत्वंसिध्यत्येवतत्रापियनत्वविशे
षोनजायतेजनकगोत्रोत्पन्नस्वपूर्विकसंस्कारात्तुपूर्वगोत्रांशोनभव
वतीतिकथंपरदत्ताइत्यादिरूपस्यतिस्मलककालिकापुराणव
चनस्यकंप्र — ज्यारूपेणशरणमितितस्यविवेचनंविनेचजनक
गोत्रोत्पन्नस्वपूर्विकृतनचूडादिकासपुत्रत्वासिद्धौसम्मतिअत्रेदंविवे
चनीयंयदिपंचवर्षाभ्यांतरेपुत्रंगृहीत्वानंतरंपितामतचूडादिकंतुन
कृतंतत्रतस्यपुत्रत्वंसिध्यतिअतःविप्रगोत्रेणचूडादेःसहकारित्वेन
युज्यते परंतुजनकगोत्रेणचूडाद्यभावस्यनाम्नानतकुतोलभ्यतेइति
चेत् पितुर्गोत्रेणयःपुत्रंसंस्कृतःपृथिवीपते आचूडांतंनपुत्रःसपुत्र
तांयातिचान्यतः इतिकालिकापुराणेन जनकगोत्रेणचूडाद्यभाव
स्यसहकारित्वबोधनात् नचविनिगमनाविरहात् उभयोरेव सह
कारित्वंयुक्तमिति वाच्यं एकेनैवकृतार्थत्वे उभयोःसहकारित्वकल्प
नेगौरवात् प्रयोजनाभावाच्च नचयदिजनकगोत्रेणसंस्कृतःप्रतिगृहीत
गोत्रेणसंस्कृतःतस्यसूतकत्वसिद्धिनिवारणंपितुर्गोत्रेणेत्यादिवचनप्रयोजनं
प्रतिगृहीतगोत्रेणसंस्कारंविनापुत्रत्वासिद्धिस्तुचूडाद्यायदिसंस्कारादित्या
दिवचनप्रयोजनंइतिद्वयोर्विभिन्नंप्रयोजनंवर्ततेइतिद्वयोरेवसहकारि
त्वंवक्तव्यमितिवाच्यं एकेनैवचरितार्थत्वात् तथाहि पूर्वोक्तचूडयैवसंस्का
रासिद्धौप्रतिगृहीतगोत्रेणसंस्कृतत्वमेवनास्तिजनकगोत्रेणसंस्कृतत्वम
पिवर्ततेइत्येकवचनेनतस्यदत्तकत्वनिराकरणंसंभवति नवतथासत्यपिक
स्य सहकारित्वंवक्तव्यमित्यत्रविनिगमनाभावः इतिवाच्यं निजगोत्रेणचूडा
करणात् पूर्वंतस्यपुत्रत्वस्वीकारावश्यकत्वे गोत्रापरगोत्रोत्पन्नत्वाभावस्ये
वसहकारित्वावश्यकत्वात् तथाहि यदि चूडाकरणात् पूर्वंपुत्रत्वं तस्यात्तदा
चूडांगनांदीमुख श्राद्धानुज्ञादौअमुकगोत्रस्यममपुत्रस्यचूडाकर्मणिअभ्युदयार्थं

मिस्तुत्रेखेः कर्पंस्यात् नहि तदानीं तस्य पुत्रत्वं गोत्रकारितन्मुनिसंतता
नत्वंवा वर्त्तते नहि नांदिमुखश्राद्धमेव चूडायां तत्तत् करणप्रवृत्तेव
गोत्रभ्रंशोभवेत् नच चूडापरेण तदंगश्राद्धपर्यन्तं कर्त्तव्यं अन्यथा चू
डाभ्यां प्रधानीभूतायां गोत्रोल्लेखाभावेन वचनस्यार्थासंगतेरिति वाच्यं
तथासति जनकगोत्रेण कृतेनांदीमुखश्राद्धमात्रे दैवाद्वा जातायां च
डायां पंचवर्षमध्ये प्रतिग्रहानंतरं निजगोत्रेण कृतचूडस्यापि दत्तकत्वा
सिद्धिप्रसंगात् नचेष्टापत्तिः प्रधानकृतेर्दत्तकत्वासिद्धिः शास्त्रेणावो
धितत्वात् नच फलोपहितांगपर्यन्तं चूडापरं वाच्यं नतु श्राद्धस्य च चू
डारूपफलानुपधानात्तच्चूडापरत्वाभावत्वमिति वाच्यं एतत्पर्यन्त
कल्पने प्रमाणाभावात् अथ पंचवर्षे गृहीतस्य अनन्तरं जनकगोत्रे
णापि संस्कृतस्य दत्तकत्वसिद्धिवस्तु प्रति ग्रहकाले जनकगोत्रेण
संस्काराभावेन प्रतिगृहीतपुत्रत्वसिद्धौ सुतरां तद्गोत्रत्वसिद्धौ च नक
गोत्रस्य तदानीं बाधितत्वेन अनधिकारिकृतत्वेन तद्गोत्रोल्लेखपूर्वक
चूडाकरणस्यासिद्धत्वात् नचैवं तथासति पितुर्गोत्रेणेत्यादिवचनवैयर्थ्य
इति वाच्यं वर्षत्रयमध्ये कृतचूडस्य पंचवर्षमध्ये गृहीतदत्तकत्वसिद्धि
वारणार्थमेव तद्वचनात् नन्वत्र सगोत्रस्य पुत्रो भवेदिति चेत् प्रतिगृहीतुरी
स इति अनीहि उच्यते अत्रेष्टापत्तिरेवोचिता यतस्तस्य तत् चूडायां संस्का
रासिद्धेः चूडांतरमपेक्षितेन तत्र न संभवति उभयोः पुत्रत्वासिद्धौ अधिकारि
वैकल्यात् तदानस्य स्वगोत्रेणैव पुत्रत्वगोत्रयोर्निवृत्तेः अस्य पुत्रत्वासिद्धश्च
भवतोच्यमानत्वात् नच चूडाद्या इति वचनवैयर्थ्यमिति वाच्यं पितुर्गोत्रे
णायुक्तार्थस्य एवरक्षार्थं तदुपन्यासात् तस्मात् चूडायामकृतायामपि
पंचवर्षमध्ये प्रतिगृहीतपुत्रत्वसिद्धिः अत एव चूडाद्या इत्यत्रापि परः
ग्नाह्यस्य विवाहपर्यन्तभावस्याभावे पुत्रत्वासिद्धौ प्रतिगृहीतस्यापि तद
पि कन्याविवाहः स्यात् एवं देवादत्तविवाहस्य पुत्रत्वासिद्धिः स्यात्
एवं शूद्रस्य चूडादेः काम्यत्वेन तत्करणे पुत्रत्वासिद्धिः स्यादित्यादि कं नि
रस्तं जनकगोत्रेण चूडाकरणनिवृत्तेरेव तत्स्य प्रविषयत्वादिति अत्रे
दमवधेयं अकृतविवाहेन पुत्रो मगृहीतव्य इत्यत्र शास्त्रेण दूषितेस्सगो
त्रपुत्रश्च न ग्रहीतव्य इत्यत्रापि शास्त्रेण दूषितेत्तव्यतु न तु चूडादीनां म
ध्ये योपः संस्कारः स्वजातस्तु कृत्सन परंमुखत्वे दासत्वं ग्रहणानंतरदिन ८१